- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 127/254
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – ~~[illegible]~~ वीतरकल्पे वैदोक्तधर्मान् गृह्णाति
- End – तास्मिन्नृतादयत्पार्थैरदारिक्रियमुपगच्छेत् तच्चाभिगमनं ——
- Colophon-
- Illustrations -
- Source -
- Subject - स्मृत्यादि से सम्बन्धित
- Revisor -
- Author - अज्ञात
- Remarks- अपूर्ण

1-35 अनुप०
65-104 अनु०

[illegible] [illegible]

पा॰मा॰
२६

[illegible]वांतरकल्पे वेदोक्तधर्मान्स्मरंति मनुहारीतयाज्ञवल्क्यविष्ण्वाद
यउपलभ्यंते तद्वत्प्रतिमहाकल्पं तेन तेन चतुर्मुखेन पूर्वान्तरकल्पे च तैस्तैर्म
न्वादिभिः स्मृतिप्रणयनात् धर्मादेः प्रवाहनित्यत्वं सिद्धम् एतदेवाभिप्रेत्याश्व
मेधिके पर्वणि च पठ्यते युगेष्वावर्त्तमानेषु धर्मोप्यावर्त्तते पुनः धर्मेष्वावर्त्त
मानेषु लोकोप्यावर्त्तते पुनरिति युगभेदेन धर्मवैलक्षण्यमभ्युपेत्य धर्मानिति बहु
वचननिर्देशः तदेव वैलक्षण्यं प्रतिजानीते अन्य इति अत्रान्यशब्देन धर्मस्व

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे युगे अन्ये
कलौ युगे नृणां युगरूपानुसारतः २२

रूपान्यत्वमाचष्टे किंतु प्रकारान्यत्वं अन्यथा धर्मप्रमाणचोदनानामपि युग
भेदेन भेदोपपत्तेः नहीयं चोदना कृते ध्येतव्या इयं त्रेतायामित्यादि व्यव
स्थापकं किंचिदस्ति प्रकारान्यत्वेप्यस्ति दृष्टान्तः एकस्याप्यग्निहोत्रस्य
सायंप्रातःकालभेदेनानुष्ठानप्रकारभेदश्रवणात् रूतंत्वासत्येन परि

राम
२६

पमि

ञोपांते अग्न इत्यमुं वाक्यादिमपेक्षते मध्यममंत्रेत्वाद्यंतावपेक्षेते नत्वेवं संशयः।
किमपेक्षितार्थपूरणाय लौकिकः क्रियानपिपदसंदर्भोध्याहरणीयः किंवा
श्रूयमाणपदजाते अनुषंजनीयमितिवाक्यादेः प्रथममंत्रेणैव संबंधाद्बोध्य
शेषस्य चरममंत्रेणैव संबंधाल्लौकिकाध्याहार इति पूर्वपक्षः वैदिकाकांक्षायाः
सति संभवे वैदिकशब्दैरेव पूरणीयत्वादन्यमंत्रस्थवाक्यानामपि पदानां बुद्धि
स्थत्वेनाध्याहार्येभ्यः पदेभ्यः प्रत्यासन्नत्वाच्चानुषंगएव कर्तव्यो नाध्याहार
इति सिद्धांतः एवंच सति प्रकृतेपि कल्पांतरधर्मान्स्मरतीति पदत्रयं पूर्वार्द्धे
नुषंजनीयं चतुर्मुखस्तस्मिन्महाकल्पे परमेश्वरेणदत्तवेदस्त्वात्तत्र विप्र
कीर्णान्वर्णाश्रमादिधर्मान्संकल्पस्मृतिग्रंथरूपेणोपनिबध्नाति तथा चोप
तामहवचनानि तत्र निबंधकारैरुदाह्रियंते चतुर्मुखस्यस्मृतिशास्त्रकर्तृ
त्वेमनुनाप्युक्तं इदं शास्त्रंतु कृत्वासौ मामेव स्वयमादितः विधिवद्ग्राहयामा
समरीच्यादीनहंमुनीन् तथा चयथा चतुर्मुखस्तथैव स्वायंभुवोमनुरस्मिन्

पा॰मा॰ ३७

निमित्तत्वासंभवात् ततो यथाशक्त्यंगपरित्यागेन प्रधानं कर्तव्यं नावश्यैवशास्त्रव-
शात्फलसिद्धिरिति बौधायनश्च स्मरति यथाकथंचिन्नित्यानि शक्त्यावस्था-
नुरूपतः येनकेनापि कार्याणि नैव नित्यानि लोपयेदिति पुरुषशक्तिनाश
तन्त्रकृतमनुष्ठानवैषम्यमिति विवक्षयानुष्ठानमभिमुक्तं अथ यथाप्रतिज्ञातं वैल
क्षण्यं षड्भिः श्लोकैरुपन्यस्यते तत्र चतुर्षु युगेषु प्राधान्येनानुष्ठातुं शक्या
न्यपरमपुरुषार्थहेतून्धर्मान्विभजति तप इति तपः कृच्छ्रचांद्रायणादिरू

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वा
परे यज्ञमेवाहुर्दानमेकं कलौ युगे २३

पेणाहारवर्जनं तपो नानशनात्परमिति श्रुतेः यद्यपि दानस्यापि तपस्त्वं
श्रूयते एतत्खलुवाव तप इत्याहुर्य्यः स्वं ददातीति तथापि नात्र तद्विवक्षितं
दानस्य पृथगुक्तत्वात् ननु व्यासेन तपोन्यथा स्मर्यते तपः स्वधर्मवर्तित्वं

राम
३७

षिंचामीति सायं परिषिंचति सत्यं त्वर्त्तेन परिषिंचामीति प्रातरिति ननु तत्रार्थवा
देन मंत्रः प्रकारभेदेनोपपादितः अग्निर्वा ऋतं तत्र सावादित्यः सत्यं अग्निमेव
तदादित्येन सायं परिषिंचति अग्निनादित्यं प्रातः स इति एवं तस्यात्रापि युगरू
पानुसारत इत्यनेन प्रकारभेदेन उपपाद्यते युगानां स्वरूपमनुष्ठातृपुरुषशः
क्तितारतम्योपेतं तदनुसारेणानुष्ठाने न वैषम्यं संभवति यथाशक्त्या कुर्यात्तथाकु
र्यादिति क्रमेणानुनिर्णीतत्वात् तथाहि षष्ठाध्याये तृतीयपादादौ विचारितं
यावज्जीवमग्निहोत्रं जुहुयादिति श्रूयते तत्र संशयः किं सर्वांगोपसंहारे
णाधिकारः उत यथाशक्त्यंगोपसंहारेण तावद्धिरंगै रूपेतं प्रधानं कु
र्वन्नधिक्रियेतेति सर्वांगोपेतस्यैव प्रधानस्य फलसाधनत्वात् अंगवैकल्ये
फलानुदयात् सर्वोपसंहार इति पूर्वपक्षः अत्र हि जीवनमग्निहोत्रस्य निमि
त्तं तया श्रूयते न त्वंगानां सति च निमित्ते नैमित्तिकमवश्यंभावि अन्यथा

पोधर्मः कृतयुगे तत्सामर्थ्यमिति वक्ष्यति सामर्थ्यं ज्ञानप्रयोजनं चाभिधास्यते तेषां निंदान
कर्त्तव्या युगरूपानुसारितो हि जाइति एतत्सामर्थ्यं बृहस्पतिरपि दर्शयति तपो धर्मः कृतयु
गे ज्ञानं त्रेतायुगे स्थितं द्वापरे चाध्वरः प्रोक्तस्तिष्ये दानं दयादमइति धर्मान्विभज्य तत्र
माणानि विभज्यंते कृतइति मानवादिग्रंथोक्तधर्माणां प्रत्युत्तरकत्वात् ग्रंथप्रामाण्य

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः द्वापरे शांखलिखिताः कलौ पाराशराः स्मृताः

प्राबल्यार्थं धर्मवदधर्मस्यापि वक्तुमिष्टत्वादधर्मप्रापकं स्थानविशेषं हंत २४ य
याविभजते त्यजेदिति पतितः पुमान्यस्मिन्देशे केन राज्ञा परिपालिते ग्रामसमृता

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् द्वापरे
कुलमेकं तु कर्त्तारं तु कलौ युगे २५

त्मनि देशे नि- वसेत् स देशः सर्वोपि कृतसामर्थ्याद्धर्मापादकः एवं ग्रामेयोज्यं
कुलत्यागो नाम पतितस्य कुले विवाहभोजनाद्यप्रवृत्तिः कर्त्तृत्यागः संभाषणादि

श्रौचं संकरवर्जनमिति नायं दोषः कृच्छ्रादेरपि स्वधर्मविशेषत्वात् तपसंतापइत्यस्मा
द्धातोरुत्पन्नस्य तपःशब्दस्य देहशोषणे वृत्तिर्मुख्या अतएव स्कांदेभिहितं वेदोक्ते
न प्रकारेण कृच्छ्रचांद्रायणादिभिः शरीरशोषणं यत्तत्तपइत्युच्यते बुधैरिति यत्तु त
त्रैवोक्तं कोहं मोक्षः कथं केन संसारं प्रतिपन्नवान् इत्यालोचनमर्थज्ञास्तपः शंस
तिपंडिता इति सोन्य एव तपःशब्दः तप आलोचन इत्यस्माद्धातोस्तदुपपत्तेः त
त्र तपोज्ञानशब्देन संगृहीतं परशब्दः प्राधान्येनानुष्ठेयतामाह नहिचेनादिश्रुत
पोनाद्रियेत कृते च ज्ञान यज्ञ दानानि नाद्रियेरन्निति चेन्न इतरव्यावृत्तिरूपायाः प
रिसंख्याया अत्राविवक्षितत्वात् न खल्विदानीं कश्चिदनुष्ठानविधिर्वक्तुमुपक्रां
तः यतएवं विधिविशेषः परिसंख्याशक्यते भविष्यति तपश्चर्मीभिरतइत्यादिना त
दुपक्रमः युगसामर्थ्यं केवलमत्र निरूप्यते यथा वसंते पुष्पप्राचुर्यं ग्रीष्मे संताप
बाहुल्यं इत्यस्यानुसामर्थ्यं तथा कृतादिसामर्थ्येन तप आदिप्राचुर्यं विवक्षितं त

पा०मा० कं अभिगम्यत्तयाज्ञानेनयद्वा यत्नमयार्जितं विद्यते सागरस्यांतस्तस्यांतो नैव विद्यत इति ॥ का-
३९ लिधर्माणामनित्यत्वे प्राधान्येन वक्ष्यमाणत्वात् कलिसामर्थ्यं विशेषतः प्रपंचयति

जितो धर्मो ह्यधर्मेण सत्यं चैवानृतेन च । जिताश्चोरैश्च राजानः स्त्रीभि-
श्च पुरुषाः कलौ ॥३०॥ सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति ।
कुमार्यश्च प्रसूयन्ते तस्मिन्कलियुगे सदा ॥३१॥

जित इति अधर्मस्य जयो नाम पादत्रयोपेतत्वं एकेन वर्त्तमानत्वं धर्मस्य पराजयः तदा-
ह बृहस्पतिः त्रिभिः अधर्मः स्थितः पादैः धर्मः पादेन संस्थित इति । सत्यानृतयोर्धर्माधर्म-
वृद्धिह्रासप्रदर्शनार्थं यावद्यावत्कलिर्विवर्द्धते तावत्तावदधर्मो विवर्धत इति विवक्ष-
या चोरादृष्टान्तकरणं वा तुल्यम् तदुक्तं विष्णुपुराणे यदा यदा सतां हानिर्वेदमार्गानु-
सारिणां तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः । न प्रीतिर्वेदवादेषु पाषंडेषु यदा रतिः
तदा तदा कलेर्वृद्धिरनुमेया द्विजोत्तमैरिति ॥३१॥ यदुक्तं तपः परं कृतयुग इत्यादि तत्र हेतु-

राम
३९

वर्ज्जीनं त्याज्यदेशवन्निमित्तान्यपि त्याज्यानि विभजते कृत इति कृतादिष्विव कलौप

कृते संभाषणादेव त्रेतायां स्पर्शनेन च द्वापरे त्वन्नमादाय कलौ पतति कर्मणा २६

तितसंभाषणादिना न स्वयं पतति किंतु वधादिकर्मणा पतितो भवति २६ महापुरुषपति

रस्कारादौ तदीयशापपरिपाककालं विभजते कृते तादि ति २७ धर्मस्यतारत

कृते तत्क्षणिकः पापस्त्रेतायां दशभिर्दिनैः द्वापरे चैकमासेन कलौ

सम्वत्सरेण तु २७ अभिगम्य कृते दानं त्रेतायां नीयते गृहे द्वापरे

चप्रार्थयतः कलावनुगमान्वितमिति २८

स्यापादकानि निमित्तानि विभजते अभिगम्येति निमित्तकृतं तारतम्यं दर्शयति अ

अभिगम्योत्तमं दानमाहूयैव तु मध्यमम् अधमं याचमानाय सेवादानं तु निष्फलम् २९

भीति उत्तमाधमत्वं तत्र विशेषः पुराणसारे फलभारेणोप

पादितः गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् सहस्रगुणमाहूय याचितं तु तदर्द्धं

चोक्तवत्तं चित्तश्रोत्राणीन मनांसीत्याचक्षते प्राण इत्येवाचक्षते इति तस्मादिंद्रियवायुस
मुदायरूपलिंगशरीरं लोकांतरगमनेन तमं प्राणशब्देन विवक्षितं तच्चकर्मोस्थिमांसा
दियत्स्थूलशरीरं कर्मरज्जुभिर्निबध्यते तत्रैवं बंधनं तत्तद्युगसामर्थ्यादस्थ्यादिषु अव
तिष्ठते तथाच कृष्णचांद्रायणाद्यधर्माहारपरित्यागेन मांसाद्युपतये प्रय्यस्थीनां स
हसानुपपत्त्या त्राणानामव्याकुलत्वेति कृतयुगे तपः सुकरं त्रेतादिषु तु मांसा
द्युपत्तये प्राणिनां व्याकुलत्वात् तपसोदुष्करत्वं यद्यपि प्राणानां मांसाद्युपत्ते येन
स्नानादिरूपयोगोऽहरहरुणास्थापितपसोऽसंभवं वक्तुं न दर्शनं अत एव कृतयुगस्यो
युगांतराभिप्रायेण तपोन्तरं वर्णितं अहिंसासत्यवचनमानृशंस्यं तपो घृणा रानम
यो विदुर्धीरा न शरीरस्य शोषणमिति इदानीं युगसामर्थ्यवर्णनस्य प्रयोजनमाह यु

युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः तेषां निंदा न कर्त्तव्या युगरूपा हि ते

गदति युगरूपा युगानुरूपाः कालपरंतत्राशक्तियावत् तदुक्तमारे द्विजाः ३३

रण पर्वणि भूमिर्नद्यो नगाः शैलाः सिद्धा देवर्षयस्तथा कालं समनुवर्त्तन्ते तथा भा

माऽ कृतेत्विति प्राणशब्दो वायुविशेषं वृत्तिपंचकोपेतं हृदयादिस्थानान्तर्निवासिनमा

कृतेत्वस्थिगताः प्राणास्त्रेतायां मांससमाश्रिताः द्वापरे रुधिरे चैव कलौ त्वन्नादि

चेष्टे प्राणस्वरूपं च मैत्रेयशाखायां विस्पष्टं श्रूयते प्रजापतिर्वा एकोऽग्रे षु स्थिताः २२

२ तिष्ठत्स नाऽमन्यतैकं स्वात्मानमभिध्याय बह्वीः प्रजा असृजत ता अश्मेवाऽप्रबुद्धा अप्रा

णाः स्थाणुरिव संतिष्ठमाना अपश्यत्स नारमत सोऽमन्यतैतासां प्रतिबोधनायाभ्यं

तरमाविशामि स वायुमिवात्मानं कृत्वाभ्यंतरमाविशत्स एको नाशकत्स पंचधात्मानं

प्रविभज्योच्यते यः प्राणोऽपानः समानोदानौ व्यान इति योयमूर्ध्वमुत्क्रामतीत्येष वायुः अथ ×

स प्राणः अथ योयमवांचं संक्रामत्येष वायुः सोऽपानः अथ योयं स्थविष्ठमन्न

धातुमपाने स्थापयते अणिष्ठं चांगे अंगे समं नयति एष वायुः समानः अथ योयं

पीताशितमुद्गिरति निगरतीत्येष वायुः स उदानः अथ येनैताः शिरा अनुव्याप्ताः

एष वायुः स व्यान इति अयमेव पाषाणादिवेत्यर्थः वा कुत्स्नरादीनि इंद्रियाण्यपि प्रा

णाधीनव्यवहारत्वात् प्राणशब्देन व्यवह्रियन्ते अत एव छंदोगा आमनंति नवै वा

चैवाप्युक्तं होतव्यं विधिवद्राजन्नकुर्वन्नभिगच्छति ये गतिम् आत्मकं सत्रमेतस्मादग्निहो
त्रं युधिष्ठिर न त्याज्यं तत्क्षणमप्येतत्कृतीनं द्विजातिभिः यच्चैतस्यां पृथिव्यां हि किं
चिदस्ति चराचरम् तत्सर्वमग्निहोत्रस्य कृते सृष्टं स्वयंभुवा नावबुध्यन्ति ये चैवं
नरास्तु तमसावृताः ते यान्ति नरकं घोरं रौरवं नाम विश्रुतमिति तदेतच्छ्रुतिस्मृ
तिद्वयमग्निहोत्रसाधनस्यानिन्दिततायां बाध्येत गुरोरनिष्टाचरणं गुरोर्वि
श्वविवर्जनम् गुरोश्रमेवाऽकरणं ज्ञानानुत्पत्तिकारणं आचार्यनिंदाश्रव
णं तद्बाधस्वदर्शनम् विवादित्वं तथा तेन ज्ञानानुत्पत्तिकारणमिति स्कन्दपुरा
णवचनम् एतच्च गुरुशुश्रूषाप्रमाणशास्त्रानिंदिततायां बाध्येत प्राप्ते द्वादशमे
वर्षे यः कन्यां न प्रयच्छति मासि मासि रजस्तस्याः पिता पिबति शोणितमिति
यमवचनं पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता भ्रूणहत्या पितुस्तस्याः सा
कन्या वृषली स्मृतेति च तदुभयं कुमारीप्रसवस्यानिन्दिततायां बाध्येत नैतः कथ
मनिंदेत्यत आह युगइति शेषमवशिष्टं तत्तद्युगसामर्थ्यज्ञैर्मुनिभिरन्यैर्विशेषेण

वायुगेयुगे कालेकालेसमासाद्यनवाणांनरर्षभ एव बलवर्षप्रभावाद्धि प्रभवंत्युद्भवंति
चेति नन्वेवंकललोपापिनामनिंद्यत्वात् कृत्स्नधर्माधर्मव्यवस्थापकशास्त्रविप्लवेन
तथाहि जितोधर्मोह्यधर्मेणेतियदुक्तं तत्रधर्मंचरेदितिश्रूयमाणोविधिःपीड्यतेना
स्तिसत्यात्परोधर्मोनानृतात्पातकंपरं स्थितिर्हिसत्यंधर्मस्य तस्मात्सत्यंनलोपये
दितिराजधर्मेषूक्तं तच्चानृतस्यानिंद्यत्वेबाध्येत अदंडयान्दंडयन्राजादंड्यांश्चैवा
प्यदंडयन् अयशोमहदाप्नोतिनरकंचैवगच्छतीतिवचनंचोरस्यानिंद्यत्वेबाध्ये
त स्त्रीभिर्भर्तृवचःकार्यमेषधर्मःपरःस्त्रियाइतियाज्ञवल्क्योक्तिः भर्त्तारंलंघयेद्या
तुजातिस्त्रीगुणदर्पिता तांश्वभिःखादयेद्राजासंस्थानेबहुसंस्थितइतिमनूक्तिः
पारस्पर्यात्वयाभार्याभर्तुर्वचनलंघिनी तत्रदोषोनचास्तीतित्वद्विधेत्ययथार्थत्वंचे
तिसर्वलक्षणायुक्तापियाभर्तुर्व्यतिक्रमं करोतिसापरित्याज्येत्येषधर्मःसना
तनइतिब्रह्मपुराणेमहर्षीणामुक्तिः तदिदमुक्तित्रयंस्त्रीविजितस्यानिंदितताया
बाधितंस्यात् आधिदकांडेअग्निहोत्रप्रायश्चित्तंबहुधाश्रुतं अश्वमेधिकेपर्वणि

लंप्रादोषाः क्रोधादयस्तथैव तत्रैव ब्राह्मणाः क्षत्रिया वैश्याः संगिरंते परस्परं शूद्र
तुल्या भविष्यंति तपःसत्यविवर्जिताः स्वभावाक्रूरकर्माणश्चान्योन्यमभिशंकिताः
भविता रोनरः सर्वे संप्राप्ते युगसंक्षये इत्यादि ब्रह्मपुराणेपि दीर्घकालं ब्रह्मचर्यधा
रणं च कमंडलोः गोत्रान्मातृसपिंडाच्च विवाहो गोवधस्तथा नराश्वमेधौ मद्यं च क
लौवर्ज्यौ द्विजातिभिः कृतेरपि देवराच्च सुतोत्पत्तिर्दत्ता कन्या न दीयते न यज्ञे गो
वधः कार्यः कलौ न च कमंडलुरिति आदिपुराणेपि ऊढायाः पुनरुद्वाहं ज्येष्ठां
शं गोवधस्तथा कलौ पंच न कुर्वीत भार्यायां भ्रातृयोजनम् बालिका क्षतयोन्या
श्च वरेणान्येन संस्कृतिः कन्यानामसवर्णानां विवाहश्च द्विजन्मनः आततायि द्वि
जाग्र्याणां धर्मयुद्धेन संहृतिः द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः सत्रदी
क्षा च सर्वेषां कमंडलुविधारणं महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे सौत्राम
ण्यामपि सुराग्रहस्य न तु संग्रहः अग्निहोत्रहवन्याश्च लेहो लीढापरिग्रहः वान
प्रस्थाश्रमस्यापि प्रवेशो विधिचोदितः वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा

युगे युगे तु सामर्थ्यं शेषं मुनि विभाषितम् पराशरेण चाप्युक्तं प्रायश्चि
त्तं विधीयते ३४

भाषितं तथाचारस्य पर्वशः पठ्यते कृतन्नाम युगं श्रेष्ठं यत्र धर्मः सनातनः कृतमे
व न कर्त्तव्यं तस्मिन्काले युगोत्तमे न तत्र धर्माः सीदंति न क्षीयंति च वै प्रजाः ततः कृ
तयुगं नाम कालेन गुणतां गतं कृते युगे चतुष्पाद श्चातुर्वर्ण्यस्य शाश्वतः एतत्कृ
तयुगं नाम त्रैगुण्यपरिवर्जितम् पादेन ह्रस्यते धर्मो रक्ततां याति चाच्युतः ज्ञान
प्रवृत्ताश्च ततः क्रियाधर्मपरायणाः ततो यज्ञाः प्रवर्त्तंते धर्माश्च विविधाः क्रियाः
स्वधर्मस्थाः क्रियावंतो जनास्त्रेतायुगे भवन् विष्णुः पीतत्वमायाति चतुर्द्धा वेद
एव च सत्यस्यैवेह विभ्रंशो सत्ये कश्चिद्व्यवस्थितः सत्यात्प्रच्यवमानानां व्याधयो
बहवो भवन् कामाश्चोपद्रवाश्चैव तथा दैवतकारिताः कामकामाः स्वर्गकामाय
ज्ञोस्तन्वंति चापरे एवं द्वापरमासाद्य प्रजाः दीयंत्यधर्मतः पादेनैकेन कौंतेय
धर्मः कलियुगे स्थितः वेदाचाराः प्रणश्यंति धर्मयज्ञक्रियास्तथा ईतयो व्यधम

प्रायश्चित्तविधानं च विप्राणां मरणान्तिकं संसर्गदोषस्तेनाद्यैर्महापातकनिष्कृतिः
वरातिथिपितृभ्यश्च पशूपाकरणक्रिया दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः सव
र्णानां तथाऽदुष्टैः संसर्गः शोधनैरपि अयोनौ संग्रहो वृत्ते परित्यागो गुरुस्त्रियाः अ
स्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च शामित्रं चैव विप्राणां सोमविक्रयणं तथा षड्
भक्तानशनेनान्नहरणं द्विजकर्मणः शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणां भो
ज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता आप
द्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा प्रजार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया बलात्कारादिदुष्टस्त्रीसंग्रहो विधिनो
दितः यतेस्तु सर्ववर्णेभ्यो भिक्षाचर्या विधानतः नवोदके दशाहं च दक्षिणा गुरुचो
दिता ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च भृग्वग्निपतनैश्च वृद्धादिमरणं
तथा गोतृप्तिशिष्टपयसि शिष्टैराचमनक्रिया पितापुत्रविरोधेषु साक्षिणां दंडक
ल्पना यतेः सायंगृहस्थत्वं सूरिभिस्तत्त्वदर्शिभिः एतानि लोकगुप्त्यर्थं कलेरादौ महा
त्मभिः निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः समयश्चापि साधूनां प्रमाणं वे

पा॰मा॰
४२

द्वन्द्ववेदिति तदुक्रमापन्नत्वेनापि धर्मज्ञसमयः प्रमाणं वेदाश्चेति एवमन्यदप्युदाहा
र्य्यं यथा मुनिभिस्तत्तद्युगसामर्थ्यं विधिनिषेधाभ्यां विशेषेण भाषितं तथा विहिता
तिक्रमनिषिद्धाचरणयोः प्रायश्चित्तमपि विवेरं तनेन पराशरेण लोके पठ्यते लिखेदुप
राशरस्य वचनानि जरायुजोऽण्डजश्चैव जीवाः संस्वेदजास्तथा अवध्याः सर्वदा वै तेषु
धैः समनुवर्णिते निःक्रियार्थं विबुधानां प्रायश्चित्तं विधीयते अनस्थिशतमेकं
तु यदि ज्ञातौ वियोजयेत् उपोष्येकाहमादध्यात्प्राणायामांस्तु द्वादश त्रिः स्नान
मुदकं कृत्वा तेन स्नात्वा पापात्प्रमुच्यते अस्थिवधेषु छेदनेण प्रायश्चित्तं विधीयते अ
नेन विधिना वापि स्थावरेषु न संशयः कायेन पद्भ्यां हस्ताभ्यामपराधान्समाच
ते चतुर्गुणं कर्म कृते छेदने वा सम्भूषिते कृत्वानुमानसं पापं तथैवैकगुणं स्म
तमिति चकारो याज्ञवल्क्यमन्वादिसमुच्चयार्थः प्रसिद्धा हि तदीयग्रन्थेषु प्रा
यश्चित्ताध्यायाः पराशरग्रहणं कलियुगाभिप्रायं सर्वेष्वपि च कल्पेषु पराशर
स्मृतेः कलियुगधर्मस्य पक्षपातित्वात् प्रायश्चित्तेष्वपि कलियुगविषयेषु प

राम
४२

राशरः प्राधान्येनादरणीयः अतः पराशरमन्वादिप्रोक्तं प्रायश्चित्तं तत्तत्पापपरिहारा
यविदुः सरिषदा विधीयते एतदुक्तं भवति नानामुनिभिस्तत्तद्युगसमर्थस्य प्रायश्चि
त्तस्य प्रपंचितत्वात् तदुभयं पर्यालोच्य निश्चयानिश्चयोर्व्यवस्था कल्पनीया यः पु
रुषो युगसामर्थ्यं मनुस्मृत्यविहितानुष्ठानं प्रमादकृतपापस्य प्रायश्चित्तं वक्तुं श
क्तोऽपि न कुर्यात्तद्विषया एते भ्रूणहत्यापितृस्तस्याः साकन्या वृषली मतेत्यादीनि
निंदावचनानि अशक्तविषये तेषां निंदा न कर्त्तव्येति वचनं अतस्त्ववशो वाग
मेपद्यते अत्यंततयोगयुक्तो गोराजचौरभयादिषु एवंविधेष्वकृत्येषु नित्यश
नोनपापभागिति तस्मान्नैकोपि धर्माधर्मव्यवस्थापकशास्त्रस्य विप्लव इति ॥
नन्वेतत्प्रकारेण युगसामर्थ्यस्याशेषस्यानेकग्रंथपरिचयमंतरेण दुर्बोधत्वा
त्कथं मंदप्रज्ञानामल्पायुषां युगसामर्थ्यानुसारिणश्चातुर्वर्ण्यसमाचारस्य
निर्णय इत्यत आह अहमिति अनुस्मृतस्य सर्वस्य संकल्पाभिधानात् मंद
अहमद्यैव तत्सर्वमनुस्मृत्य ब्रवीमि वः चातुर्वर्ण्यसमाचारं शृणवन्तु
मुनिपुंगवाः २५

17

नामध्येतत्संग्रहं ग्रंथेति कालविलम्बनिषेधात् अल्पाक्षरामध्ययग्रंथे निर्णयः सु
लभः चत्वारोवर्णा आतुर्वर्ण्यं तस्य समाचारोधर्मः आचारशब्दः शीलपर्यायः लौ
किकवृत्तमाचष्टे समीचीनः शिष्टाभिमत आचारोयस्य धर्मस्य कारणत्वेन वर्त्त
ते सोयं यजनयाजनादिकर्मलक्षणो धर्मः समाचारः अत एव चाचारधर्मयो
र्हेतुहेतुमद्भावेन भेदं वक्ष्यति आचारो धर्मपालक इति श्रुतिश्च धर्माचारौ भेदे
न व्यपदिशति यथाचारी तथा भवतीति स्मृत्यंतरे च कर्मवृत्तयोर्भेद आम्ना
यते अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यादिति यद्यपि श्रृणुपु
त्रप्रवक्ष्यामि श्रृण्वंतु मुनिपुंगवा इत्यत्र मन्त्रत्वे पूर्वमेवोदितं तथाप्ययुगमासामर्थ्यप्र
पंचनेनव्यवहितत्वात्तदेव पुनः स्मार्यते अथवा पूर्वोक्तं युगसामर्थ्यस्वरूपविष
यं इदं तु स्ववर्णधर्मविषयमित्यपुनरुक्तिः ३५ वक्ष्यमाणधर्मज्ञानस्य परमपुरु

पराशरमतं पुण्यं पवित्रं पापनाशनम् । चिंतितं
ब्राह्मणार्थाय धर्मसंस्थापनाय च ३६ ॥

पार्थहेतुतां केचुतिकन्यायेनाभिधानं ग्रंथपाठतदर्थज्ञानेप्रशंसति पराशरेति परा
शरेणप्रोक्तं ज्ञानं पराशरमतं तच्चपाठमात्रेणपुण्यप्रदं पुण्यंचद्विविधमिष्टप्राप
कमनिष्टनिवर्त्तकं तदुभयंपवित्रपापनाशनशब्दाभ्यां विवक्ष्यते तदेवग्रंथज्ञातंवि
तितं ग्रथ्यतो विचार्यमितं समस्तवस्तुपुण्यप्रदंभवति ग्रंथविचारस्यप्रयोजनंद्वेधा स्वा
नुष्ठानंपरोपदेशश्च तदुभयंब्राह्मणेत्यादिपदद्वयेनोच्यते ब्राह्मणस्यार्थोब्राह्मण
निमित्तस्वधर्मानुष्ठानमिति यावत् धर्मसंस्थापनंपरेषांधर्मोपदेशेनानुष्ठापनं या
दृग्ग्रंथपाठतदर्थज्ञानयोरपीदृशोमहिमा तदा किमुवक्तव्यं ग्रंथानुष्ठानंपुरुषार्थहे
तुरिति युक्तंचैतत्पराशरस्यपुलस्त्यवसिष्ठप्रसादलब्धवरेणसर्वशास्त्राभिहृदया
भिज्ञानत्वात् तथा विष्णुपुराणे वैरेमहतियद्वाक्याद्गुरोरस्याश्रिताक्षमा त्वयात
स्मात्समस्तानिभवान्शास्त्राणिवेत्स्यतीति संततेर्नममोच्छेदः क्रुद्धेनापियतः
कृतः त्वयातस्मान्महाभागददाम्यन्यमहावरं पुराणसंहिताकर्त्ताभवान्वत्सभ
विष्यति देवतापारमार्थ्यंचयथावद्वेत्स्यतेभवान् प्रवृत्तेचनिवृत्तेचकर्मण्यस्त

सत्यामपि मत्प्रसादात् संदिग्धं तवैव न भविष्यति ततश्च प्राह भगवान्वसिष्ठोस्म
त्पितामहः पुलस्त्येन यदुक्तं ते सर्वमेतत् भविष्यतीति इत्याचारकांडे प्रथमाध्याये
आचारावतारः समाप्तः अथाचारो निरूप्यते यत्पृष्टं चातुर्वर्ण्यसमाचारं किंचिदित्या

चतुर्णामपि वर्णानामाचारो धर्मपालकः आचारभ्रष्टदेहानां भवेद्धर्मः परा
ङ्मुखः ३७ ॥

धारणं वदेति तत्रोत्तरमाह चतुर्णामिति आचारस्यान्वयव्यतिरेकाभ्यामैहिकामु
ष्मिकश्रेयोहेतुत्वमाचारलक्षणं चानुशासनिकपर्वण्यभिहितं आचाराल्लभते चा
युराचाराल्लभते श्रियम् आचारात्कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च दुराचारो हि
पुरुषो नेहायुर्विन्दते महत् त्रसन्ति चास्य भूतानि तथा परिभवन्ति च तस्मात्कुर्यादिहाचा
रं यदीच्छेद्भूतिमात्मनः अपि पापशरीरस्य आचारो हन्त्यलक्षणं आचारलक्षणो ध
र्मः सन्तश्चाचारलक्षणाः साधूनां च यथावृत्तमेतदाचारलक्षणमिति हारीतोपि
स्मरति साधवः क्षीणदोषाः स्युः सच्छब्दः साधुवाचकः तेषामाचरणं यत्तु सदाचा

न

रः स उच्यते मनुरप्याह यस्मिन्देशे य आचारः पारंपर्यक्रमागतः वर्णानां सांतरालानां
स सदाचार उच्यते इति संतः शिष्टास्तेषां स्वरूपमाह भगवान्बौधायनः शिष्टाः खलु
विगतमत्सरा निरहंकाराः कुंभीधान्या अलोलुपा दंभदर्पलोभमोहक्रोधविवर्जि
ता इति आरण्यपर्वणि अक्रुध्यंतो नसूयंतो निरहंकारमत्सराः ऋजवः शमसंप
न्नाः शिष्टाचारा भवंति ते त्रैविद्यवृद्धाः शुचयो वृत्तवंतो यशस्विनः गुरुशुश्रूषवो
दांताः शिष्टाचारा भवंति ते इति अत्र सर्वत्र शिष्टानामभिमतो दयादाक्षिण्यविनया
द्यन्वितो वृत्तिविशेष आचार इत्युक्तं भवति सदाचारश्चोतस्मात्तेव धर्मं परिपा
लयति धर्मविघातिनां लोभक्रोधादीनामभावात् असति त्वाचारे विरोधस
द्भावात्कर्मण्येव न प्रवर्त्तते सकर्यंचित्प्रवृत्तो पि परावर्तेत सोयं धर्मपालक आचा
रश्चातुर्वर्णानां साधारणः ननु किंचित्साधारणं वेदेति धर्मः पृष्टः प्रत्युत्तरं चाचा
रविषयमिति न संगच्छते इति चेन्न नित्यनैमित्तिकयोराचारधर्मयोर्भेदस्य विव
क्षितत्वात् इदानीं ब्राह्मणस्यासाधारणधर्मं दर्शयति षट्कर्मेति॥ यजनयाज

मूलं षट्कर्माभिरतो नित्यं देवतातिथिपूजकः हुतशेषं तु भुंजानो ब्राह्मणो नावसीदति ३८ ॥

पा॰मा॰ ४६

नाध्ययनाध्यापनदानप्रतिग्रहाः षट्कर्माणि तदाह मनुः अध्यापनं चाध्ययनं य
जनं याजनं तथा दानं प्रतिग्रहश्चापि षट्कर्माण्यग्रजन्मन इति अध्यापनं कर्म
पुरोक्तप्रपंचितं एवमाचारसम्पन्नमात्मवंतमदांभिकं वेदमध्यापयेद्धर्मं पुराणा
ङ्गानि नित्यशः संवत्सरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन् हरते दुष्कृतं तस्य शि
ष्यस्य वसतो गुरुः आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः शक्तोऽर्थदो॰
ऽऽप्तः स्वः साधुरध्याप्या दश धर्मतः कृतज्ञश्च तथाद्रोही मेधावी शुभकृन्नरः आ
प्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजातयः इति विष्णुरप्याह नापरीक्षितं याजये
न्नाध्यापयेन्नोपनयेदिति वसिष्ठश्च विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेव
धिष्टेऽहमस्मि असूयकायानृजवेऽयताय न मां ब्रूया वीर्यवती तथा स्यामिति अध्या
पने नियमानाह यमः सततं प्रातरुत्थाय दंतधावनपूर्वकं स्नात्वा हुत्वा च शि॰
ष्येभ्यः कुर्यादध्यापनं नरः इति मनुरपि अध्येष्यमाणं तु गुरुर्नित्यकालमतं
द्रितः अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारयेत् इति अध्येष्यमाणः शिष्यः प्र

राम ४६

ति वेदमुच्चारयिष्यन्न् प्रतिदिनमध्यापनसमाप्तौ विरामोस्त्विति ब्रुवन्तु परमेतत् रात
त्सर्वमभिप्रेत्य श्रुतिराह अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत अत्र प्राभाक
रैर्मन्यते उपनयीतेति नयतेरात्मनेपदस्याचार्य्यकरणे पाणिनिना स्मृतत्वा
त् उपनयनाध्यापनयोरंगांगिरूपत्वेनैककर्तृकत्वात् आचार्य्यत्वकामो
ध्यापनेधिकारी अतएव मनुनाप्यस्मर्य्यते उपनीय गुरुः शिष्यं वेदमध्यापये
द्द्विजः सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षत इति एवं चाध्यापनविधेरस्
त्वितेमति अध्ययनस्य पृथग्विधिर्न कल्पनीयो भविष्यति विहितस्योपन
यनस्याध्यापनमन्तरेणानुपपत्तेरध्ययनस्यार्थसिद्धत्वात् नन्वाध्ययनवि
धौ कल्पनादोषोस्ति कृतस्यैव विधेः सत्वात् स्वाध्यायोध्येतव्य इति श्रुतेः मै
वं अधिकार्य्यश्रवणेन तस्य विधेरनुष्ठापकत्वायोगात् अथोच्यते विश्वजि
न्न्यायेन रात्रिसत्रन्यायेन वाधिकारी परिकल्प्यतां विश्वजिता यजेतेत्यत्र तत्का
म इति नियोज्यविशेषणस्याश्रवणात् अनुष्ठानाप्राप्तौ स्वर्गस्य सर्वैरिष्यमाण

त्वात्सरात्तद्विशेषणत्वेन परिकल्पितः एवमत्र स्वर्गकामो माणवको नियोज्योऽस्तु
रात्रिसत्रे प्रतितिष्ठंति ह वा य एता रात्रीरुपयंतीत्यर्थवादे श्रुतायाः प्रतिष्ठायाः
श्रुत्यंतमश्रुतात्स्वर्गात् प्रत्यासन्नत्वेन प्रतिष्ठाकामोऽधिकारी कल्पितः एवम
त्र पयःकुल्यादिकामोऽधिकारी स्यात् यदृचोऽधीते पयसः कुल्या अस्य पितॄन्स्व
धा अभिवहंति यद्यजूंषि घृतस्य कुल्या यत्सामानि सोमस्य एभ्यः पवते इत्य
र्थवादादिति नैवं पयःकुल्यादेर्ब्रह्मयज्ञविधिशेषत्वान्माणवकस्याप्रतिबु
द्धत्वेन स्वर्गकामत्वासंभवाच्च कथं चित्तं भवेप्यन्योन्याश्रयत्वं दुर्वारं अधीते
स्वाध्याये पश्चादध्ययनविध्यधिगमः तदवगमे चाध्ययनमिति तस्मादध्ययन
स्याध्यापनप्रयुक्तत्वादध्यापनमेव विधीयते नाध्ययनमिति तदेतत्कुरुमतम
न्यवादिनो न तन्मंते अनित्येनाध्यापनेन नित्यस्याध्ययनस्य प्रयोक्तुमशक्य
त्वात् अनित्यं ह्यध्यापनं जीवनकामस्य तत्राधिकारात् तदाह मनुः षण्णां तु क
र्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इ

ति अध्ययनं तु नित्यं अकरणे प्रत्यवायस्य मनुना स्मृतत्वात् योनधीत्य द्विजो वेद
मन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इति अथ स्वविधि
प्रयुक्तमेवाध्ययनं न चान्योन्याश्रयः अध्ययनात्प्रागेव संध्यावंदनादिवि
पित्रादिमुखेन विध्यर्थावगमात् पित्रादिभिर्नियमितत्वात् एतेन माणवकस्य
नाप्रवृत्तत्वदोषोस्ति यद्यपि तैत्तिरीयशाखायां स्वाध्यायोध्येतव्य इति वाक्यस्य
पंचमहायज्ञप्रकरणे पठितत्वात् तु तन्यज्ञविधिरयं तथाप्यशेषस्मृतिषूपन
यनपूर्वकस्याध्ययनस्य प्रपंच्यमानत्वात् मूलभूता श्रुतिरनुमातव्या विवरण
कारस्तु अध्यापयीतेत्यत्र णिजर्थस्य जीवनार्थत्वेन रागतः प्राप्तत्वात् प्रकृत्यर्थ
स्याध्ययनस्य विधेयत्वमिति प्रकृत्य अष्टवर्षो ब्राह्मणमुपगच्छेत् सोधीयीते
ति वाक्यं विपरिणमय्योपपादयामास सर्वथाप्यस्ति नित्यस्वाध्यायाध्ययन
विधिः स्वाध्यायोध्येतव्य इत्येवमात्मकः श्रौतः तथा स्मृतिरपि न कोपि विशेषो वि

पा॰मा॰
४८

विधैर्व्रतैश्च विधिचोदितैः वेदः कृत्स्नोधिगंतव्यः सरहस्यो द्विजन्मनेति अधिगति
रर्थविचारपर्यंतं अध्ययनं तथा च कूर्मपुराणे अध्ययनतदर्थविचारयोरभावे
प्रत्यवायः स्मर्यते योन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजः स वै मूढो न संभाष्यो
वेदबाह्यो द्विजातिभिः नावेदपाठमात्रेण संतुष्टो वै भवेद्द्विजः पाठमात्रावसा-
दीनु पंके गौरिव सीदति योधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ससान्वयः श
द्रसमः पात्रतां न प्रपद्यत इति अध्ययनस्येतिकर्तव्यतामाह याज्ञवल्क्यः गु
रुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः आहूतश्चाप्यधीयीत लब्धं चास्मै निवे
दयेत् हितं चास्याचरेन्नित्यं मनोवाक्कायकर्मभिरिति विष्णुपुराणे उभे संध्ये
रविं भूपतथैवाग्निं समाहितः उपतिष्ठेत्तथा कुर्याद्गुरोरप्यभिवादनम् स्थिते
तिष्ठेद्व्रजेद्याति नीचैरासीत चासने शिष्यो गुरोर्नरश्रेष्ठ प्रतिकूलं न संचरेत्
तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरः स्थितः अनुज्ञातश्च भिक्षान्नमश्नीयाद्गु

यी×

राम
४८

ॠणात्ततः शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः व्रतानि चरता ग्राह्यो वेदस्सकु
न्नवच्छिन्नेति कूर्म्मेपि आप्लुतोध्ययनं कुर्यात् दीक्षमाणो गुरोर्मुखं नित्यमुद्धृतपा
णिः स्यात्साध्वाचारः सुसंयत इति स्वकुलपरंपरागतायाः शाखाया अध्य
यनं तदाह वसिष्ठः पारंपर्य्यगतो येषां वेदस्सपरिबृंहणः तच्छाखाकर्म्म कु
र्व्वीत तच्छाखाध्ययनं तथेति स्वशाखापरित्यागं सम्यग्निषेधति यः स्वशा
खां परित्यज्य पारक्यामधिगच्छति स शूद्रवद्बहिष्कार्य्यः सर्वकर्मसु सा
धुभिः स्वीयशाखोज्झितायेन ब्राह्मणेनोक्तेन तपः अज्ञस्त्वेव स विज्ञेयः स
द्भिर्नित्यं विगर्हित इति स्वशाखाध्ययनपूर्वकं चान्यशाखाध्ययनं तेनैवा
ङ्गीकृतं अधीत्य शाखामात्मीयां परशाखां ततः पठेदिति माध्यंदिनीय
शाखायाः सर्वसाधारणत्वं च स्मरणाह माध्यंदिनीयायाः शाखा सर्वसाधा
रिणी स्मृतेति वेदवत्कर्म्मशास्त्रमधीयीत तदाह बृहस्पतिः सांगं दंगादिके
श्रेके संस्कृत्य तनयं पिता वेदमध्यापयेत्स्वशाखाच्छाखोक्तमन्वादिकं तथा त्रा:

पा.मा.
४९

28

त्वगो वेदमूलः स्याच्छ्रुतिस्मृतिसमः स्मृतः सदाचारस्य वतथात्रेयमेतत्त्रिकं सदा
द अधीत्य चतुरो वेदान् सांगोपांगपदक्रमान् स्मृतिहीना न शोभंते चंद्रहीनेव
शर्वरीति अर्थाध्ययनेन पंचविधो वेदाभ्यास उपलक्षितः तदाह दक्षः वेदस्वी
करणं पूर्वं विचारोऽध्ययनं जपः तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधेति
हारीतोऽपि मंत्रार्थज्ञो जपन्जुह्वन्तथैवाध्यापयन्द्विजः स्वर्गलोकमवाप्नो
ति नरकं तु विपर्यय इति गुरुमुखादेवाध्येतव्यं न तु लिखितपाठः कर्त्तव्यः
तदाह नारदः पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ भ्राजते न सभामध्ये
जारगर्भ इव स्त्रिया इति अध्ययने वर्जनीयमाह मनुः नाविस्पष्टमधीयीत
न शूद्रजनसन्निधौ न निशांते परिश्रांतो ब्रह्माधीत्य पुनः स्वपेदिति नारदो
पि हस्तहीनस्तु योधीते स्वरवर्णविवर्जितः ऋग्यजुःसामभिर्दग्धो वियो
निमधिगच्छतीति हस्तयुक्तस्तु योधीते स्वरवर्णसमन्वितः ऋग्यजुःसाम
भिः पूतो ब्रह्मलोके महीयते व्यासोपि अनध्यायेष्वधीतस्य यच्च मंदस्य न

राम
४९

त्विजौ प्रतिग्रहनिमित्तं च नरकाय न तु व्यात इति इत्यध्ययनाध्यापनयोः प्रकरण
म् अथानध्यायाः ते च द्विविधा नित्या नैमित्तिकाश्च तत्र नित्यानाह हारीतः प्र
तिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः श्वोनध्याये च शर्वर्यां नाधीयीत कदाच
नेति नैमित्तिकानाह याज्ञवल्क्यः श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिःस्व
ने अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके देशे अशुचावात्मनी च विद्युत्स्तनि
तविप्लवे भुक्त्वार्द्रपाणिरंभोन्तरर्द्धरात्रेतिमारुते पांशुप्रवर्षे दिग्दाहे संध्या
नीहारभीतिषु धावतः प्रतिगंधे च शिष्टे च गृहमागते खरोष्ट्रयानहस्त्यश्व
नौवृक्षेरिणरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुरिति अन्ये
त्वनध्यायास्तत्रतत्र स्मर्यंते तथाच नारदः अयने विषुवे चैव शयने बोधने
हरेः अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिष्विति मन्वादयो मत्स्यपुराणे
भिहिताः आश्वयुक्शुक्लनवमी कार्त्तिकी द्वादशी तथा तृतीया चैत्रमासस्य
तथा भाद्रपदस्य च फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा आषाढस्यापि

पा॰मा॰
५०

दशमी माघमासस्य सप्तमी श्रावणस्याष्टमी कृष्णा आषाढस्यापि पूर्णिमा कार्त्ति
की फाल्गुनी चैत्री ज्येष्ठ पंचदशी सिता मन्वंतरादयश्चैते दत्तस्याक्षयकारकाः इति
युगादयो विष्णुपुराणे दर्शिताः वैशाखमासस्य च या तृतीया नवमी सा कार्त्तिक
शुक्लपक्षे नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे इति कूर्म
पुराणे उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं अष्टकासु त्वहोरात्रमृत्वंता
सु च रात्रिषु मार्गशीर्षे तथा पौषे माघमासे तथैव च तिस्रोऽष्टकाः समाख्याता
ः कृष्णपक्षे तु सूरिभिरिति गौतमोपि कार्त्तिकी फाल्गुन्याषाढी पूर्णमासीति
स्रोऽष्टका त्रिरात्रमिति उक्तपूर्णमासीरारभ्य त्रिरात्रं तथा तिस्रोऽष्टकाः सप्त
म्यादयः तास्वपि त्रिरात्रमनध्ययनमित्यर्थः पैठीनसिः कृष्णे भवास्तिस्रोऽष्ट
का मार्गशीर्षप्रभृतिष्वेक इति आपस्तंबश्च उपाकर्मारभ्य मासं प्रदोषेऽन
नध्यायमाह श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयेतेति
प्रदोषशब्देनात्र पूर्वरात्रिर्विवक्षिता त्रयोदश्यादिप्रदोषेष्वपि नाधीते तथा
यी

राम
५०

चक्षुष्यं मेधाकामस्तु योदश्यां सप्तम्यां च विशेषतः चतुर्दश्यां च प्रदोषेषु न स्मरेन्न
च कीर्तयेदिति तृतीयाचतुर्थ्यां दिति यद्वै विघ्नं प्रजापतिः षष्ठी च द्वादशी चैव कृष्ण
ष्ट्राशेन नाडिका प्रदोषे न त्वधीयीत तृतीया नवनाडिकेति याज्ञवल्क्योपि अहं
प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये त
था संध्यागर्जितनिर्घातभूकंपोल्कानिपातने समाप्य वेदं द्युनिशमारण्यक
मधीत्य च पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ऋतुसंधिषु भुक्त्वा च श्राद्धकं
प्रतिगृह्य च पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरे त्वहोरात्रं शक्र
पाते तथोच्छ्रय इति मनुरपि चौरैरुपद्रुते ग्रामे संभ्रमे चाग्निकारिते आकालि
कमनध्यायं विद्यात्सर्वाद्भुतेषु चेति कूर्मपुराणेपि श्लेष्मांतकस्य छायायां
शाल्मलेर्मधुकस्य च कदाचिदपि नाध्येयं कोविदारकपित्थयोरिति उक्ता
नामप्यनध्यायानामपवादमाह मनुः वेदोपकरणे चैव स्वाध्याये चैव नैत्य

केनाप्युक्तो योऽस्त्यनध्यायो होममन्त्रेषु वैदिके वेदोपकरणांगानि नित्यस्वाध्यायो ब्रह्मय
ज्ञः शौनकोऽपि नित्ये जपे च काम्ये च क्रतौ पारायणेऽपि च नानध्यायोऽस्ति वेदानां ग्रहणे
स्मृत इति कूर्मपुराणेऽपि अनध्यायस्तु नांगेषु नेतिहासपुराणयोः न धर्मशास्त्रेष्वन्ये
षु पर्वण्येतानि वर्जयेदिति इत्यनध्यायप्रकरणम् एवमध्ययनाध्यापने सति
कर्त्तव्ये निरूपिते अथ यजनयाजने निरूपयामः तत्र यजनस्य सृष्टिप्रयोजनमाह
भगवान्गीतासु सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष
वोऽस्त्विष्टकामधुक् देवान्भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः
परमवाप्स्यथ इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुं
क्ते स्तेन एव स इति तस्य च यजनस्य सात्विकराजसतामसभेदेन त्रैविध्यं भगवानाह अ
फलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः
अभिसंधाय तु फलं दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्

विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
अश्वमेधके पर्वणि द्विजादिसृष्टेर्यज्ञार्थत्वप्रतिपादनेन यज्ञः प्रशस्यते यजना
र्थं द्विजाः सृष्टास्तारकादिविदेवताः गावो यज्ञार्थमुत्पन्ना दक्षिणार्थं तथैव च सु
वर्णं रजतं चैव पात्रकुंभार्थमेव च इड्यार्थं मधुरूपार्थं वल्ला च केवलस्यति मृ ग्रा
म्यारण्याश्च पशवो नार्यं नेयज्ञकारणादिति तथैतो पि अन्वयव्यतिरेकाभ्यां य
ज्ञमहिमानं दर्शयति यज्ञेन लोका विमला विभांति यज्ञेन देवा अमृतत्वमानुव
न् यज्ञेन पापैर्बहुभिर्विमुक्तः प्राप्नोति लोकान् महतस्य विष्णोः नास्त्ययज्ञस्य लोको
वै नायज्ञो विंदते शुभं अनिष्टयज्ञोऽपूतात्मा नश्यति छिन्नपर्णवदिति यज्ञवि
शेषास्त्वग्निहोत्रादयः तथा च श्रूयते प्रजापतिर्यज्ञानसृजदग्निहोत्रं चाग्निष्टो
मं च पौर्णमासं चोक्थ्यं चामावास्यं चातिरात्रं चेति अग्निहोत्रादीनां संस्कृतैर
ग्निभिः साध्यत्वात्संस्काररमाधानमादावन्नमेयं तत्र प्रजापतिः एवं संस्याधिका

पा.मा.
५२

रीस्यादाहिताग्निर्हुतेसति आदध्यान्निर्हुतोप्यग्निं नित्यपापत्याद्द्विजइति अकर
णेप्रत्यवायः कूर्मपुराणे दर्शितः नास्तिक्यादथवालस्याद्योग्निंनाधातुमिच्छति
यजेतवानयज्ञेन सयाति नरकान्बहून् तस्मात्सर्वप्रयत्नेन ब्राह्मणोहि विशेष
तः आधायाग्निं विशुद्धात्मा यजेत परमेश्वरम् इति श्रुतिश्च कालादि विशिष्ट
माधानं विधत्ते वसन्ते ब्राह्मणोग्निमादधीत वसन्तो वै ब्राह्मणस्यर्तुः स्वएवैन
मृतावाधाय इन्द्रियवान्भवति शरदि वैश्य आदधीत शरद्वै वैश्यस्यर्तुः स्वएवैनम
नावाधाय ब्रह्मवर्चस्वी भवति ग्रीष्मे राजन्य आदधीत ग्रीष्मो वै राजन्यस्यर्तुः स्व
पशुमान् विनमृतावाधाय वतीति आश्वमेधिकेपि वसन्तो ब्राह्मणस्य स्या
दाधेयोग्निस्त्वराधिप वसंतो ब्राह्मणः प्रोक्तो वेदयोनिः स उच्यते अग्न्याधेयं
तु येनाद्य वसंते क्रियते नृप तस्य श्रीर्ब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्द्धते क्षत्रिय
स्याग्निराधेयो ग्रीष्मे श्रेष्ठः स एव वै नृप येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्द्धते श्रीः

श्रेष्ठः=

राम
५२

प्रजाः पशवश्चैव वित्तं चैवक्षत्रं यशः शरदृतौ तु वैश्यस्याधानीयोऽताशनः शरदृतुः
स्वयं वैश्यो वैश्ययोनिः स उच्यते शरद्याधानमेवं वै क्रियते येन पाण्डव तस्यैवाश्रीः
प्रजायुश्च पशवो धनं च वर्द्धन्त इति आधानपूर्वकाश्च यज्ञा दर्शादयः तथा चैवाभि
ष्टः अवश्यं पञ्चालराज्ञी नादधीत दर्शपूर्णमासावाग्रयणोऽन्नमीष्य चक्रतो मे
ष्यजेतेति हविर्गतोऽपि पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांस्तु नित्यशः सोमांस्तु
विधिपूर्वं तु यद्येष्टुमिमम्बरम् नेव गौतमेन दर्शिताः अष्टकापार्वणं श्रा
द्धं श्रावण्याग्रयणी चाश्वयुजीति सप्त पाकयज्ञसंस्थाः अग्निष्टोमोऽत्यग्निष्टो
म उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः अपरांस्तु महा
यज्ञकल्पस्तु देवलो दर्शितवान् अश्वमेधराजसूयपौण्डरीकगोसवाद्या महत्य
ज्ञकल्पतरवस्ते एते सर्वे यज्ञाश्च यथायोगं नित्यनैमित्तिककाम्यभेदेन त्रिविधाः
नित्यं नैमित्तिकं काम्यं त्रिविधं कर्म पौरुषमिति मदालसोक्तेः तत्र यज्ञानां

नित्यत्वे कुथुमशाखायां श्रूयते मंत्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेधा
यां बहुधा संततानि तान्याचरतीयतामिति वाजसनेयिशाखायामपि कुर्वन्नेवे
ह कर्माणि जिजीविषेच्छतं समा इति एतदेव राममग्निहोत्रं जुहुयाद्यावज्जी
वं दर्शपूर्णमासाभ्यां यजेत वसंते ज्योतिष्टोमेन यजेतेति अकरणे प्रत्यवायश्च
नित्यत्वनियामकः तथा चाथर्वणे श्रूयते यस्याग्निहोत्रमदर्शपूर्णमास
मनाग्रयणमतिथिवर्जितं चाहुतमवैश्वदेवमविधिनाहुतमासप्तमांस्तस्य
लोकान्हिनस्तीति तथा चतुर्थ्यन्तरं यस्य पिता पितामहो वा सोमं न पिबेत्स ब्रा
त्य इति जीवनकामनाव्यतिरिक्तगृहदाहादिनिमित्तमुपजीव्य प्रवृत्तं काम्य
तद्यथा वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवतेत्यादयः का
म्यपशवः ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यादयः काम्येष्ट
यः तत्र काम्यानां कामितार्थसिद्धिः फलम् नित्यनैमित्तिकयोस्तु यथोक्त

ष्ठितयोरिंद्रलोकप्रापकत्वमाथर्वणे श्रूयते कालीकरालीचमनोजवा
चसुलोहितायावसुधूम्रवर्णा स्फुलिंगिनीविश्वरुचिश्चदेवीलेलाय
मानाइतिसप्तजिह्वाः एतेषुयश्चरतेभ्राजमानेषुयथाकालंचाहुतयो
ह्याददायंतंनयंत्येताः सूर्यस्यरश्मयोयत्रदेवानांपतिरेकोधिवासः ए
ह्येहीतितमाहुतयः सुवर्चसः सूर्यस्यरश्मिभिर्यजमानंवहंति प्रियां
वाचमभिवदंत्योर्चयंत्य एषवः पुण्यः सुकृतोब्रह्मलोकइति आजन्मास
निकेपि संशुद्धैर्यजमानैश्चऋत्विग्भिश्चतथाविधैः शुद्धैर्द्रव्योपकर
णैर्यष्टव्यमितिनिश्चयः तथाकृतेषुयज्ञेषुदेवानांतोषणंभवेत् तुष्टेषु
देवसंघेषुयज्ञीयज्ञफलंलभेत् देवाःसंतोषितायज्ञैर्लोकान्संवर्द्धयंत्यु
त उभयोर्लोकयोर्देविभूतिर्यज्ञैःप्रदृश्यते तस्माद्यज्ञाद्दिवंयातिअम
रैःसहमोदते नास्तियज्ञसमंदानंनास्तियज्ञसमोविधिः सर्वकर्मसम

38

पा॰मा॰
५४

दृशो देवियज्ञे समाहित इति यदि कथंचिन्नित्यकर्माणि लुप्येरन् तदा तत्स
माधानमाह प्रजापतिः दर्शं च पूर्णमासं च लुप्त्वाथोभयमेव वा एकस्मिन्कृ
च्छ्रपादेन द्वयोरर्द्धेन शोधनं हविर्यज्ञेष्वशक्तस्य तु प्रमध्यैकमादितः प्रा
जापत्येन शुद्ध्येत पाकसंस्थासु चैव हि संध्योपासनहानौ तु तथा स्नानवि
लोपे च होमं नैमित्तिकं शुद्ध्यै जपेदष्टसहस्रकृत् समाप्ते सोमयज्ञा
नां हानौ चांद्रायणं चरेत् अकृत्वा त्वितमं यज्ञे यज्ञानामधिकारतः उप
वासेन शुद्ध्येत पाकसंस्थासु चैव हीति कात्यायनोपि पितृयज्ञात्यये वै
श्वैश्वदेवात्ययेपि च अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा भोजने पति
तान्नस्य चरुर्वैश्वानरो भवेत् विहित[illegible]णापर्याप्तद्रव्याभावेपि नित्यं न
लोपयेदित्याह बौधायनः यस्यानित्यानि लुप्तानि तथैवागंतुकानि च
विपद्यपि न संसर्गं गच्छेत्तु पतितो हि सः तस्मात्कंदैः फलैर्मूलैर्मधुना

राम
५४

अरसेनवा नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदिति नन्वसंपूर्णद्र
व्यसंपत्तावेव सोमयागः कर्त्तव्यः तत्राह मनुः यस्य त्रैवार्षिकं भक्तं पर्याप्तं
भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति यावत्कल्पोपि त्रैवार्षि
काधिकान्नो यः स हि सोमं पिबेद्द्विज इति त्रैवार्षिकान्नाभावे न सोमयागः
अर्वाचीनादर्शादय एव कार्य्याः एतदपि मनुरेवाह प्राक्सौमिकीः क्रियाः
कुर्याद्यस्यान्नं वार्षिकं भवेदिति अल्पधनस्य यज्ञो मनुनापि निषिध्यते
पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः न त्वल्पदक्षिणैर्यज्ञैर्यजेता
ह कथंचन इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजां पशून् हन्त्यल्पदक्षि
णो यज्ञस्तस्मान्नाल्पधनो यजेदिति मत्स्यपुराणे अन्नहीनो दहेद्राष्ट्रं म
न्त्रहीनस्तु ऋत्विजः आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुरिति एवं
च सत्येतानि वचनानि कंदमूलेभ्यादिवचनेन विरुध्येरन्निति चेन्मैवं

एतेषां वचनानां काम्ययागविषयत्वात् संपूर्णानुष्ठानशक्तौ सत्यामेव काम्यं कर्तव्य
मिति षष्ठाध्याये मीमांसितं तथाहि ऐंद्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम
इत्यत्र किं यथाशक्ति प्रयोगेणाप्यधिकारः उत सर्वांगोपसंहारेणेति संशयः नि
त्येषु यथाशक्ति प्रयोगस्य पूर्वाधिकरणे निर्णीतत्वात् काम्येष्वपि तथेति प्राप्ते
ब्रूमः नित्यानामपरित्याज्यत्वात् तत्र यथाशक्ति प्रयोगः अपरित्याज्यानि हि नि
त्यानि जीवनादिनिमित्तवशेन तत्प्रवृत्तेः नैमित्तिं प्रत्यप्रवर्त्तकत्वे नैमित्तिकत्व के
मेव हीयेत कामनानु निमित्तं येनावश्यमिष्टिः प्रवर्त्तयेत् अतो न काम्यस्याप
रित्याज्यत्वं तथा सति फलसिद्ध्यर्थमेव काम्यस्यानुष्ठेयत्वात् फलस्य च कृत्स्नां
गोपकृतप्रधानमंतरेणानिष्पत्तेः यदा कृत्स्नांगानुष्ठानशक्तिस्तदैव काम्य
मनुष्ठेयमिति सिद्धांतः इति यजनप्रकरणम् इत्थं यजनं निरूपितं याज
नेन विधिः श्रूयते द्रव्यमर्जयन्ब्राह्मणः प्रतिगृह्णीयाद्याजयेदध्यापयेद्वा न

चायं नित्यविधिः अकरणे प्रत्यवायादिनित्यलक्षणाभावात् अपि तु काम्यविधिः
द्रव्यार्जनकामस्य तत्राधिकारात् तत्रापि नापूर्वविधिः जीवनोपायत्वेन याजन
स्य प्राप्तत्वात् महेतुत्वाच्च मार्कण्डेयपुराणे दर्शितं याजनाध्यापने शुद्धे तथा शुद्धप्र
तिग्रहः एषा सम्यक् समाख्याता तयं तस्य जीविकेति नापि परिसंख्यानं नित्यप्रा
प्त्यभावात् तस्मात् पक्षे प्राप्तत्वात् नियमविधिरयं सचायं नियमः पुरुषार्थ एव
न तु क्रत्वर्थः द्रव्यार्जनविधानस्य पुरुषार्थत्वे न विप्रतिपत्तिः शास्त्रे विचारितत्वात्
तथाहि द्रव्यप्राप्तिः क्रत्वर्था पुरुषार्था वेति संशयः तत्र पूर्वपक्षः क्रत्वर्थेयं त
था सति नियमस्यार्थवत्त्वात् ब्राह्मणस्य याजनादिना क्षत्रियस्य जयादिना वैश्य
स्य कृष्यादिनेति नियमः स च पुरुषार्थपक्षे नर्थकः स्यात् उपायान्तरेणार्जि
तस्यापि द्रव्यस्य क्षुत्प्रतिघातादिपुरुषार्थसंपादकत्वात् क्रतौ तु नान्यथासि
द्धिरिति अतस्तत्र नियमोऽर्थवानिति प्राप्ते ब्रूमः द्रव्यं हि संपादितं सत् पुरुषं प्रीणा

यति अनन्तस्य पुरुषार्थत्वं प्रत्यक्षं दृष्टं क्रत्वर्थता तु नियमादृष्टस्यानुपपत्त्या कल्प्यते
कॢप्तं चाकॢप्ताद्बलीयः सति च पुरुषार्थत्वे क्रतोरपि भोजनादिवत्पुरुषार्थतया
तदर्थतापि उपपद्यते नियमस्तु पुरुषार्थे व्यर्जनविधौ किंचिद्दृष्टं जनयिष्य
ति क्रत्वर्थत्वादिनो जीवनलोपेन क्रतोरपि न सिद्धेस्तस्मात्पुरुषार्थो याजनादिरि
ति सिद्धं ऋत्विग्भिर्विना याजयितान्यो न कोप्यस्तीति चेन्नैवं आपस्तम्बसूत्रे
षोडशानामृत्विजां वरणमभिधाय याजयितुः सप्तदशस्य पृथग्वरणाभिधानात्
न सदस्यसप्तदशं कौषीतकिनः समामनन्ति स कर्मणामुपद्रष्टा भवति अत्र
एवं वाशिष्ठवंशोत्पन्नस्य सात्यहव्यनाम्नः कस्यचन महर्षेः प्रश्नवाक्ये देवभागस्य
संजयनामकान्ब्राह्मणान्प्रतियाजकत्वं तैत्तिरीयब्राह्मणे श्रूयते वाशिष्ठो
ह सात्यहव्यो देवभागं पप्रच्छ यत्सृंजयान्बहुयाजिनोऽयाजयदिति तथा कौ
षीतकि ब्राह्मणे चित्रनामकं प्रति श्वेतकेतोर्याजकत्वमाम्नातं पित्रो ह वै

43

गार्ग्यायनियं त्यमात्मग्राहलीवर सहपुत्रं श्वेतकेतुं प्रति जिगाय यथा जयेदिति त
स्मादृत्विग्भ्योन्यः सदस्यो याजयिता ऋत्विजो वा याजयितारः स तु सर्वपाप्म
स्ति तस्माद्ब्राह्मणानां संजीवनहेतु याजनं तत्रेतिकर्तव्यतारूपेण कृत्स्नाजिनवा
ससोरन्यतरेणोपवीतत्वं तैत्तिरीयके विधीयते तस्माद्यज्ञोपवीत्येवाधीयी
त याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीयेति मं
त्ररूप्यादिज्ञानं च याजनांगत्वेन छंदोगब्राह्मणे समाम्नायते यो ह वा अ
विदितार्षेयछंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्था
णुं वर्छति गर्तं वा पद्यते वा प्रमीयते पापीयान्भवति यातयामान्यस्य छंदांसि
भवंति अथ यो मंत्रे मंत्रे वेद सर्वमायुरेति श्रेयान्भवति अयातयामान्यस्य
छंदांसि भवंति तस्मादेतानि मंत्रे विद्यादिति ननु कश्चिद्याजनं विदित्वा
तदनुष्ठानवेत्ते स्वाध्यायगायत्र्योर्जप आम्नायते रिच्यत इव वा एष प्रे
व रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वानश्नन् त्रिःस्वा

पा.मा.
५८

ध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं गायत्रीमत्यन्तिरेचयति तथान्यत्रापि कुहेत्वा
लेखकं दंमियो याजयति सरलं यज्ञकर्मनायजेत सोऽरण्यं परेत्य कृच्छ्रं वेदं शोस्वा
ध्यायमेवैवं धियन्नासीतेति नायं दोषः अयाज्ययाजनविषयत्वात् जीवन्
संशयमापन्नस्य प्राणरक्षणार्थमयाज्ययाजनमिति संभाव्यते तथा वाजसने
यिब्राह्मणं प्राणस्यैव सम्राट् कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णातीति तत्र प्रा
यश्चित्तं छंदोगा आमनंति अयाज्ययाजने दक्षिणास्त्यक्त्वा मासं चैत्तु चतुर्थकाले भुं
जानः ज्ञानीत्यनतवाजपेदिति तथा सुमंतुः स्मरति अकृत्याजकः अकृच्छ्रमप
रित्यागात्पूतो भवति अभिशस्तपतितपौनर्भवभूलहत्यप्रक्रान्त्युविशस्त्रका
रतैलिकचाक्रिकध्वजिस्वर्णकारवेशमकषंडकक्लीबकुकिस्वगलमणिकसो
निकव्याधनिषादरजकवरुडचर्मकारास्रभोज्यान्नास्तु प्रतिग्राह्याश्चया
ज्याश्च तथा वा दोषः दक्षिणात्यागाच्च पूर्वोक्तमशितत्वात् तरत्समंदीयं जपेदि
तिविज्ञायत इति तथा बोधायनोऽपि बहुप्रतिग्राह्यस्याप्रतिग्राह्यस्य वा अप्रतिगृह्यापरं वा

रा.म
५८

44

याज्यं याजयित्वा वा पतितस्य वान्नमश्नात्वा तस्य स्मं दीयं जपेदिति अथाऽयाज्ययाजकलक्ष
णं देवलेन दर्शितं यः स्त्रुद्रान्पतितांश्चापि याजयेदर्थकारणात् याजितो वा पुनस्ता
न्मंत्रात्स लोयाऽयाज्ययाजकः इति याजनप्रकरणम् तदेवं याजनं निरूपितं अथ दान
प्रतिग्रहौ निरूप्येते तत्र दानविषया श्रुतिः दानमिति सर्वाणि भूतानि प्रशंसति दाना
न्नातिरयात् दंतदानेन द्विषतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदं
तीति आदित्यपुराणेपि न दानादधिकं किंचिद्दृश्यते भुवनत्रये दानेन प्राप्यते स्व
र्गं श्री दीनेनैव लभ्यते दानेन शत्रून्जयति व्याधिर्दानेन नश्यति दानेन लभ्यते वि
द्या दानेन युवती जनः धर्मार्थकाममोक्षाणां साधनं परमं स्मृतमिति एवं श्रुति
स्मृतिभ्यां प्रशंसापूर्वको दानविधिर्निर्णीतः याज्ञवल्क्यस्तु संक्षेपाद्दानं कथयत्त
दातव्यं प्रत्यहं पात्रे निमित्तेनु विशेषतः याचितेनापि दानतव्यं श्रद्धापूर्वं तु शक्तितः
ति गोभूतिलहिरण्यादि पात्रे दातव्यमर्चिते नापात्रे विदुषा किंचिदात्मनः श्रेय

इच्छन्नेति तयोरन्यतरं स्वरूपविधिः इतरस्तु गुणविधिः मनुरपि दानधर्मे निषेधेन नित्य
नैमित्तिकपौष्टिकं परितुष्टेन भावेन पात्रमासाद्य शक्तित इति बृहस्पतिरपि अदाने वित्त
वैयर्थ्योक्तिपूर्वकं दानं विहितं यस्य वित्तं न दानाय नोपभोगाय देहिनाम् नापि की
र्त्यै न धर्माय तस्य वित्तं निरर्थकं तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषादथ दद्यात्स
म्यक् द्विजातिभ्यः कीर्त्तनानि न कारयेदिति विष्णुधर्मोत्तरे दानाभावे बाधमाह सी
दते द्विजमुख्याय योऽर्थी नेन प्रयच्छति सामर्थ्ये सति दुर्बुद्धिर्नरकायोपपद्यत इति
बृहस्पतिरपि सदाचाराः कुलीनाश्च रूपवन्तः प्रियंवदाः बहुश्रुताश्च धर्मज्ञा याच
मानाः पराङ्मुखाः दृश्यन्ते दुःखिनः सर्वप्राणिनः सर्वदा भुवने अदत्तदानाच्चायाते प
रभोगोपजीविन इति व्यासोपि अदत्तरव्ययमभ्यस्तं नास्ति नास्तीति यत्पुरा तदिदं दे
हि देहीति विपरीतमुपस्थितम् स्कान्देपि देहीति वचनं न तद्बीजं जनेबोधयतीव सः प
दिदं कष्टमर्थित्वं प्रागदानफलं हि तत् शाकेन तिष्ठताधस्मादस्येनोपरितिष्ठता

दातृयाचकयोर्भेदः कराभ्यामेव सूचितः दीयमानं तु यो मोहात् विप्राग्निसुरेषु च
निवारयति पापात्मा तिर्यग्योनिं व्रजेत् स इति श्रुतानां तपो ऽपि मा ददस्वेति यो ब्रूयात्
व्यग्नौ ब्राह्मणेषु च तिर्यग्योनिशतं गत्वा चाण्डालेषु हि जायत इति दानस्वरूपं तत्त्वेति
कर्मकर्तव्यतां च देवलो दर्शयति अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनं दानमित्य
भिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते द्विहेतु षडधिष्ठानं षडङ्गं च द्विपाकवत् चतुष्प्रका
रं त्रिविधं त्रिनाशं दानमुच्यते नाल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहं श्रद्धा भक्ति
श्च दानानां वृद्धिक्षयकरे हि ते धर्ममर्थं च कामं च व्रीडाहर्षभयानि च अधिष्ठानानि
दानानां षडेतानि प्रचक्षते पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् केवलं दानबु
द्ध्या यो धर्मदानं तदुच्यते प्रयोजनमपेक्ष्यैव प्रसंगाद्यत्प्रदीयते तदर्थदानमित्याहु
रैहिकं फलहेतुकं स्त्रीयानमृगयाद्यानां प्रसंगाद्यत्प्रदीयते अनर्हेषु च रागेण
कामदानं तदुच्यते संसदि व्रीडया श्रुत्वा चार्थिभ्यः प्रयाचितः प्रदीयते च यद्दा

नैवोद्योगदानमितिस्मृतं दृष्टात्रिं प्रतीकारायययद्भवेत् दीयते पापकर्तृभ्यो भयदानं तदुच्यते
दाता प्रतिगृहीता च शुद्धा देयं च धर्मयुक् ॥ वकर्मा च षाड्गुद्दीना प्रशस्यते त्रिशुक्लः कृ
शवृत्तिस्वघृणालुः सकलेंद्रियः विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते त्रिशुक्लः
त्रिभिर्माता पित्राचार्यैः शिक्षितत्वेन शुद्धः सौमुख्याद्भिसंप्रीतिरर्थिनां दर्शने तथा
सत्कृतिश्चानसूया च दाने शुद्धे सुदाहृता अनपराधमक्लेशं स्वहस्तेनार्जितं धनं
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते यद्यद्दत्तं भेद्रव्यं यस्मिन्काले च वा पुनः
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा अवस्था देशकालानां पात्रदात्रोश्च
संपदा हीनं वापि भवेच्छ्रेष्ठं श्रेष्ठं वाप्यन्यथा भवेत् दुष्फलं निष्फलं हीनं तुल्यं विपु
लमक्षयं षड्विपाकयुग्दिष्टं षडेतानि विपाकतः नास्तिकस्तेनहिंस्रेभ्यः जारायप
तिताय च पिशुनस्नूराहंतृभ्यां प्रदत्तं दुष्फलं भवेत् महदप्यफलं दानं श्रद्धया परि
वर्जितम् परबाधाकरं दानं स्वल्पमप्यनन्तां व्रजेत् यथोत्तमविधदत्तं वित्तेनाकृ

येनैव तत्तु संकल्प्य देवेभ्यो दानं तत्त्वफलं भवेत् युक्तं षडंगैः सकलैर्दानं स्याद्वि
पुलोदयं अतः कोशवता दत्तं दानमवृत्यनं ब्रजेत् धुवमाजस्रकं काम्यं नित्यं नै
मित्तिकं क्रमात् वैदिको दानमार्गोयं चतुर्द्धा वर्ण्यते बुधैः प्रपारामतडागादि
सर्वकाम्यफलं धुवं तदाजस्रकमित्याहुर्दीयते यद्दिने दिने अपत्यविजयैश्व
र्य स्त्री बालार्थं यद्दिष्यते इच्छासंज्ञं तद्दानं काम्यमित्यभिधीयते कालापे
क्षं क्रियापेक्षं अर्थापेक्षमिति स्मृतं त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितम्
सर्वोत्तमानि चत्वारि मध्यमानि विधानतः अधमानि तु शेषाणि त्रिविधत्वमि
दं विदुः अन्नविद्यावधूग्रामगोभूरुक्माश्वहस्तिनः दानानुत्तमदानानीत्यु
त्तमद्रव्यदानतः विद्याच्छादनावासपरिभोगौषधानि च दानानि मध्यमानी
ति मध्यमद्रव्यदानतः उपानत्प्रेंख्ययानानि छत्रपात्रासनानि च दीपकाष्ठफला
दीनि चंदनं बहुवार्षिकं बहुत्वाद्यजातानां संख्या नैवेह पुनेष्यते अधमान्यव

शिष्टा निःस्वं दानान्यतो विदुः इष्टं दत्तमधीतं च प्रणश्यत्यनुकीर्तनात् श्लाघानुशोच
नाभ्यां वा भग्नतेजो विपद्यते तस्मादात्मकृतं पुण्यं न वृथा परिकीर्तयेत् नित्यनै
मित्तककाम्यविमलाख्याश्चत्वारो दानभेदाः पुराणसारे दर्शिताः सात्त्विका
दिभेदान्भगवानाह दातव्यमिति यद्दानं दीयतेऽनुपकारिणे देशे काले च पा
त्रे च तद्दानं सात्त्विकं स्मृतम् यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते
च परिक्लिष्टं तद्राजसमुदाहृतम् अदेशकाले यद्दानमपात्रेभ्यश्च दीयते
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् इति तत्र फलविशेषो विष्णुधर्मोत्त
रे दर्शितः तामसानां फलं भुंक्ते तिर्यक्त्वे मानवः सदा वर्णसंकरभावेन वा
र्द्धके यदि वा पुनः वाल्ये वा दासभावेन नात्र कार्या विचारणा अतोऽन्यथा तु
मानुष्ये राजसानां फलं भवेत् सात्त्विकानां फलं भुंक्ते देवत्वे नात्र संशय इ
ति तत्र दानपात्रमाह याज्ञवल्क्यः न विद्यया केवलया तपसा वापि पात्रता

यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते इति यमोपि विद्यायुक्तो धर्मशीलः प्रशां
तः क्षान्तो दान्तः सत्यवादी कृतज्ञः स्वाध्यायवान्धृतिमान्लोकशरण्यो दानायस्तो
ब्राह्मणः पात्रमाहुरिति वसिष्ठः किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयं पा
त्राणामधिकं पात्रं शूद्रान्नं यस्य नोदरे इति बृहस्पतिः आगमिष्यति यत्पात्रं
तत्पात्रं तारयिष्यतीति विष्णुधर्मोत्तरे पतनात्त्रायते यस्मात्तस्मात्पात्रं प्रकीर्त्ति
तमिति स्कन्दपुराणे पात्रविशेषोभिहितः प्रथमं तु गुरोर्दानं दद्याच्छ्रेष्ठम
नुक्रमात् ततोन्येषां च विप्राणां दद्यात्पात्रानुसारतः इति गुरोरभावे तत्सुतं त
द्भार्यां तत्सुतां तथा पुत्रं प्रपौत्रं दौहित्रं ग्रन्थं वा तत्कुलोद्भवम् तद्दानातिक्रमे द
त्तं प्रसूताधोगतिप्रदमिति यमोपि सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे प्राधीते
शतसाहस्रमनन्तं वेदपारगे इति प्राधीतः प्राप्ताध्ययन इत्यर्थः संवर्त्तः उत्पत्ति
प्रलयौ चैव भूतानामागतिं गतिम् वेत्ति विद्यामविद्यां च स भवेद्वेदपारग इति

52

पा॰मा॰
६१

शूद्रे समगुणं दानं वैश्ये तद्द्विगुणं स्मृतम् क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृ
तं शूद्रादीनामपि पात्रत्वप्रतिपादनमन्नविषयं कृतान्नमितरेभ्यश्चेति गौ
तमवचनात् व्यासः मातापित्रोश्च यद्दत्तं दत्तं भ्रातृस्वसृषु च जायात्मजेषु य
द्दत्तं सोऽनन्तः स्वर्गसंक्रम इति पितुः शतगुणं दानं सहस्रं मातुरुच्यते अनन्तं
दुहितुर्दानं सोदरे दत्तमक्षयमिति भविष्योत्तरे न केवलं ब्राह्मणानां दा
नं सर्वत्र शस्यते भगिनीभागिनेयानां मातुलानां पितुः स्वसुः दरिद्राणां च ब
धूनां दानं कोटिगुणं भवेत् शातातपोऽपि सन्निकृष्टमधीयानमतिक्रा
मति यो द्विजम् भोजने चैव दाने च दहत्यासप्तमं कुलं महाभारतेऽपि हृत
स्वाहृतदाराश्च ये विप्रा देशविप्लवे अर्थार्थमभिगच्छन्ति तेभ्यो दत्तं महाफ
लमिति अपात्रमाह मनुः न वार्यपि प्रयच्छेत्तु वैडालव्रतिके द्विजे न बक
व्रतिके पापे नावेदविदि धर्मवित् त्रिष्वप्येतेषु दत्तं हि विधिनाप्यर्जितं ध

राम
६१

नं दानुभवित्पनर्थायपरत्रा दानुरेवच यः कारणं पुरस्कृत्य व्रतचर्यां निषेवते पापं कृत्ते
नसंधानार्थं वैजालं नाम तत्कृतम् अधोदृष्टिर्नैः कृतिकः स्वार्थसाधनतत्परः शठो
मिथ्याविनीतश्च वकवृत्तिचरो द्विज इति शातातपोपि न शूद्रे केवलके दत्तं अप्रति
ग्रहं च वा क्वचित् यच्च वाणिजके दत्तं न च तत्प्रेत्य नो इह हेति देवलश्चस्कांदे दर्शितः
देवार्चनरतो विप्रो वित्तार्थी वत्सरत्रयं स वै देवलको नाम हव्यकव्येषु गर्हित इति
वृहन्मनुः पात्रभूतोपि यो विप्रः प्रतिगृह्य प्रतिग्रहं असत्सु विनियुंजीत तस्मै देयं
न किंचन संचयं कुरुते यो नः प्रतिगृह्य समंततः धर्मार्थं लोभयुक्तं च न तं त
स्करमर्चयेत इति विष्णुधर्मोत्तरे परस्थाने वृथा दानमशेषं परिकीर्तितं आरू
ढपतिते चैव अन्यथाप्तैर्धनैश्च यत् व्यर्थमज्ञाललोपानं पतिते तस्करे तथा गुरो
श्चाप्रीतिजनके कृतघ्ने ग्रामयाजके वेदविक्रयके चैव यस्य चोपपतिर्गृहे स्त्री
भिर्जिते च यद्दत्तं व्यालग्राहे तथैव च वृत्तवंधो च यद्दत्तं यद्दत्तं वृषलीपतौ परि
चारके षु यद्दत्तं वृथा दानानि षोडशेति महाभारते पंगंधवधिरा मूकाव्याधि

शालग्रा
वे = देवल
के इति पा
ठः श्रेयान् =

नोपहताश्रये भर्तव्यास्तेभ्यस्तावज्जननुदेयः प्रतिग्रहः पात्रोपेक्षणमपात्रदानं च मनुर्निषे
धति अनर्हते यद्ददाति न ददाति यदर्हते अर्हानर्हापरिज्ञानात् धर्माद्धर्माच्च हीयत इ
ति भविष्योत्तरे देयस्वरूपं च निरूपितं यद्यदिष्टं विशिष्टं च न्यायप्राप्तं च यद्भवेत् तत्तद्गु
णवते देयमित्येतद्दानलक्षणमिति अशेषस्य देयत्वप्राप्तौ विशेषमाह याज्ञवल्क्यः
स्वकुटुंबाविरोधेन देयं दारसुतादृते नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतमिति
बृहस्पतिरपि कुटुंबभक्तवसनाद्देयं यदतिरिच्यत इति शिवधर्मे तस्मात्त्रिभागं वित्त
स्य जीवनाय प्रकल्पयेत् भागद्वयं तु धर्मार्थमनित्यं जीवनं यत इति कुटुंबाविरोधेन
देयमित्युक्तं तस्यापवादमाह व्यासः कुटुंबं पीडयित्वापि ब्राह्मणाय महात्मने दातव्यं भि
क्षवे चान्नमात्मनो भूतिमिच्छतेति देयविशेषेण फलविशेषमाह मनुः वारिदस्तृप्ति
माप्नोति सुखमक्षय्यमन्नदः तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमं भूमिदो भूमिमाप्नो
ति दीर्घमायुर्हिरण्यदः गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमं वासोदश्चंद्रसालोक्य
मश्विसालोक्यमश्वदः अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपं यानशय्याप्रदो भार्या

मैश्वर्यमभयप्रदः धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतं सर्वेषामेव दानानां ब्रह्म
दानं परं स्मृतमिति भविष्योत्तरे पात्रविशेषेण देयविशेषो दर्शितः तथा द्रव्यविशे-
षोऽप्यवस्थात्रविशेषतः आर्त्तानामन्नदानं च गोदानं च कुटुंबिने तथा प्रतिष्ठाही
नानां क्षेत्रदानं विशिष्यते सुवर्णं यातनकानां च विद्यां चैवोर्ध्वरेतसां कन्यां चैवानप
त्यानां दद्यात् गतिमुत्तमा स्कान्दे पि आर्त्तस्य यानं तृषितस्य पानमन्नं क्षुधार्त्तस्य ददो
नरेंद्र दद्याद्विमानेन सुरांगनाभिः संस्तूयमानं त्रिदिवं प्रयाति आंगिरसः देवतानां गु
रूणां च मातापित्रोस्तथैव च पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचिदिति विष्णुध
र्मोत्तरे यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत् दाननिमित्तान्याह शातातपः अयने
द्वे सदा देयं द्रव्यमिष्टं गृहे तु यत् षडशीतिमुखे चैव विमोहे चंद्रसूर्ययोः संक्रांतौ या
नि दत्तानि हव्यकव्यानि दातृभिः तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनीति वृ
द्धवसिष्ठोऽयनानि दर्शयति मृगकर्कटसंक्रांती द्वे तूदग्दक्षिणायने विषुवे च तुलामे
षौ तयोर्मध्ये ततोऽपराः वृषवृश्चिककुंभेषु सिंहे चैव यदा रविः एतद्विष्णुपदं नाम विषु

वाद्धिकं फलं कन्यायां मिथुने मीने धनुष्यतिरवेर्गतिः षडशीतिर्भवेन्नाम षड
शीतिगुणा फलैरिति विष्णुधर्मोत्तरे वैशाखी कार्त्तिकी माघी पूर्णिमा तु महाफ
ला पौर्णमासीषु सर्वासु मासर्क्षसहितासु च दत्तानामिह दानानां फलं दशगु
णं भवेदिति मनुः सहस्रगुणितं दानं भवेद्दत्तं युगादिषु कर्म श्राद्धादिकं चैव
तथा मन्वंतरादिष्विति याज्ञवल्क्यः शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये वि
षुवे शतसाहस्रं व्यतीपाते त्वनंतकमिति भरद्वाजः व्यतीपाते वैधृतौ च दत्तमक्ष
यकं भवेत् विष्णुः दिनक्षये दिनाच्छिद्रे पुत्रजन्मादिचापरे ग्रहादित्यादिग्रहणा
चनक्षत्रैः सहसंगमे विज्ञेयः पुण्यकालोयं ज्योतिर्विद्भिर्विचार्यते तत्र दानादि
कं कुर्यात्सात्मनः पुण्यवृद्धय इति दिनक्षयलक्षणं तु वशिष्ठेन एकस्मिन्सा
वने त्वह्नि तिथीनां त्रितयं यदा तदा दिनक्षयः प्रोक्तः शतसाहस्रकं फलमिति
दिनच्छिद्रस्य तु लक्षणं ज्योतिःशास्त्रे अभिहितम् तिथ्यर्क्षतिथियोगस्य छेदादि
ष्टि पर्वरा॰ सहशौ दिवसाच्छिद्रसमाख्यो प्राह भार्गवः छेदादिकालः कथितः

तिथिकृत्योर्घटीद्वयं नागवह्निसमोपेतं नन्दैस्तत्त्वपलैर्युतं पलैः षोडशभिर्युक्तं नाडि
काद्वितयं युतो वेदादिसमयः प्रोक्तो दाने नैतत्फलप्रदः दानस्य निषिद्धकालमा
ह शंखलिखितौ आहारं मैथुनं निद्रां संध्याकाले तु वर्जयेत् कर्म चाध्यय
नं चैव न च दानप्रतिग्रहाविति स्कंदपुराणे रात्रौ दानं न कर्त्तव्यं कदाचिदपि के
नचित् हरंति राक्षसा यस्मात्तस्माद्दातुर्भयावहं विशेषतो निशीथे तु न कुर्यात्क
र्मशर्मदं अतो विसर्जयेत्प्राज्ञो दानादिषु महानिशामिति तत्र प्रतिप्रसवमाह
देवलः राहुदर्शनसंक्रांतियात्रादेप्रसवेषु च दानं नैमित्तिकं ज्ञेयं रात्रावपि तद्
ष्यत इति तत्र संक्रांतिशब्दो मकरकर्कच विषयः मत्स्यपुराणे संक्रांतिषु रात्रिदाना
दिषु निषेधं प्रक्रम्य मन्त्रोक्ता मकरकर्कटाविति पत्तिदासात् मत्स्यपुराणे दान
स्य प्रशस्ता देशकालविशेषा निर्दिष्टाः प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च
दत्त्वा चाक्षयमाप्नोति नदीषु पुण्यवनेषु चेति तथा व्यासोपि गंगाद्वारे प्रयागे च अ
विमुक्ते च पुष्करे चाहं भासे च मकरे गंगासागरसंगमे कुरुक्षेत्रे गयायां तीर्थेत

पा॰मा॰ ५८

याचामरकंटके एवमादिषु तीर्थेषु दत्तमक्षयतामियादिति इति दानप्रकरणम्
तदेवं सेतिकर्त्तव्यं दानं निरूपितम् अथ प्रतिग्रहो निरूप्यते तत्र श्रौतो विधिः पू
र्वमुदाहृतः द्रव्यमर्जयन्ब्राह्मणः प्रतिगृह्णीयादिति तत्रयाजनेयंवचोपि
र्वमनुक्रान्ता सेयं प्रतिग्रहेपि यथासंभवमनुसंधातव्या तत्र प्रतिग्रहो मनुना
निंदितः प्रतिग्रहः प्रत्यवरः सतु विप्रस्य गर्हित इत्येवम् अस्याभिप्रायः प्र
सत्प्रतिग्रहविषयत्वात् तत्रोपपादितेन वचनेन स्पष्टीकृतम् प्रतिग्रहः कि
यतेऽसद्ग्राद्यप्यत्यजन्मन इति यः प्रतिग्रहोऽसौ चाक्रियते स गर्हितः स्मृतः म
त्प्रतिग्रहस्तु नैनैवास्यानुज्ञातः नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् दो
षो भवति विप्राणां ज्वलनार्कसमा हि ते इति गर्हितादिति पदच्छेदः ग
र्हितप्रतिग्रहाद्व्यप्रतिग्रहस्याविश्रेयान् तथा च याज्ञवल्क्यः प्रतिग्रहस
मर्थोऽपि नादत्ते यः प्रतिग्रहम् ये लोका दानशीलानां स तानाप्नोति पुष्कला
निति तत्र यमः प्रतिग्रहं प्रशंसति प्रतिग्रहाध्यापनयाजनानां प्रतिग्रहं

पृ=

दान ६४

श्रेष्ठतमं वदंति प्रतिग्रहात् शुध्यति जप्यहोमैर्योऽत्यंतु पापं न भजंते वेदा इति मनु
स्मृतेर्हि पर्यायमात् जपहोमैश्चेत्तेनो याजनाध्यापनैः कृतं प्रतिग्रहनिमित्तं तु
त्यागेन तपसैव चेति नायं दोषः द्विजातिभ्यः प्रतिग्रहः प्रशस्तः शूद्रात्प्रतिग्रहो
निंदित इति व्यवस्थायाः सुवचनात् न तु सत्प्रतिग्रहे विक्रियानपि प्रत्यवायः
प्रतीयते प्रतिग्रहात् शुध्यति जप्यहोमैरित्युक्तेः वाढं श्रुत्यैव वेदपारगत्वादि
सामर्थ्यरहितस्य प्रतिग्रहे प्रत्यवायः रातदेवाभिप्रत्यस्कंदे वेदपारगस्य प्रत्य
वायो निवारितः वेदांगपारगो विप्रो यदि कुर्यात्प्रतिग्रहं न स पापेन लिप्येत
पद्मपत्रमिवांभसेति रावणवन्यायोऽध्यायो योजनीयः तथा याज्ययाजनस्य त
काध्यापनस्य प्रतिहेत्वेनावाप्तत्वं स्वस्मिन्नीषदधिकारवैकल्ये सति प्रव
र्तमानस्य स्वत्व / प्रत्यवायः प्रत्याधिकारिणो विहितयाजनाद्धि प्रवृत्तो
न किंचिद्प्यनदिति विवेकः सदसत्प्रतिग्रहो विवेचयति व्यासः द्विजातिभ्यो

60

नृपाः

पा॰मा॰
६५

धनं निवेदयन्त्रब्राह्मणेभ्यो द्विजोत्तमः अपि यात्रानिमित्तेभ्यो न तु शूद्रात्कथंचनेति स
ताम संभवे स्वत्स्वसत्तो विप्रप्रतिग्रहकर्त्तुर्विशति मनेभ्यन्तु ज्ञातः सीदंश्चेत्प्रतिगृ
ह्णीयाद्ब्राह्मणेभ्यस्ततो नृपात् ततस्तु वैश्यशूद्रेभ्यः शंखलिखितवचने यथेति
शूद्रप्रतिग्रहे विशेषमाहांगिराः यत्तु राशीकृतं धान्यं खले क्षेत्रे यथाभवे
त् शूद्रादपि गृहीतव्यमित्यांगिरसभाषणमिति तत्र विशेषान्तरमाहव्या
सः कुटुंबार्थे तु सच्छूद्रात्प्रतिग्राह्यमयाचितं कल्पवर्थमात्मने चैव नहि
याचेत कर्हिचिदिति मनुरपि नयज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित्
यजमानोपि भिक्षित्वा चांडालः प्रेत्य जायत इति असत्प्रतिग्रहेपि चितोव
स्याविशेषः कल्पतरावुदाहृतः दुर्भिक्षे तु कृतो नाप्ते कुटुंबे सीदति तु
धा असतः प्रतिगृह्णीयात्प्रतिग्रहमनिंदित इति याज्ञवल्क्योपि आप
द्गतः संप्रतिगृह्णन्भुंजानो पि यतस्ततः नलिप्येतैनसा विप्रो ज्वलनार्कसम

राम
६५

नयदप्रभृतिः

तेन ग्राम्यारण्यापि चापत्सु पक्षहोमो विधीयत इति पक्षहोमेन स्तत्पक्षमध्य आपन्निवृ
त्तौ नष्ट ऋध्वती पुनर्होमः कर्त्तव्यः तदाह मरीचिः पक्षहोमानयोरुत्थानगत्वातस्मादि
वर्जितः होमं पुनः प्रकुर्यात् तु न चासौ दोषमाग्भवेदिति एवं होमम नुतिष्ठतां सीमोल्लं
घने कृते पुनराधानं कर्त्तव्यं तदाह कात्यायनः विहायाग्निं सभार्यायश्चेत् सीमामुल्लंघ्य
गच्छति होमकालात्ययेतस्य पुनराधानमिष्यत इति होमकालात्ययेतु नास्ति पुनराधा
नं तदाह शौनकः प्रोषिते तु यदा पत्नी यदि ग्रामांतरं व्रजेत् होमकाले यदि प्राप्ते न
सा दोषेण युज्यत इति होमद्रव्यमाह स एवं कृतमोदनसक्त्वादि तंडुलादि कृतं कृत
व्रीह्यादि त्वकृतं प्रोक्तमिति हव्यं त्रिधा बुधैरिति हविष्येषु यवा मुख्यास्तदनु व्रीहयः
[illegible] व्रीहियवयोर्दध्ना वा पयसापि वा तदभावे यवागूर्वा वाजुहुयादुदके
नेन [illegible] तदनुसादि च यवानामिव गोधूमा व्रीहि रागमि

६२ 62

वा०मा० १०५

वशालयः आज्यं हव्यम नादेशे जुहोतिषु विधीयते मंत्रस्य देवता यास्तु प्रजापति विति
स्विति विति आहुतिप्रमाणमाह बृहस्पतिः प्रथयाम्यं चतुःषष्टि वाहुतिः परिकीर्त्ति
तातिलानांतु तदर्द्धं स्यात तदर्द्धं स्याद्घृतस्य त्विति बौधायनोपि व्रीहीणां वा यवानां वाष्टा
माहुति [illegible] इति होमप्रकारः स्वगृह्योक्तविधिनाद्रष्टव्यः तदुक्तं गृह्यपरिशिष्टे
स्वगृह्योक्तेन विधिना होमं कुर्याद्यथाविधीति विष्णुरपि बहुशुष्केंधने वाग्नौ सुसमि
द्धे हुताशने विधूमे लेलिहाने च होतव्यं कर्मसिद्धये योनर्चिषि जुहोत्यग्नौ व्यंगारे चैव
मानवः मंदाग्निरामयावी च दरिद्रश्चोपजायत इति एतच्च तालैवानुष्टेयमन्यथा दो
षश्रवणात् दाहांगिनाः स्वामिप्रायकृतं कर्म यत्किंचित्स्नानवर्जितं क्रीडाकर्मेव बाह्
लानां तत्सर्वं निष्प्रयोजनमिति चतुर्विंशतिमते हुतं स्नानं क्रियाहीनं हुतास्त्वरात्ति
नः क्रियाः अपश्यप्नंधको दग्धः पश्यन्नापि च पिंगल इति श्रौतस्मार्तयोरग्निष्वव

राम १०५

स्यामाह याज्ञवल्क्यः कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृहीदायकालाहृते वापि ॥
श्रौतं वैतानिकाग्निष्विति वैतानिका गार्हपत्यादयः यस्य पुनः श्रौतस्मार्ताग्निद्वयं त ॥
स्यानुष्ठानप्रकारमाह भारद्वाजः होमं वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः स्मृती
नां वेदमूलत्वात्स्मार्तं केचित्तु नाविदुरिति शातातपोपि श्रौतं यत्नात्स्वयं कुर्यादन्यो
पि स्मार्तमाचरेत् अशक्तौ श्रौतमप्यन्यत्कुर्यादाचारमंततन इति उक्तस्याग्नेर्नित्य
तामाह गार्ग्यः कृतदारो न चे तिष्ठेत् क्षणमप्यग्निना विना तिष्ठेत वै द्विजो व्रात्यस्त
था च पतितो भवेत् यथा स्नानं यथा भार्या वेदस्याध्ययनं यथा तथैवोपासनं दृष्टं न ति
ष्ठेत्तद्वियोगतः इति सत्यां वैदिकानुष्ठानशक्तौ न स्मार्तमात्रेण पवित्रत्वमित्याह सत्यव
यो वैदिकमनादृत्य कर्म स्मार्तेति हासिकं मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते
प्रधानं वैदिकं कर्म गुणभूतं तथेतरत् गुणनिष्ठाः प्रधानं तु हित्वा गच्छत्यधोगति

64

पा॰मी॰
१०६

मिति अथाऽऽकं प्रतिव्यासेनाह श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं समाचरेत् तत्राप्यश
क्तः कदाचित्सदाचारं लभेच्छुभ इति होमं प्रशंसन्त्यग्निगाः योदद्यात्काञ्चनं मेरुं पृथि
वीं च ससागरां तत्सायं प्रातर्होमस्य तुल्यं भवति वा न वेति इति होमप्रकरणम्॥
तद्देवं संध्यास्नानं जपो होम इत्यादि मूलवचने होमान्तानि कर्माणि निरूपितानि
न्येतान्यष्टधा विभक्तस्य दिनस्य प्रथमभागे समापनीयानि पञ्चापि मध्याह्नस्ना
नादीनि निरूपितानि तत्र यानि तेषां प्रातःस्नानादि प्रसंगेन निरूपितानामाद्ये
भागे न कर्तव्यता दिवसस्याष्टधा विभागं तत्र कर्तव्यविशेषं च दर्शयति दिव
सस्याष्टभागे तु कृत्यं तस्योपदिश्यते द्वितीये च तृतीये च चतुर्थे पंचमे तथा ष
ष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् विभागेष्वेव यत्कर्म तत्प्रवक्ष्याम्यशेषत
इत्यादिना अथ मूलवचनानुसारेण देवतापूजनं वक्तव्यं तत्र पूजनं प्रातर्होमा

ना॰म
१०६

नंतरमितिकेचिंतन्नाह मरीचिः विधायदेवतापूजां प्रातर्होमादनंतरमिति ब्रह्म
यज्ञजपानंतरमित्यन्येतथाच[illegible]तः कुर्वीतदेवतापूजां जपयज्ञादनंतरमिति कू
र्मपुराणेपि निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः स्वैर्मंत्रैरर्चयेद्देवान् पत्रैः
पुष्पैस्तथांबुभिरिति तत्र च पंचयज्ञानंतरं देवपूजां निरूपयिष्यामः प्रातर्होमादनं
तरं भावीनि ब्रह्मयज्ञांतानि मूलवचनान्युक्तान्याह्निकक्रमप्राप्तत्वात्तन्युच्यंते॥
होमानंतरं कृत्यमाह दक्षः देवकार्यं ततः कृत्वा गुरुमंगलवीक्षणमिति मंगलमाह
श्रीदिनचर्यापुराणे रोचनां चंदनं हेम मृदंगं दर्पणं मणिं गुरुमग्निं च सूर्यं च॥
प्रातः पश्येत्सदा बुध इति विष्णुपुराणेपि स्नाचांतस्ततः कुर्यात्पुमान्केशप्रसा॥
धनं आदर्शांजनमंगल्यदूर्वाद्यालंभनानि चेति ब्रह्मपुराणेपि स्वमात्मानं घृ
ते पश्येद्यदीच्छेच्चिरजीवितमिति नारदोपि लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौ

पा.मा. २.७

हुताशनः हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः एतानि सततं पश्येन्नमस्येदर्च॰
येच्च यः प्रदक्षिणं च कुर्वीत तथा ह्यायुर्न हीयत इति मनुरपि अग्निचित्कपिलासत्री
राजाभिक्षुर्महोदधिः दृष्टमात्राः पुनंत्येते तस्मात्पश्येत्तु नित्यशः इति वामनपु
राणेपि होमं च कृत्वालभनं शुभानां ततो बहिर्निर्गमनं प्रशस्तं दूर्वां च सर्पिर्दधि
चोदकुंभं धेनुं सवत्सां वृषभं सुवर्णं मृद्गोमयं स्वस्तिकमक्षतानि चैलं प्रभक्ष्यालं
राकन्यकां च स्वेतानि पुष्पाणि तथा शमी च हुताशनं चंदनमर्कविंबं अश्वत्थवृ॰
क्षं च समालभेत ततश्च कुर्यान्निजजातिधर्ममिति भरद्वाजोपि कं डूपपद्यागो
गं तु कृत्वा वाश्वत्थ वंदने उपगम्य गुरून्सर्वान्विप्रांश्चैवाभिवादयेदिति॥
अभिवादनकाले स्वं नाम कीर्तयेदित्याह स एव अभिवादात्परं विप्रो ज्यायांस
मभिवादयेत् असौनामाहमस्मीति स्वं नाम परिकीर्तयेत् भोशब्दं कीर्तयेदं

राम २.७

तेषु स्वनाम्नोभिवादनमिति अभिवादात्परमित्यभिवादयइतिशब्दमुच्चार्यप॥
श्चादेतन्नामाहमस्मीतिशब्दमुच्चारयेदित्यर्थः अभिवादनप्रकारमाहपलंवः
दक्षिणं वाहुंश्रोत्रसमंप्रसार्य ब्राह्मणोभिवादयीत उरःसमं राजन्यो मध्यसमं वै
श्यो नीचैः शूद्रः प्रांजलिरिति एकहस्तेनाभिवादनं निषेधति विष्णुः जन्मप्रभृति॥
यत्किंचिच्चेतसा धर्ममाचरेत् सर्वं तं निष्फलं याति एकहस्ताभिवादनादिति एत
अ०२ १४ न्नुप्रत्युत्थाय कर्तव्ये तवाहलंवः ऊर्ध्वं प्राणाह्युत्क्रामंति यूनः स्थविर आगते प्रत्युत्था
नाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इति अभिवादितेन वक्तव्यमाशिषमाह मनुः आ॰ युव
युष्मान्भव सौम्येति वाच्यो विप्रोभिवादने अकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरः प्लु
त इति पूर्वं भवतं यस्मात् सोपूर्वाक्षरः पूर्वभवादं च सामय्यां तु व्यं जनं स्वराणां स्वरपू
र्वकत्वासंभवात् अतष्वाभिवादकनामगतो व्यंजनं निक्षेत्यं तिमः स्वरः प्लावनीयः

आकारेसंतिमस्वरमात्रमुपलक्ष्यते अशेषनाम्नामाकरांतत्वाभावात् तथाचसत्ये
वंप्रयोगोभवति आयुष्मान्भवसौम्यदेवदत्ता३इति यस्तुप्रत्यभिवादनप्रकारंनजा
नाति सनाभिवाद्यइत्याह मनुः यनवेत्त्यभिवादस्यविप्रः प्रत्यभिवादनंनाभि
वाद्यःसविदुषायथाशूद्रस्तथैवसइति यस्तुजानन्नपिनप्रत्यभिवादनंकरोति
तस्यदोषोभविष्यपुराणेदर्शितः अभिवादेकृतेयस्तुनकरोत्यभिवादनं आशिषं
वाकुरुश्रेष्ठसयातिनरकान्वहूनिति यमोपि अभिवादंतुयःपूर्वमाशिषंनप्रयच्छ
तियत्दुःकृतंभवेदस्यतस्मात्ज्ञागंप्रपद्यतेतस्मात्पूर्वाभिभाषीस्याच्चंडालस्यापिध
र्मवित्तस्यांपिवेतिवक्तव्यमेवंधर्मोनहीयते स्वस्तीतिव्राह्मणोव्रूयाद्दायुष्मानिति
भूमिपः वर्द्धतामितिवैश्यस्तुशूद्रस्तुस्वागतंवदेदिति मनुरपि व्राह्मणंकुशलंपृ
छेत्क्षत्रवंधुमनामयंवैश्यंक्षेमंसमागम्यशूद्रमारोग्यमेवच परपत्नीतुयास्त्री

रा॰म॰
१०८

आह

स्यादसंबंधाच्चयोनितः तान्नूपाश्रवतीत्येकेंद्रुभगेभगिनीतिचेतिज्यायांसमभिवाद
येदित्युक्तं तत्रकियताकालेनज्यायस्त्वमित्यपेक्षित आपस्तंबः त्रिवर्षपूर्वःश्रोत्रियो
भिवादनमर्हतीति मनुरपि दशाब्दाख्यंपौरसख्यं पंचाब्दाख्यं कलाभृतां त्र्यब्दपूर्वं श्रो
त्रियाणामल्पेनापिस्वयोनिष्विति समानपुरवासिनां दशभिर्वर्षैःपूर्वःसखाभवति त
तोधिको ज्यायान् कलाभृतां गीतादिविद्यावतां पंचाब्दपूर्वःसखाश्रोत्रियाणां वेदा
ध्यायिनां त्र्यब्दपूर्वःसखाभवतिततोधिकोज्यायान् स्वयोनिषुभ्रात्रादिषु स्वल्पेना
पि वयसापूर्वःसखाभवेत्ततोधिकोभिवाद्यइत्यर्थः नन्वेते मान्याइत्यृत्विगादीनां
याज्ञवल्क्येनपूज्यत्वाभिधानाद्यवीयसामपितेषामभिवादनं प्राप्तमिति चेन्न प्र
त्युत्थानसंभाषणादिनामान्यत्वसिद्धेः अतएवतेषामनभिवाद्यत्वमाह गौतमः ऋ
त्विक्श्वशुरपितृव्यमातुलानांतुयवीयसांप्रत्युत्थानाभिवादनमिति अभिवाद

पा॰मा॰
१०२

नमभिभाषणं तदाह बौधायनः ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्यु
त्थानाभिभाषणमिति एतच्च ब्राह्मणविषयं तथा च शातातपः अभिवाद्यो नमस्कार्यः
शिरसा वंद्य एव च ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदा नाभिवाद्यास्तु विप्रेण
क्षत्रियाद्याः कथंचन ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः अभिवाद्य द्विजः शूद्रं
सचेलं स्नानमाचरेत् ब्राह्मणेनाग्रतं सम्यगभिवाद्य विशुध्यतीति विष्णुरपि स
भासु चैव सर्वास्तु यज्ञे राजगृहेषु च नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेदि
ति गुर्वादीनामुपसंग्रहणमाह गौतमः गुरोः पादोपसंग्रहणं प्रातरिति गुरुकं चापि: रा
पतः स्मरवान्मातृपितृतद्भ्रातृणां पूर्वजानां विद्यागुरूणां तद्गुरूणां चेति उपसं
ग्रहणलक्षणं मनुराह व्यत्यस्तपाणिना कार्यं उपसंग्रहणं गुरोः सव्येन सव्यः स्
स्पृष्टव्यो दक्षिणेन च दक्षिणः इति गुरोः सव्यदक्षिणौ पादौ स्वकीयसव्यदक्षिणा

नाम
१०९

भ्यां हस्ताभ्यां स्प्रष्टव्यौ बौधायनोपि श्रोत्रे संस्पृश्य मनः समाधायाधस्ताज्जान्वोराप
द्भ्यामित्युपसंग्रहणं कुर्यादिति शेषः एतच्च गुरुपत्नीनामपि कार्यं तथा च मनुः॥
गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः असवर्णास्तु संपूज्याः प्रत्युत्थानाभिभाष
णैः भ्रातृभार्योपसंग्राह्या सवर्णा हन्यहन्यपि विशेषात्तूपसंग्राह्या ज्ञातिसंबंधि
योषितः इति एवमविशेषेणोपसंग्रहणे प्राप्ते क्वचिदपवादमाह स एव गुरुप
त्नी तु युवतिर्नाभिवाद्येह पादयोः पूर्णविंशतिवर्षेण गुणदोषौ विजानता अभ्यं
जनं स्नापनं च गात्रोत्सादनमेव च गुरुपत्न्या न कार्याणि केशानां च प्रसाधन
मिति किं तर्हि तत्र कर्तव्यमित्यपेक्षित आह स एव कामं तु गुरुपत्नीनां युवतीनां
युवा भुवि विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् विप्रोष्य पादग्रहणमन्व
हं चाभिवादनं गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्निति अभिवादने

72

पा०मा० ११०

वर्ज्यानाह आपस्तंबः नसोपानद्वेष्टितशिरा अवहितपाणिर्वाभिवादयीतेति श्रं
खेपि नोदकुंभहस्तोभिवादयेत् भैक्षं चरन्नपुष्पान्नहस्तो नाशुचिर्न जपन्न देवपि
तृकार्यं कुर्वन्न शयान इति आपस्तंबोपि तथाविषमगतायगुरवे नाभिवादयेत्तथा
प्रयताय अप्रयतश्च न प्रत्यभिवादयेत् प्रतिवयस्स्त्रियः इति तथान्यत्रसरग्वा हंसमि
त्पुष्पकुशाज्यां बुमृत्तं त्राद्दत्तपाणिकः जपं होमं च कुर्वाणो नाभिवाद्यस्तथा द्विजः इति
पाखंडं पतितं व्रात्यं महापातकिनं शठं नास्तिकं च कृतघ्नं च नाभिवादेत् कथंचन धा
वंतं च प्रमत्तं च मूत्रोच्चारकृतं तथा भुंजानमाचमंतं नाद्दमभिवादेद्द्विजोत्तमः उन्म
त्तं जृंभमाणं च कुर्वंतं दंतधावनं अभ्यक्तशिरसं चैव स्नास्यंतं नाभिवादयेत् स्त्रु
क्यारीणकमनाज्ञातमश्वात्तं विपुमातुलं योगिनं च तपःसक्तं कनिष्ठं नाभिवादयेत्
शालातपोपि उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीं अभिवाद्य द्विजो मोहा

राम ११०

द्दहो मात्रेराग्म्यभ्रातिगुरोः पादोपसंग्रहणमित्युक्तं तत्र कीदृशो गुरुरित्याकांक्षायामा
ह मनुः निषेकादीनि कर्माणि यः करोति यथाविधि संभावयति चान्नेन स विप्रो गुरु
रुच्यते याज्ञवल्क्योऽपि स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छतीति अध्यापनं विप्र
विषयं निषेकादिकं तु सर्ववर्णसाधारणं पितृव्यातिरिक्तानामौपचारिकं गुरुत्वमाह
मनुः अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः तमपीह गुरुं विद्याच्छ्रुतोपक्रिय
या तयेति हारीतोऽपि उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः मातुलः श्वशुरस्त्रा
ता मातामहपितामहौ वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः माता मातामह
ही गुर्वी पितुर्मातुश्च सोदराः श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियामिति
अत्र पितृमातृग्रहणं तद्वदेतेऽपि मान्या इत्येतदर्थमतएवाहस्म एव अनुवर्त
नमेतेषां मनोवाक्कायकर्मभिरिति व्यासोऽपि मातामहो मातुलश्च पितृव्यः श्वशु

पा॰मा॰
११२

74

योगुरुः पूर्वजः स्त्रीणां नकस्यचिद्गुरुमान्यास्तेगुरुवत्सदा मातृष्वसा मातुलानी श्वश्रू
र्धात्री पितृष्वसा पितामही पितृव्यस्त्री गुरुस्त्री मातृवच्चरेदिति मनुरपि पितुर्भ
गिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसीति
उपाध्यायाद्दशाचार्या आचार्याणां शतं पिता सहस्रं तु पितॄन्माता गौरवेणाति॥
रिच्यत इति यत्तो गुरुः पुरुषस्येह पिता माता च धर्मतः धर्मा गुरुतमा तावन्मा
तागुरुतमा ततः तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात् अभावे बीजिनो
माता तदभावे तु पूर्वज इति पुराणवचनं तु निषेकादि समस्तसंस्कारपूर्वका
ध्यापकपितृविषयं अन्यथा माता नैव गरीयसीति वचनं विरुध्येत तत्स्यागरी॥
यस्त्वमुपपादयति व्यासः मासान्दशोदरस्थं यात्वा शूलैः समाकुला
वेदना विविधैर्दुःखै प्रसूयेत विमूर्छिता प्राणैरपि प्रियान्पुत्रान्मन्यते सुत

रा॰म
११२

वत्सलोकस्तस्यांतिः कृतिं कर्तुं शक्नो वर्षशतैरपीति उपाध्यायाद्दशाचार्य इतियदुक्तं
तत्रोपाध्यायाचार्ययोर्लक्षणमाह मनुः एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः योऽध्या
पयति वृत्त्यर्थमुपाध्यायं स उच्यते उपनीय च यः शिष्यं वेदमध्यापयेद्द्विजः सकल्पं सर
हस्यं च तमाचार्यं प्रचक्षते इति ज्ञानाचार्योपि पितृमातृभ्यामपेक्षया गरीयानेव तदाह
स एव उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च
शाश्वतमिति यस्तु वालोपि वृद्धमध्यापयति सोपि तस्य गरीयानित्याह स एव वालो
पि विप्रो वृद्धस्य पिता भवति मंत्रदः अध्यापयामास पितॄन् शिशुरांगिरसः कविः पु
त्रका इति होवाच ज्ञानेन परिगृह्य तान् ते तमर्थमपृच्छंत देवानागतमन्यवः देवाश्चै
तान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् अज्ञो भवति वै वालः पिता भवति मंत्रदः अ
ज्ञो हि वालइत्याहुः पितेत्येव च मंत्रदः न हायनैर्न पलितैर्न वित्तैर्न च बंधुभिः

मा॰

अध्यय आङ्गिवेधर्मे योनूचानः स नो महानिति तथाच विष्णुः बाले समानवयसि अध्याय
के गुरुवद्वर्तेतेति ज्येष्ठभ्रातर्यपि गुरुवद्वर्तितव्यमभिहितं पुराणसारे ज्येष्ठो भ्रा
तापितृसमो मृते पितरि भ्रातरः कनिष्ठास्तं नमस्येरन् सर्वे छंदोनुवर्तिनः तमेव
चोपजीवेयुर्यथैव पितरं तथेति मनुरपि पितृवत्पालयेत्पुत्रान् ज्येष्ठो भ्राता यवी
यसः पुत्रवच्चापि वर्तेरन् यथैव पितरं तथेति यमगुरावपि तथैत्याह स एव गुरो
र्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेदिति आचार्यानुज्ञामंतरेण मातुलादीन समाव
र्त्तो नाभिवादयेदित्याह स एव न चाविसृष्टो गुरुणा स्वान् गुरून् अभिवादयेदिति स
मावृत्तस्य तु नानुज्ञापेक्षा तदाहापस्तंबः समावृत्तेन सर्वे गुरव उपसंग्राह्याः प्रो
ष्य समागते आचार्य आचार्यसंनिपाते आचार्याये पसंगृह्याचार्यमुपजिघ्रक्षेदि
ति अभिवादनं प्रशंसति स एव अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वा

तस्य वर्द्धंते त्वायुः प्रज्ञा यशो बलमिति इत्यभिवादनप्रकरणं अथ द्वितीयभागकृ
त्यमुच्यते तत्र दक्षः द्वितीये च तथा भागे वेदाभ्यासो विधीयते इति कूर्मपुराणे वेदा
भ्यासं ततः कुर्यात्प्रयत्नाच्छक्तितो द्विजः जपेदध्यापयेच्छिष्यान्धारयेच्च विचारयेत्
अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तम इति वेदाभ्यासं प्रशंसति मनुः वेदमेव
सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ऋषिदेव
मनुष्याणां वेदश्चक्षुः सनातनमिति व्यासोपि नान्यतो जायते धर्मो वेदाद्वैष नि
र्बभौ तस्मात्सर्वप्रयत्नेन धर्मार्थी वेदमाश्रयेदिति याज्ञवल्क्योपि यज्ञानां तपसां
चैव शुभानां चैव कर्मणां वेद एव द्विजातीनां निःश्रेयसकरं परं तथा वेदविहीन
स्य सर्वक्रियावैकल्ये मनुः यथा षंढोऽफलः स्त्रीषु यथा गौर्गवि चाफला य
था ज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफल इति तस्मिन्नेव भागे कर्मांतरमाह दक्षः स

78

पा॰मा॰ मित्रपुष्यकुमारादीनां सत्कलैः समुदाहृतः अथ तृतीयभागकर्तव्यं तत्र तद्धेतुः तृतीये
१२ च तथा भागे पोष्यवर्गार्थसाधनमिति तृतीय भागोपि उपेयादीश्वरं चाथ योगक्षेम
प्रसिद्धये साधयेद्विविधानर्थान् कुटुंबार्थं ततो द्विज इति पोष्यवर्गो दक्षेणादर्शि
तः माता पिता गुरुः भार्या प्रजा दीनः समाश्रितः अभ्यागतोतिथिश्चाग्निः पोष्य
वर्ग उदाहृतः इति पात्रधनसाधने यथावृत्तिकार्यं तथाह मनुः पात्रात्पात्र प्रसि
द्धार्थैः स्वैः कर्मभिरगर्हितैः अक्लेशेन शरीरस्य कुर्वीत धनसंचयमित्यगर्हितानि
कर्माणि अध्यापनादीनि ब्राह्मणस्यैवैतानि न क्षत्रियविशोः तदाह मनुः त्रयो
धर्मा निवर्तंते ब्राह्मणात्क्षत्रियं प्रति अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः
वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिरिति अतो न तयोरध्यापनादिरर्जनोपा
पः वाहं अत एवोपापांतरं तेनैवोक्तं शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषी विश

राम
१२

इतिवणिक्वाणिज्यंपशुःपशुपालनं याज्ञवल्क्योपि प्रधानेत्रवियेकर्मप्रजानां
पदियालनंकुशीदंकृषिवाणिज्यंपशुपाल्यंविशःस्मृतमिति उपायांतवाक्यादृम
नुः सप्तवित्तागमाधर्म्यादायोलाभः क्रयोजयः प्रयोगः कर्मयोगश्च सत्प्रतिग्रहए
वचेतिदायोन्वायागतंधनंलाभोनिधिदर्शनंदायलाभक्रयाश्चतुर्णांवर्णानांजे
पःत्रियस्यैवप्रयोगोवृद्ध्यर्थंधनप्रदानंकर्मयोगः कृषिवाणिज्यप्रयोगकर्मयो
गोवैश्यस्यैवसत्प्रतिग्रहोविप्रस्यैव कूर्मपुराणेपि द्विविधस्तुगृहीज्ञेयःसाधक
श्चाप्यसाधकः अध्यापनेयाजनेचपूर्वस्याहुःप्रतिग्रहं शिलोंछेनाप्युपादद्गृह
स्थःसाधकःस्मृतः असाधकस्तुयःप्रोक्तोगृहस्थाश्रमसंस्थितः शिलोंछेतस्य
कथितेदेवनीयदममर्षिभिः अमृतेनापिजीवेतमृतेनप्रमृतेनवा अयाचितंस्याद
मृतंमृतंभैक्षंतुयाचितमिति मनुरपि ऋतामृताभ्यांजीवेतमृतेनप्रमृतेनवास

पा०म०
११५

त्यानृताभ्यामपि वा न श्ववृत्त्या कथंचन ऋतमुञ्छशिलं ज्ञेयं प्रमृतं कर्षणं स्मृतं सत्यानृतं तु वाणिज्यं तेन चैवोपजीव्यते सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेदिति याज्ञवल्क्योपि कुसूलकुंभीधान्यो वा त्र्याहिकोश्वस्तनोपि वा जीवेद्वापि शिलोंछेन श्रेयानेषां परः पर इति शूद्रवृत्तिमाह [illegible] शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाप्यथ विक्रयः सर्वपण्यानां शूद्रकर्मेत्युदाहृतमिति याज्ञवल्क्योपि शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत् शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्निति अजीवन्निति च्छेदः हारीतोपि शूद्रधर्मो द्विजादिशुश्रूषा पापवर्जनं कलत्रादिपोषणं कर्षणपशुपालनभारोद्वहनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामृदंगवादनानीति अथ चतुर्थे भागे कर्तव्यमुच्यते तत्र दक्षः चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेदिति मध्याह्नस्नानवि

राम
११५

80

धिस्तप्रसंगात्सर्वमेव निरूपितः अथ ब्रह्मयज्ञविधिः तस्य स्वरूपं तैत्तिरीये ब्राह्मणे
दर्शितं यत्स्वाध्यायमधीयीतैकामृचं यजुः साम वा तद्ब्रह्मयज्ञः संनिष्टा इति
लिंगपुराणेपि स्वशाखाध्ययनं विप्र ब्रह्मयज्ञ इति स्मृत इति तस्य कालमाह बृह
स्पतिः स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः वैश्वदेवावसाने वा नान्यदा नि
निमित्तत इति अत्र वैश्वदेवशब्देन मनुष्ययज्ञात्मकं कर्म विवक्ष्यते यतः कूर्मपुराणे
ऽभिहितं यदि स्यात्तर्पणादर्वाग्ब्रह्मयज्ञः कृतो न हि कृत्वा मनुष्ययज्ञं तु ततः स्वाध्या
यमाचरेदिति श्रुतिरच्छदिर्दर्शमाह ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामा
दच्छदिर्दर्श उदीच्यां प्रागुदीच्यां चोदित आदित्य इति अच्छदिर्दर्शशब्देन देशवि
शेषोऽभिहितः छदिर्गृहाच्छादनं तृणकटादि तद्यत्र न दृश्यते तत्रेत्यर्थः उदित आ
दित्य इत्यनेनोदयात्प्राचीनं कालं निषेधति न तूदयानन्तर्यं विधीयते तस्य हो

पा॰प्रा॰
११५

मकालत्वामनवपिदेशादीतिकर्त्तव्यतामाह अपांसमीपेनियतोनैत्यकंविधिमा
स्थितः सावित्रीमप्यधीयीत गत्वारण्यंसमाहितइति उपवीतादीतिकर्त्तव्यतामाह
स्थातिः वृह्निरणउपवीयोपविश्यहस्तायवीतवनिज्यत्रिराचामेद्भिःपदिमज्यसक
दुपस्पृश्यपाशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभेदिति दर्भाणांमहदुपस्तीर्
र्यापस्थंकृत्वाप्रागासीनःस्वाध्यायमधीयीतेतिचदक्षिणोत्तरौपाणिपादौकृत्वा
सपवित्रमोमितिप्रतिपद्यतइतिचत्रीनेवप्रायुंक्तभूर्भुवःस्वरितिच अथसावि
त्रींगायत्रींत्रिरन्वाहपच्छोर्धर्चशोनवानमितिचग्रामेमनसास्वाध्यायमधीयीत
दिवानक्तंचेतिहस्त्रष्टशौचआक्लेपउतनारण्यपवलउतवाचोदनिष्ठांतुतत्रजनुता
सीनउतशयानोधीयीतेवस्वाध्यायमितिचमध्यंदिनेप्रवलमधीयीतेतिचनमा
वृह्लणाइतिपदिधानीयोत्रिरन्वाहयउपस्पृश्यगृहीतेतिततोयत्किंचिद्ददातिसाद

११५

क्षिणेति दक्षिणतः प्रदक्षिणं कृत्वेत्यर्थः तथा च योगियाज्ञवल्क्यः प्रदक्षिणं समावृ
त्य नमस्कृत्वोपविश्य च दर्भेषु दर्भपाणिभ्यां संहताभ्यां कृतांजलिः स्वाध्यायं तु यथा
शक्ति ब्रह्मयज्ञार्थमाचरेदिति शौनकस्त्वितिकर्तव्यतामाह प्राणायामैर्दग्धदोषः
प्रक्षालितवसनः शुचिः यथाविध्याचम्य आरोहेद्दर्भस्तरणं पवित्रपाणिः कृत्वा
तु उपस्थं दक्षिणोत्तरमिति उदाहृतश्रुतेः सकृदुपस्पृश्यान्यस्यानंतरं सव्यं पाणिं
पादौ प्रोक्षेदित्यध्याहर्तव्यमुत्तरस्मिन्कल्पे वाक्ये तथानुक्रमस्मरणात् पवित्रैराचामति तेन
ऋचः प्रीणातीति पंक्तिः परिमृजति तेन यजूंषि यत् सकृदुपस्पृशति तेन सामानि
यत्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वांगि
रसो ब्राह्मणानीतिहासपुराणानि कल्पान्गाथानाराशंसीः प्रीणातीति दर्भाणामिति
स्कृत्यर्थः शौनकेन दर्शितः प्राग्वोदग्वा ग्रामान्निष्क्रम्याप्स्वाप्लुत्य शुचौ देशे यज्ञोप
वीती:

ह उप

पा.मा. वीत्वाचम्याक्लिन्नवासादर्भेष्वासीनो ब्रह्मतीर्थे प्राक्कूलानां तेषु प्राङ्मुखं विश्रुपोपस्थे॰

११६ कृत्वा दक्षिणोत्तरौ पाणी पादौ संधाय पवित्रवंतौ द्यावापृथिव्योः संधिमीक्षमाणः

संमील्य वा यथायुक्तमात्मानं मन्येत तथा युक्तो धीयीत स्वाध्यायमों पूर्वा व्याहृतयः

सावित्रीमन्वाह पच्छोर्धर्चशः सर्वामिति तृतीयमिति शौनकः स्मृतेः पुत्रः श्रोहूयए

वंनामक हविदित्या हस्मेति श्रुतेः संबंधः ग्रामे मनसाधीयीत उ प्रबलेदरण्ये म॰ त

नसाधीयीत उत वाचा दिवा नक्तं वा तिष्ठन्व्रजन्नासीनः शयानो वा सर्वथा स्वा॰

ध्यायमधीयीतैव न त्वेकान्तसाम्यप्रधानं पठित्वा जप्यमित्यर्थः ब्रह्मयज्ञे जप्याश्चास्य

मेधिके दर्शिताः वेदमादौ समारभ्य पश्चात् पर्युपरिक्रमात् यदधीते त्वहं शक्त्या

तत्स्वाध्यायं प्रचक्षते ऋचं वाथ यजुर्वापि सामगाथामथापि वा इतिहासपुरा॰ राम

णानि यथाशक्ति न हापयेदिति याज्ञवल्क्योपि वेदाथर्वपुराणानि सेतिहासा ११६

ति प्राप्तितः जपयज्ञप्रसिध्यर्थं विद्यां चाध्यात्मिकीं जपेदिति ग्रहणाध्ययनवद्ब्र
ह्मयज्ञाध्ययनस्यानध्यायदिवसेष्वपि त्यागप्राप्तौ मनुना हि वेदोपकरणे चैव स्वा
ध्याये चैव नैत्यके नानुरोधोस्त्यनध्याये होममंत्रेषु चैव हि नैत्यके नास्त्यनध्यायो ब्र
ह्मसत्रं हि तत्स्मृतं ब्रह्माहुति हुतं पुण्यमनध्यायवषट्कृतमिति ब्रह्मैवाहुतिद्र
व्यं तेन हुतं अधीयत इत्यध्यायो याज्यादिमंत्रसमूहः तेन वषट्कारेण च रहितम
तो नास्त्यनध्यायः अतएवस्फूर्तिरध्यायविशेषाननूद्य तेषु जपं प्रशंसति य
एवं विद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वामावास्यायां
स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इति तेष्वनध्यायेष्वध्येतव्य
मेव पठनीयं तदाहापस्तंबः अथ यदि वातो वा वायात्स्तनयेद्वा विद्योतेत वा स्फूर्ज्ये
देकामृचमेकं वा यजुरेकं वा सामाभिव्याहरेदिति ग्रामांतदेशयोरप्यचित्त्वे ब्रह्मयज्ञो

वर्त्तनीयः तथा च श्रुतिः तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माशुचिर्यद्देशइति ॥
ब्रह्मयज्ञं प्रशंसति श्रुतिः उत्तमं नाकमधिरोहतीति उत्तमः समानानां भवति यावंतं॥
ह वा इमां वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति तावंतं नाकं जयति भूयांसं चाक्षय्यं वाप —
मृत्युं जयति ब्रह्मणः सायुज्यं गच्छतीति याज्ञवल्क्योपि यं यं क्रतुमधीयीत तस्य तस्याप्नु
यात्फलं त्रिर्वित्तपूर्णां पृथिवीदानस्य फलमश्नुत इति इति ब्रह्मयज्ञप्रकरणम् अथ
तर्पणं तत्र वसिष्ठः ऋक्सामाथर्ववेदोक्तान् जप्यान्मंत्रान्यजूंषि च जप्त्वा चैवं ततः
कुर्याद्देवर्षिपितृतर्पणमिति बृहस्पतिरपि ब्रह्मयज्ञप्रसिध्यर्थं विद्यां चाध्यात्मि॥
कीं जपेत् जप्त्वाथ प्रणवं चापि ततस्तर्पणमाचरेदिति विष्णुपुराणेपि शुचिवस्त्रधरः
स्नातो देवर्षिपितृतर्पणं तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः त्रिरपः प्रीणना
र्थाय देवानामपवर्जयेत् तद्वदृषीणां यथान्यायं सकृच्चापि प्रजापतेः पितृणां प्रीणा॥

नार्घायत्रिमापः पृथिवीयत इति व्यासः एकैकमंजलिं देवाद्येवैन्तु सनकादयः अर्हन्ति पि
तरः स्त्रीस्त्रीस्त्रियश्चैकैकमंजलिमिति आग्नेयपुराणेपि प्रागग्रेषु सुरांस्तर्प्य नमनुष्यांश्
चैवमध्यतः पितॄन्दक्षिणाग्रेषु दद्याद्द्वित्रिजलांजलीनिति अंजलिसंख्यायथाशाखं
व्यवतिष्ठते यत्रशाखायां न संख्यानियमः स्मृतः तत्रविकल्पः तत्रैवव्रत्तसूत्राविन्या
सविशेषो दर्शितः सव्येन देवकार्याणि वामेन पितृतर्पणं निवीतेन मनुष्याणां तर्पणं
संविधीयत इति सव्येनोपवीतेन वामेन प्रातिनिवीतिनेत्यर्थः तथा च शंखलिखितौ
उभाभ्यामपि हस्ताभ्यां प्राङ्मुखो यज्ञोपवीती प्रागग्रैः कुशैर्देवतानां तर्पणं देवतीर्थेन
कुर्यादिति विष्णुरपि ततः कृत्वा निवीतं तु यज्ञसूत्रमतंद्रितः प्राजापत्येन तीर्थेन
मनुष्यांस्तर्पयेत्पृथगिति बौधायनः अथ दक्षिणतः प्राचीनावीती पितॄन्स्व
धानमस्तर्पयामीत्यादि यत उभाभ्यामपि हस्ताभ्यामुदकं यः प्रयच्छति समूढो॰

श्रीः

88

पा·मा· नरकं याति कालसूत्रमथवा कृशोना इति व्याघ्रपादवचनं तच्छ्राद्धादिविषयं अत ए
११८ व कार्ष्णाजिनिः श्राद्धे विवाहकाले च पाणिनैकेन दीयते तर्पणं तूभयेनैव
विधिरेष पुरातन इति एतच्च तर्पणं स्थलस्थो नो जले कुर्यात्तथा च गोभि
लः नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदी
यत इति अत्र स्थलस्थो भूमावेव तर्पणं कुर्वीत न जले द्याविति तथा च विष्णुः
स्थले स्थित्वा जले यस्तु प्रयच्छेदुदकं नरः नोपतिष्ठति यद्वारि पितॄणां तन्निर
र्थकमिति अत्र विशेषमाह हारीतः वासित्वा वसनं शुष्कं स्थले विस्तीर्णं बर्हि
षि केशाश्मस्तु षागाग्रकंटकास्थिसमाकुलं भवेन्महीतलं तस्माद्बर्हिषास्तर
णं तत इति यत्तु कार्ष्णाजिनिनोक्तं देवतानां पितॄणां च जले दद्याज्जलांजलि
मिति तदशुचिस्थलविषयं तथाह विष्णुः यत्राशुचिस्थलं वा स्यादुदके देव

राम
११८

ताःपितॄनूतर्प्ययेत्तुयथाकामंस्तुसर्वं प्रतिष्ठितमितिपात्रविशेषमाहपितामहः हेम
रूप्यमयंपात्रंताम्रकांस्यसमुद्भवं पितॄणांतर्पणेपात्रंमृन्मयंतुपरित्यजेदिति म
रीचिः सौवर्णेनचपात्रेणताम्ररूप्यमयेनवा औदुंबरेणखड्गेनापितॄणांदत्तमक्ष
यमितिदिक्कहस्तेनकुर्यादित्याहसंग्रवंविनारूप्यसुवर्णेनविनाताम्रतिलैस
थाविनामंत्रैश्चदर्भैश्चापितॄणांनोपतिष्ठतइतिस्मृत्यंतरेचखड्गमौक्तिकहस्तेन
कर्तव्यंपितृतर्पणंमणिकांचनदर्भैर्वानाशुद्धेनकदाचनेतिनचात्रसमुच्च
योनापिविकल्पइत्यभिप्रेत्यमरीचिराह तिलानामप्यभावेतुसुवर्णरजतान्वितं
तदभावेनिषिंचेत्तुदर्भैर्मंत्रेणवापुनरिति तिलग्रहणेतुविशेषमाहयोगिया
ज्ञवल्क्यःपयुक्षतंनिषिंचेत्तुतिलान्संमिश्रयेज्जले अतोन्यथातुसव्येन
तिलाग्राह्याविचक्षणेरिति एतद्रोमकप्रदेशाभिप्रायंयथाचदेव

नः सोमसंस्थांस्तिलान्कृत्वा यस्तु तर्पयते पितॄन् पितरस्तर्पितास्तेन कथि देशाम
लेन वेति वर्णभेदेन तिलानां विनियोगविशेषं दर्शयति सख्व प्रवृत्तो स्तु तर्पणं
ये देवान्मनुष्यान्श्वावलैस्तिलैः पितॄन्संतर्पयेत्कृष्णैस्तर्पयन्सर्वतो द्विज इ
ति कूर्मपुराणे देवर्षिपितृतर्पणे विशेषो दर्शितः देवान्ब्रह्मऋषींश्चैव तर्प
येदक्षतोदकैः पितॄन्भक्त्या तिलैः कृष्णैः स्वसूत्रोक्तविधानत इति तिथ्यादिवि
शेषेण तिलतर्पणं निषेधति सप्तम्यां रविवारे च गृहे जन्मदिने तथा भृत्यपु
त्रकलत्रार्थी न कुर्यात्तिलतर्पणमिति पुराणेऽपि पक्षयोरुभयोराजन्सप्त
म्यां निशि संध्ययोः विद्यापुत्रकलत्रार्थी तिलान् पंचसु वर्जयेदिति बौधायन
नोऽपि न जीवत्पितृकः कृष्णैस्तिलैस्तर्पणमाचरेत् सप्तम्यां रविवारे च जन्म
दिवसेषु च गृहे निषिद्धं स तिलतर्पणं तद्धि निर्मवेत् विवाहे चोपनयने चौ

त्र

लेसति यथाक्रमेवर्षमर्धं तदर्धं च नेत्येके तिलतर्पणं तिथितीर्थविशेषेषु का
र्यं प्रेते च सर्वदेति तर्पणं यावत् दर्शयति सत्यवृतः कृतोपवीती देवेभ्यो नि॰
वीती च भवेत्ततः मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रानृषींस्तथा अपसव्यं ततः कृ
तो॰ थ॰ = त्वा सव्यं जान्वन्यं भूतले दर्भपाणिस्तु विधिना प्रेतान्संतर्पयेत्ततः इति याज्ञ न
याज्ञवल्क्योपि ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं वेदांश्छंदांसि देवांश्च
ऋषींश्चैव तपोधनान् आचार्यांश्चैव गंधर्वानाचार्यतनयांस्तथा संवत्सरं
प सावयवं देवीर्वसवस्तथा तथा देवानुगान्नागान्सागरान्पर्वतानपि
सरितोथ मनुष्यांश्च यक्षान्रक्षांसि चैव हीति पिशाचांश्च सुपर्णांश्च भूता
न्यथ पशूंस्तथा वनस्पतीनोषधीश्च भूतग्रामांश्चतुर्विधान् सव्यं जान्वसं
निपात्य पाणिभ्यां दक्षिणामुखः तल्लिंगैस्तर्पयेन्मंत्रैः सर्वान्पितृगणांस्त

पा॰मा॰ १२० याम्यान्तामहांश्च सततं श्रद्धयातर्पयेद्द्विज इति शौनकोपि अग्निर्विष्णुः प्रजापति
रित्यादिर्यजुः इत्यविनांतु आपितर्पणमुक्तं अथ कांडऋषीनेतानुदकांजलिभिः
शुचिः अव्यग्रस्तर्पयेन्नित्यं मंत्रेनेवाष्टनामभिरिति पितृतर्पणं प्रकृत्य पैठीन
सिः अपसव्यं ततः कृत्वा स्थित्वा च पितृदिङ्मुखः पितॄन् दिव्यानदिव्यांश्च पितृती
र्थेन तर्पयेदिति दिव्या वसुरुद्रादित्याः अदिव्याः पित्रादयः योगियाज्ञवल्क्यः व
सुरुद्रांस्तथादित्या नमस्कारसमन्वितानिति तर्पयेदिति शेषः वस्वादीनां
नामानि पैठीनसिना दर्शितानि ध्रुवो धर्मश्च सोमश्च आपश्चैवानिलोनलः प्रत्यू
षश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः अजैकपादहिर्बुध्न्यो विरूपाक्षो थ रैवतः
हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः सावित्रश्च जयंतश्च पिनाकी चापरा
राजितः एते रुद्राः समाख्याता एकादश सुरोत्तमाः इंद्रो धाता भगः पूषा मित्रोथ

९२

म

राम १२१

वरुणोर्यमा अंशुर्विवस्वान् त्वष्टा च सविता विष्णुरेव च एते च द्वादशादित्या दे
वानां प्रवरा मताः एते च दिव्यपितरः पूज्याः सर्वे प्रयत्नतः ततः स्वपित्रादीन् तर्प
येत् तत्र प्रकारमाह पैठीनसिः स्वनाममात्रगोत्रसंप्रदानं पुरुषं प्रति तिलोदकां
जलीन् द्वौ त्रीन् वा चैकं चैव विनिक्षिपेत् योगियाज्ञवल्क्योपि सवर्णेभ्यो जलं देयं नास
वर्णेभ्य एव च गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशः इति नामगोत्रयोर्विशेषमा
हाश्वलायनः प्रमीतं तं ब्राह्मणस्योपनीतं वा त्रियस्य तत्रगृह्यं तं चैव वैश्यस्यदा
सांतं शूद्रजन्मनः चतुर्णामपि वर्णानां पितृणां पितृगोत्रतः पितृगोत्रं कुमारीणा
मूढानां भर्तृगोत्रत इति पितृतर्पणक्रममाह सत्यव्रतः पितृभ्यः प्रत्यहं दद्यात्
तो मातृभ्य एव च ततो मातामहानां च पितृव्यस्य सुतस्य चेति विष्णुपुराणेपि द
द्यात्ते ब्राह्मतीर्थेण कामस्तान् न्याय्यं गुरवे मे मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथान्

यश्च वैमातुलादीनां स्निग्धमित्राय सम्भज इति हारीतोपि पित्रादीन्मात्रादीन्
मातामहादीन् पितृव्यांस्तत्पत्नीः ज्येष्ठभ्रातॄंस्तत्पत्नीः मातुलांस्तत्पत्नी गुर्वीचा
र्योपाध्यायान् सुहृत्संबंधिबांधवान् दृष्ट्वान्नदातृपोषकदिक्षितस्तत्पत्नीस्तर्प
येदिति जीवत्पितृकतर्पणे विशेषमाह योगियाज्ञवल्क्यः कव्यवाडनलः सो
मोयमश्चैवार्यमा तथा अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च यदि स्याज्जी
वत्पितृकस्तान्विद्याच्च तथा पितॄन् येभ्यो वापि पिता दद्यात्तेभ्यो वापि प्रदीयते ए
तांश्चैव प्रमीतांश्च प्रमीतपितृको द्विज इति तर्पयेदिति शेषः अवसानांजलिमा
ह कात्यायनः पितृवंश्या मातृवंश्या ये चान्ये मत्त उदकमर्हंति तांस्तर्पयामीत्य
वसानांजलिं दिति आदित्यपुराणेपि यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्म
नां तेषां तु दत्तमक्षय्यमिदमस्तु तिलोदकं एतन्कुलेषु लुप्तपिंडाः पुत्रदारविवर्जि

ताः तेषां तु दत्तमक्षय्यमिदमस्तु तिलोदकमिति मत्स्यपुराणे आव स्नानं वप
र्यंतं जगत्तृप्यत्विति ब्रुवन् द्विपितृपयोंजलीस्त्रीश्च कुर्यात्संदेपतर्पणमिति यम
तर्पणं तु वक्ष्यमनुनाके दीपोत्सवे चतुर्दश्यां कार्यं तु यमतर्पणं कृष्णांगारचतु
र्दश्यामपि कार्यं सदैव वा यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय काला
य सर्वभूतक्षयाय च उडुंबराय दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय चि
त्रगुप्ताय ते नमः इति तिनि यमस्तु स्कंदपुराणे निरूपिताः दक्षिणाभिमुखो भूत्वा ति
लैः सव्यं समाहितः देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यम इति एवं कुर्वतः फ
लमाह यमः यत्र क्वचन नद्यां हि स्नात्वा कृष्णचतुर्दशी संतर्प्य धर्मराजानं मुच्यते
सर्वकिल्विषैरिति माघशुक्लाष्टम्यां भीष्मतर्पणं कुर्यात्तदाह व्यासः शुक्लाष्ट
म्यां तु माघस्य दद्याद्भीष्माय यो जलं संवत्सरकृतं पापं तत्क्षणादेव नश्यति वै

याघ्रपाद्यगोत्राय सांकृत्यप्रवराय च गंगापुत्राय भीष्माय प्रदास्येहं तिलोदकं अपु
त्राय ददाम्येतज्जलं भीष्माय वर्मणे इति तर्पणप्रकाशे पुराणे दर्शिता एवं यः
सर्वभूतानि तर्पयेदन्वहं द्विजः स गच्छेत्परमं स्थानं तेजोमूर्तिमनामयमिति
अकरणे प्रत्यवायः पुराणे दर्शितः देवताश्च पितॄंश्चैव मुनीन्यो न तर्पयेत् दे
वादीनामृणी भूत्वा नरकं स व्रजत्यपि इति योगियाज्ञवल्क्योपि नास्तिक्यभावा
द्यस्तास्तु न तर्पयति वै पितॄन् पिबंति देहनिःस्रावं पितरोस्य जलार्थिन इति स्मृ
तीतोपि देवाश्च पितरश्चैव कांक्षंति सततां जलं अदत्ते तु निराशास्ते प्रतियांति
यथागतमिति कात्यायनोपि स्नायांपथेच्छेछ्वदानपानैः पयःपिपासुः क्षुधि
तोन्नार्लभं वा लोजनिंत्री जननी च बाले यो क्षिन्नु मांसपुरुषश्च योषा तथा सर्वा
णि भूतानि स्थावराणि चराणि विप्रा उदकमिच्छंति सर्वे स्वदकं कांक्षिणः त

चौ२

तस्मात्सदैवकर्तव्यमकुर्वन्महतैनसायुज्यते ब्राह्मणः कुर्वन् विश्वमेतद्बिभर्ति
हीति अत्र पितृगाथा अपि नः सकुले भूयाद्यो नो दद्याज्जलांजलिं नदीषु बहु
तोयासु शीतलासु विशेषतः इति तर्पणानंतरं वस्त्रनिष्पीडनं कर्तव्यं तदाह
योगियाज्ञवल्क्यः यावद्देवानृषींश्चैव पितृंश्चापि न तर्पयेत् तावन्न पीडयेद्वस्त्रं
यो हि स्नातो भवेद्द्विजः निष्पीडयति यो वस्त्रं स्नानवस्त्रमतर्पिते निराशाः पितरः
नो यांति शापं दत्वा सुदारुणम् इति निष्पीडनं तु स्थले कार्यं न तदुक्तं स्मृत्यंतरे व
स्त्रनिष्पीडितं तोयं श्राद्धे चोच्छिष्टभोजिनां भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत्
त्स्थले इति विष्णुपुराणे आचम्य च ततो दद्यात् सूर्याय सलिलांजलिं नमो वि
वस्वते ब्रह्मन् भास्वते विष्णुतेजसे जगत्सवित्रे शुचये सवित्रे कर्मदायिने इति
तर्पणप्रकरणम् इत्थं मलवचनानुक्रान्ति तर्पणांतानि कर्माणि निरूपिताः

पा॰मा॰
१२३

नि अथ मूलवचनोक्तक्रममाहात्म्यदेवार्चनं निरूप्यते तत्र नरसिंहपुराणे जलदेवं
नमस्कृत्य ततो गच्छेद्गृहं बुधः पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेदिति आग्नेये
यपुराणेपि मंत्रैर्वै सर्ववेदोक्तैः सावित्रैश्चाक्तिकैस्तथा विष्णुं प्रजापतिं वापि शिवं वा
भास्करं तथा तल्लिंगैरर्चयेन्मंत्रैः सर्वदेवास्समाहितः इति कूर्मपुराणेपि ब्रह्माण
मीशं शंकरं सूर्यं तथैव मधुसूदनं अन्यांश्चाभिमतान्देवान् भक्त्याचाक्रोधनो नरः
स्वैर्मंत्रैरर्चयेन्नित्यं पत्रैः पुष्पैस्तथांबुभिः यद्यपि पूर्ववचनव्याख्याने पूजनीयो दे
वस्सकरण्वेति महता प्रबंधेन प्रपंचितं तथापि दर्शनभेदमाश्रित्य विष्णुशंकरा
दिभेदोपन्यासो न विरुध्यते दर्शनभेदश्च पुराणसारे वर्णितः शैवं वा वैष्णवं
शाक्तं सौरं वैनायकं तथा स्कांदं च भक्तिमार्गस्य दर्शनानि षडेव हीति तत्रैव वैष्ण
वदर्शनानुसारी पूजाक्रम आश्वमेधिके निरूपितः स्मरणं पांडवतत्सर्वमर्च्चन

१४

वा

११४
१२३

ऋममात्मनः स्थंडिले पद्मकं कत्वाचाष्टपत्रंसकर्णिकं अष्टाक्षरविधानेनाथवा
वाद्वादशाक्षरैः वैदिके यथवा मे त्रैर्मम स्तक्तेनवापुनः स्थापितं मां ततस्तस्मिन्न
र्चयीत विचक्षणाः पुंकष्ठं चततः सत्यमच्युतं चयुधिष्ठिर अनिरुद्धं च मां प्राज्ञ
वैखानसविदोजनाः अन्येत्वेवं विजानंति मां पाजन्यां च पात्रिकाः वासुदेवं
च पाजेंद्रसंकर्षणम्यथापिवा प्रद्युम्नंचानिरुद्धंच चतुर्मूर्तिं प्रचक्षते एताश्चा
न्याश्चपाजेंद्रसंज्ञाभेदेनमूर्तयः विद्यंतत्पांतवा एवमामेववार्चयेद्बुधः इति
आग्नेयेपि अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः यत्कृत्वामुनयः सर्वेपरं
निर्गुणमाप्नुयुः अग्नौहृदयेसूर्ये स्थंडिले प्रतिमासुवाषट्स्वेतेषुहरेः स
म्यगार्चनंमुनिभिः स्मृतं अग्नौक्रियावतोदेवोहृदिदेवोमनीषिणां प्रतिमास्व
ल्पबुद्धीनांयोगिनांहृदयेहरिः तस्यसर्वगतत्वाच्चस्थंडिलेभावितात्मनोआन

पा॰मा॰
१२५

ष्टुभस्यसूक्तस्यत्रिष्टुवेतस्यदेवतापुरुषोयोगजगद्वीजमृषिर्नारायणःस्मृतःप्रथ
माविन्यसेद्वामेद्वितीयांदक्षिणेकरेतृतीयांवामपादेतुचतुर्थींदक्षिणेन्यसेत् पंच
मींवामजानौतुषष्ठींवैदक्षिणेन्यसेत् सप्तमींवामकट्येतुअष्टमींदक्षिणेतथान
वमींनाभिमध्येतुदशमींहृदयेतथाएकादशींकंठमध्येद्वादशींवामबाहुके
त्रयोदशींदक्षिणेतुतथास्येतुचतुर्दशीं अक्ष्णोःपंचदशींचैवविन्यसेन्मूर्ध्निषो
डशींयथादेहेतथादेवेन्यासंकृत्वाविधानतः न्यासेनतुभवेत्सोपिस्वयमेवज
नार्दनः एवंन्यासविधिंकृत्वापश्चाद्योगंसमाचरेत् सप्तम्यातुततोवासोष्ट
म्यांचोपवीतकंनवम्यांगंधमेवंतुदशम्यांपुष्पकंतथाएकादश्यांतथाधूपं
द्वादश्यांदीपमेवहिनैवेद्यंतुत्रयोदश्यांनमस्कारंचतुर्दशीप्रदक्षिणंपंचद
शीव्रजनेषोडशीतथा स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंतथा कृत्वाषोडश

100

राम
१२५

निर्मंत्रैर्दीपात्पृथ्व्यादीनां यो द्वादशाक्षरं च सर्व्वं जपेद्भक्त्या पौरुषं सूक्तमुत्तमं षण्मासात्सि
द्धिमाप्नोति सेवमेव समर्च्चयन् स्नानं गंधं धूपं दीपं नैवेद्यं च यथार्चनं ब्राह्मणेन न
विना कुर्युर्नैव वा सर्व्व एव हीति ध्येयः सदा सवितृमंडलमध्यवर्त्ती नारायणः स
रसिजासनसन्निविष्टः केयूरवान् मकरकुंडलवान् किरीटी हारी हिरण्मयव
पुर्धृतशंखचक्र इति बौधायनोपि आप्नोति महापुरुषस्याहरहः परिचर्या
विधिं व्याख्यास्यामः स्नात्वा शुचिः शुचौ देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वा
क्षतपुष्पैर्यथालाभमर्च्चयेत् सहपुष्पोदकेन महापुरुषमावाहयेत् ओं भूः पुरु
षमावाहयामि ओं भुवः पुरुषमावाहयामि ओं स्वः पुरुषमावाहयामि ओं भूर्भु
वः स्वः पुरुषमावाहयामीत्यावाह्यायातु भगवान्महापुरुष इत्यथ स्वागतेना
भिनंदति स्वागतमनुनास्वागतं भगवते महापुरुषाय तदासनमुपक्ल

श्रि

102

पा॰मा॰
१२५

ग्म त्वासयतो भगवान्महापुरुष इत्यत्र कूर्च्चं दद्यां भगवते नोयं कूर्चो दर्भमयस्त्रिवृद्ध
बितस्तु वर्णिसत्तं जयस्वेत्यत्र स्थानानि कल्पयत्यग्रतः शंखाय कल्पयामि सुदर्शना
तो गदायै कल्पयामि वनमालायै कल्पयामि पश्चिमतः श्रीवत्साय कल्पयामि ह
गरुत्मते कल्पयाम्युत्तरतः श्रियै कल्पयामि सरस्वत्यै कल्पयामि पुष्ट्यै कल्पया
मि तुष्ट्यै कल्पयाम्यथ स्नाविद्याः पात्रमभिमंत्र्य त्रिवपः पदिषिच्याप आनीय
सह पवित्रेणादित्यं वर्ज्जयेद्दो मित्यत्नमिति स्नानं स्त्राणी पदा विचक्रम इति
पाद्यं दद्यात्प्रणवेनार्घ्यमथ व्याहृतिभिर्निर्माल्यमपोह्योत्तरतो विष्वक्से
नाय नम इत्यर्घ्यं तस्मापयत्यापो हिष्ठा मयो भुव इति ब्रह्मजज्ञानं वामदेव्य
ऋचीयजुष्या पवित्रेणात्येनाभिः षड्भिः स्नापयित्वा घ्राज्ञि स त्र्पयति केशवं नारा
यणं माधवं गोविंदं विष्णुं मधुसूदनं त्रिविक्रमं वामनं श्रीधरं हृषीकेशं प

राम
१२५

103

द्यनाभं दामोदरं तर्पयित्वा धौतानि वस्त्रयज्ञोपवीताचमनीयानि शुद्धकेन व्याह
हृतिभिर्दत्वा --- व्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य इदं विष्णुर्विच
क्रमे इति गंधं दद्यात् तद्विष्णोः परमं पदमिति पुष्पाणि रवतीत्यक्षतं सावित्र्या
धूपमुद्दीपस्वेति दीपं देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
भगवते महापुरुषाय जुष्टं चरुं निवेदयामीति नैवेद्यमर्पयेत् केशवादिनामभि
र्वा दश पुष्पाणि दद्यात् शंखाय नमः चक्राय नमो गदायै नमो वनमालायै न
मः श्रीवत्साय नमो गरुत्मते नमः श्रियै नमः सरस्वत्यै नमः पुष्ट्यै नमस्तु
ष्ट्यै नम इत्यवशिष्टे गंधमाल्ये व्रीहसरणानले कृत्वा पौषेन म ऋग्यजुः सामाद्यैर्भिः वै २
स्तुतिं कृत्वा नरक्षकवस्त्रं जपित्वा पुरुषसूक्तं वा त्वा अश्रवे भवाम्यनित्यके ॐ भ
र्भुवः स्वः ॐ भगवते महापुरुषाय चरुं मद्वासयामीति च बहुस्वास्योद्वासनकाले ॐ

कृ   त्रा५२

पं॰मा॰ १२६

भूः पुरुषमुद्वासयाम्योंभुवः पुरुषमुद्वासयाम्योंस्वः पुरुषमुद्वासयामीत्युद्वास्य
प्रयातु भगवान्महापुरुषोऽनेन हविषा तृप्तो हविः पुनरागमनाय पुनः संदर्
शनाय चेति प्रतिमास्थाने चरुस्थानावाहनविसर्जनवर्ज्जंसमानेमहत्स्वस्त्य
स्त्य= यनमित्याचक्षते महत्स्वस्त्ययनमित्याह भगवान्बौधायन इति कूर्म्मपुरा
हस्वाः णेपि न विष्णवाराधनात्परं विद्यते कर्म्म वैदिकं तस्मादनादिमध्यान्तं नित्य
माराधयेद्धरिं नच्छिन्नोदितिमंत्रेण सूक्तेन पुरुषेण तु नैताभ्यां सदृशो मंत्रो
वेदेषूक्तश्चतुर्ष्वपि अथवा देवमीशानं भगवन्तं सनातनं आराधयेन्महादेवं
भावपूतो महेश्वरं मंत्रेण रुद्रगायत्र्या प्रणवेनाथवा पुनः ईशानेनाथवा रु
द्रैस्त्र्यंबकेन समाहितः पुष्पैः पत्रैरथाद्भिर्वा चंदनाद्यैर्महेश्वरं तथो नमः
शिवायेति मंत्रेणानेन वा यजेत् नमस्कुर्यान्महादेवमृतं सत्यमितीश्वरं ॥

राम १२६

104

२२

निवेदयीत वाग्मानं यो ब्रह्मा शासितीश्वरं प्रदक्षिणं द्विजः कुर्वीत पंचब्रह्मा
णि वाजपेत् ध्यायीत देवमीशानं यो मम मध्यगतं शिवमिति बौधायनोपि ॥
अथातो महादेवस्याहरहः परिचर्याविधिं व्याख्यास्यामः स्नात्वा शुचौ देशे गो
मयेनोपलिप्य प्रतिकृतिं कृत्वा अक्षतपुष्पैर्यथालाभमर्चयेत् सह पुष्पोदकेन
महादेवमावाहयेत् ओं भूः महादेवमावाहयामि ओं भुवः महादेवमावाहयामि ओं
स्वः महादेवमावाहयामीत्यावाहयात् भगवान्महादेव इत्य स्वागतेनाभि
नंदति स्वागतमनुना स्वागतं भगवते महादेवायेति त्वासनेक्ष्म मास्तां भग
वान्महादेव इत्य कूर्चं ददाति भगवतोयं कूर्चो दर्भमयस्त्रिवृद्धरितः सुवर्ण
स्तं जुषस्वेति त्यत्र स्थानानि कल्पयामि दक्षिणतः स्कंदाय कल्पयामि विनाय
काय कल्पयामि पश्चिमतः शूलाय कल्पयामि महाकालाय कल्पयाम्युत्तरत

पा०मा०
१२७

उमायै कल्पयामि नंदिकेश्वराय कल्पयामीति कल्पयित्वाथ सावित्र्या पात्रमभि
मंत्र्य प्रक्षाल्य त्रिरपः पवित्रमप आनीय सह पवित्रेण दित्यं दर्भायेहोमिति
स्नापयेच्चलं वर्त्विति कट्टेरण पाद्यं दद्यात्स्नानेनार्घ्यमनु व्याहृतिभिर्निर्मील्य
व्यपोह्य स्नातवन्तमक्षुड्डायननम इत्येतेन स्नापयित्वापो हि ष्ठा मयोभुव इति
तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्चन
न इत्येतेनानुवाकेन स्नापयित्वाद्भिस्तर्पयति भवं देवं तर्पयामि शर्वं
देवं तर्पयामीशानं देवं तर्पयामि पशुपतिं देवं तर्पयामि रुद्रं देवं तर्पया
मि उग्रं देवं तर्पयामीति तर्पयित्वाथैतानि वस्त्रयज्ञोपवीतान्याचमनी
यान्युदकं व्याहृतिभिर्दत्वा व्याहृतिभिः प्रदक्षिणमुदकं परिषिंचन्नमस्ते
रुद्र मन्यव इति गंधं दद्यात् सहस्राणि सहस्रश इति पुष्पं दद्यात् ईशानं

न ६

रा.म.
१२७

106

त्वां भुवनानामधिश्रियामीतिचाहुतं दद्यात् सावित्र्याध्यमुद्दीप्य स्वाहेति दीपं दे
वस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां भगवते महादेवाय जुष्टं च
रुं निवेदयामीति नैवेद्यं अष्टाभिर्नामधेयैः ये नष्टो पुष्पाणि दद्यात् भवाय दे
वाय नमः शर्वाय देवाय नमः ईशानाय देवाय नमः पशुपतये देवाय नमो रु
द्राय देवाय नमः उग्राय देवाय नमः भीमाय देवाय नमो महते देवाय नमो व्र
स्रेशो नमो विष्णवे नमः स्कंदाय नमो विनायकाय नमः शूलाय नमो महाका
लाय नमो नंदिकेश्वराय नमः इति चरुं प्रोक्षेणाष्टभिर्नामधेयैर्ये नष्टाहुतीर्जुहो
ति भवाय देवाय स्वाहेत्यादिभिर्हुत्वाथ पिष्टैर्गंधमाल्यैर्बलिरणमलंकृत्या
चेनमृग्यजुःसामभिः स्तुवंति सहस्रशा इत्यनुवाकं जपित्वा न्यां श्वरो दमंत्रा
न्यघाशान्नेके मृर्भर्वस्स्वरों भगवते महादेवाय चरुं सुद्वासयामीत्यादिभिः क

पा॰मा॰
१२८
५

द्वास्थो द्वासनकाले ॐभर्म्महादेवमुद्वासयामीति कद्रसूद्वास्यं प्रयातु भगवानी
शः सर्वलोकनमस्कृतः अनेन ह्विधानेन पुनरागमनाय च पुनः संदर्शी
नाय चेति प्रतिमास्थाने स्वस्वगतावाहनविसर्जनवर्जं सर्वं समानं महत्तं स्वस्व
पनमित्याचक्षत इत्याह भगवान् बौधायन इति शिवार्चनं प्रशंसति नंदिकेश्व
रः यः प्रदद्यात् कुंभलक्षं द्विजेभ्यो गृहीतां वेदपारंगतेभ्य एकाहमर्च्चयेल्लिंगं तस्य पुण्यं त
तोधिकं स कृत्स्नं जयते यस्तु भगवंतमुमापतिं अस्याश्रमे वा द्विधिकं फलं भव
ति भक्त्या इति देवतार्चनाकरणे दोषः कूर्म्मपुराणे योभिहितः यो मोहादथ
वालस्यादकृत्वा देवतार्चनं भुंक्ते स याति नरकं सूकरेष्वभिजायते इति इत्थं मू
लवचनोक्तं देवतापूजनं निरूपितं देवतानां चेति चकारो नरागुंकसमुच्चिनोति
गुरोरपि देववत्पूजनीयत्वात् अत एव श्रुतिः यस्य देवे परा भक्तिर्यथा

राम
१२८

देवेतथा गुरुरिति शैवपुराणे पितयो गुरुस्स शिवः प्रोक्तो यः शिवः स च शंकरः शि
वविद्यागुरूणां च भेदो नास्ति कथंचन शिवे मंत्रे गुरौ यस्य भावना सदृशी भवेत् ॥
भोगो मोक्षश्च सिद्धिश्च शीघ्रं तस्य भवेद्ध्रुवं वस्त्राभरणमाल्यानि शयनान्यासना
नि च प्रियाणि चात्मनो यानि तानि देयानि वै गुरोः तातथ्ये तं प्रयत्नेन मनसा कर्म
णा गिरेति मनुरपि इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमं गुरुशुश्रूषया
चैव ब्रह्मलोकं समश्नुते सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः अनादृतास्तु य
स्यैते सर्वास्तस्याफलाः क्रियाः यावत्त्रयस्ते जीवेयुः तावन्नान्यं समाचरेत् तेष्वेव
नित्यं शुश्रूषां कुर्यात्प्रियहिते रत इति इति कपूजा पंचमभागकृत्यमाह दक्षः
पंचमे च तथा भागे संविभागो यथार्हतः पितृदेवमनुष्याणां कीटानां चोपदि
श्यत इति पञ्चयज्ञ्यातिथ्यं वैश्वदेवं चेत्यातिथ्यस्य पूर्वभावित्वं मूलवचनोक्तं तथा

पा॰मा॰ १२८

पिवैश्वदेवपूजानंतरमावितं नृसिंहपुराणेभिहितं योकयेनैवचस्तके ततस्ततो विष्णुं
समर्चयेत् वैश्वदेवं ततः कुर्याद्बलिकर्मं तथैव चेति तत्रतत इति पंचमीश्रुत्याक्र
मः प्रतीयते ग्रहलवचनेन तु पाठमात्रेण पाठसंनिधिरूपाच्छ्रुतिर्बलीयसीति श्रु
तिलिंगसूत्रे व्यवस्थापितं तस्माद्वैश्वदेवं प्रथमं कर्तव्यं एवं च सति वेदपाठोप्यनु
गृहीतो भवति देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति स्मार्तो यः पा
ठेद्दिकः पाठो बलीयानिति विरोधाधिकरणन्यायेनावगम्यते तस्माद्पि वैश्व
देवस्य प्राधान्यं तत्र वैश्वदेवं विधत्ते व्यासः वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं त
तः संस्कृतान्नैर्हविर्विविधैर्विष्यञ्जनान्वितैः तैर्देवान्नैर्बलिं दद्याच्छेषमास्ना
य वा विरागकृतापसव्यः स्वधया सर्वं दक्षिणतो हरेदिति ततो देवार्चनानंतरमि
त्यर्थः नानापरोपि सभार्यस्तु शुचिः स्नातो विधिना चम्य वाग्यतः प्रविश्य स्तु सामि

राम १२८

ह्यग्नौ वैश्वदेवं समाचरेदिति कूर्म्मपुराणेपि शालाग्नौ लौकिके वाथ जले भूम्या
मथापि वा वैश्वदेवस्तु कर्त्तव्यो देवयज्ञः स वै स्मृतः यदि स्याल्लौकिकः पाकः ततो
ऽन्नं तत्र हूयते शालाग्नौ तत्र चेदन्नं विधिरेष सनातन इति अग्निवाग्न्येपि शाला
ग्नौ वा पचेदन्नं लौकिके वापि नित्यशः यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधी
यत इति शातातपोपि लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ वैश्वदेव
स्तु कर्त्तव्यः पंचसूनापनुत्तये इति सूनाः पंच दर्शयति यमः पंचसूना गृह
स्थस्य वर्त्तंतेस्य दहः सदा कंडनी पेषणी चुल्ली जलकुंभ उपस्करः एतानि
वाहयन्विप्रो बध्यते वै मुहुर्मुहुः एतासां पावनार्थाय पंचयज्ञाः प्रकल्पिताः
इति सूनाहिंसास्थानानि खंडनी मुशलोलूखलादिः पेषणी दृषदुपलादिः
चुल्ली पाकस्थानं जलकुंभ उदकस्थानं उपस्करः कूर्यादिः अवस्कर इति पा

भा॰मा॰
१३०

ठेमार्जन्नादिर्द्रष्टव्यः एतासूत्राः स्वस्यकार्यं प्रापयन्त्यायेनयुज्यत इत्यर्थः तत्रका
लद्वयेपिकर्तव्यमित्याह कात्यायनः सायंप्रातर्वैश्वदेवः कर्तव्योबलिकर्मचस्व
नश्नतापिसततमन्यथाकिल्बिषीभवेदिति होमप्रकारमाहाश्वलायनः अथ
सायंप्रातःसिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यः सोमायवनस्पतयेऽग्
नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्र
ह्मणेस्वाहेतिहविष्यस्येतिहविर्योग्यस्येत्यर्थः अग्निहोत्रदेवताभ्यः सूर्याग्निप्र
जापतिभ्यइत्यर्थः आपस्तंबोपि उपासनेपचनेवासद्भिर्मार्यैः प्रतिमंत्रंहस्तेनजु
हुयात्उभयतः परिषेचनंयथापुरस्तादितिआश्वैवनवाकादावुक्तेरग्नयेस्वाहे
त्यादिभिः कात्यायनोपि वैश्वदेवादन्नात्पर्युक्ष्यस्वाहाकारैर्जुहुयात् ब्रह्मणेप्र
जापतयेगृह्याभ्यःकश्यपायानुमतयइति अत्रयथाशाखंव्यवस्थाज्ञातव्या।

112

राम
१३१

न्नसंस्कारमाह व्यासः जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितं दध्यक्तं पयसाक्तं वा
वा तदभावे तु नापि वेति ह्यव्यानुकल्पश्चतुर्विंशतिमते दर्शितः अलाभे येन केना
पि फलशाकोदकादिभिः पयोदधिघृतैः कुर्याद्वैश्वदेवं स्रुवेण तु हस्तेनान्नादि
भिः कुर्याददिभरंजलिना जलं इति प्रदर्शितेनेनैव होतव्यं तदुक्तं गृह्यपरिशिष्टे
शाकं वा यदि वा पत्रं मूलं वा यदि वा फलं संकल्पयेद्यदाहारस्तेनैव जुहुयादपी
ति क्षारलवणाद्यन्नसंसृष्टे न हविष्येण होमोऽग्नौ न कार्यः किंतूष्णभस्मन्या
यतनादुत्तरतो योऽग्निस्तस्मिंस्तु होतव्यं न त्वापस्तंबः न क्षारलवणहोमो विद्यते
तथापरान्नसंसृष्टस्याहविष्यस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिन् जुहुया
त्तद्धुतमहुतं चाग्नौ भवतीति परिशिष्टेपि उत्ताने न तु हस्तेन नाद्यं गुल्फाग्रेण
पीडितं संहतांगुलिपाणिना स्रुवाग्रेण वा जुहुयाद्धविरिति अग्निकस्य वैश्वदेवे

पिशं काकबलिं हरेत् विष्णुरपि अग्नौ आहुतीभिर्हुत्वा कृत्वा मंत्रैश्च ४२

114

पा॰ मा॰
१३२

विशेषमाह वृद्धवसिष्ठः अनग्निकस्तु यो विप्रः सोमव्याहृतिभिः स्वयं हुत्वा शाक
लमंत्रैश्च शाकलैः प्रजापतिं हविर्हुत्वा पूजयेदतिथिं ततः इति भूतयज्ञः कूर्मपु
राणे दर्शितः देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं हरेत् भूतयज्ञं स वै प्रोक्तो
भूतिदः सर्वदेहिनामिति हारीतोपि बालस्तु पालभूतेभ्यो बलिहरणं भूतयज्ञ
इति कात्यायनोपि उद्धृत्य हविमासिच्य दहविष्येण घृतादिना स्वशाखाविधि
ना हुत्वा तच्छेषेण बलिं हरेदिति गौणकर्तृनाह अत्रिः पुत्रो भ्राताथवा ऋत्वि
क्शिष्यश्वशुरमातुलाः पत्नीश्रोत्रिययाज्याश्च दृष्टास्तु बलिकर्मणीति गृह
कर्त्रेतराभावे प्रवसता स्वयमेव कर्तव्यमित्याह बौधायनः प्रवासं गच्छतो यस्य
स्य गृहे कर्ता न विद्यते पंचानां महतामेषां स यज्ञैः सह गच्छतीति बलिहरणप्र
कारमाह तद्देवता आश्वलायनो अथ बलिहरणमेताभ्यश्चैव देवताभ्यो उ

राम
१३२

षधिवनस्पतिभ्यो गृहाय गृहदेवताभ्यो वा देवताभ्य इंद्रायेंद्रपुरुषेभ्यो यमाय यम
पुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्य इति प्रतिदिशं ब्रह्मणे
ब्रह्मपुरुषेभ्यः इति मध्ये विश्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्यः इति दि
वा नक्तंचारिभ्य इति नक्तं रक्षोभ्य इत्युत्तरतः स्वधा पितृभ्य इति प्राचीनावीती शेषं
दक्षिणा निनयेदिति आपस्तंबोपि अपरेणाग्निं सप्तमाष्टमाभ्यामुदधानसंनि
धौ नवमेन मध्येगारस्य दशमैकादशाभ्यां प्रागपवर्गमुत्तरपूर्वदेशेगारस्योत्त
रैस्त्रिभिः शय्यादेशे कामलिंगेन देहल्यामंतरिक्षलिंगेनोत्तरं पिधान्यामुत्त
रैर्ब्रह्मसदने दक्षिणतः पितृलिंगेन प्राचीनावीती अवाचीनपाणिः कुर्यात् रौ
द्रं उत्तरतो यथा देवताभ्यस्तयोर्नानापरिषेचनं धर्मभेदान् क्रमेवात मेनवैहा
यसमिति मार्कंडेयोपि एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः आप्यायना

यभक्तानांकुर्यादुत्सर्गमादरादिति कूर्मपुराणेश्वभ्यश्चश्वपचेभ्यश्चपतितेभ्यस्त
थैवचदद्याद्भूमौबलिंश्चान्नंपक्षिभ्योथद्विजोत्तम इतिमनुरपि श्वनांचपतिता
नांचश्वपचांपापरोगिणांवायसानांक्रिमीणांचशनकैर्निक्षिपेद्भुवीति अन्नमि
तिशेषः अत्रोत्सर्गमंत्रो भविष्यपुराणेदर्शितः देवामनुष्याःपशवोवयांसि
सिद्धाःसयक्षोरगदैत्यसंघाःप्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमया

श्री

प्रदत्तंपिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनिबंधबद्धाःप्रयांतुतेतृप्तिः
मिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतुयेषांनमातानपितानबंधुर्नैवान्न
सिद्धिर्नतथान्नमस्तितत्तृप्तयेन्नंभुविदत्तमेतत्तेयांतुतृप्तिंमुदिताभवंतुभूता
निसर्वाणितथान्नमेतदहंचविष्णुर्नततोन्यदस्तितस्मादिदंभूतहितायभूत
मन्नंप्रयच्छामिभवायतेषांचतुर्दशोलोकगणोयएषतत्रस्थितायेखिलभू

तस्याः तृप्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवंतु इत्युच्चार्य नमो दद्यादन्नं श्र
द्धासमन्वितः भुवि भूतोपकाराय गृही सर्वाश्रयो यत इति पितृयज्ञं श्राद्धादर्शितः य
त्पितृभ्यः स्वधा करोत्यपलात्पितृयज्ञं संतिष्ठत इति स इति कात्यायनेनापि अध्यायनं ब्र
ह्मयज्ञः पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भूतो नृयज्ञोतिथिपूजनं श्राद्धं वा पितृय
ज्ञः स्यात्पित्र्यो बलिरथापि वेति अत्र यद्यपि स्वशाखं वा स्याद् चात्र नित्यश्राद्धं तथा कू श्रा
र्मपुराणे एकं तु भोजयेद्विप्रं पितॄनुद्दिश्य सन्ततम् नित्यश्राद्धं तदुद्दिष्टं पितृयज्ञो गति
प्रद इति मार्कंडेयोपि कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा पितॄनुद्दिश्य विप्रा
न्भोजयेद्विप्रमेव चेति नित्यश्राद्धप्रकारो मत्स्यपुराणे दर्शितः नित्यं तावत्प्रव
क्ष्यामि अर्घ्यावाहनवर्जितं अदैवं तद्विजानीयात्पार्वणं तद्धि कीर्तितमिति प्रचे
ताः नावाहनाग्नौकरणं न पिंडो न विसर्जनमिति व्यासोपि नित्यश्राद्धे गंधाद्यैर्द्वि

पा॰मा॰ य
१३१

जानभ्यर्च्य शक्तितः सर्वान्पितृगणान्सम्यक् सदैवोद्दिश्य भोजयेत् आवाहनस्व
धाकारपिंडाग्नौकरणादिकं ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव च नित्यश्राद्धे
त्यजेद्देवान् भोज्यमन्नं प्रकल्पयेत् दत्वा तु दक्षिणां शक्त्या नमस्कारैर्विसर्जयेत्
एकमप्याशयेन्नित्यं षण्णामप्यन्वहं गृहीति कात्यायनसूत्रानुकल्पमाह एक
मप्याशयेन्नित्यं पितृयज्ञार्थसिद्धये अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा अ
प्युद्धृत्य यथाशक्ति किंचिदन्नं यथाविधि पितृभ्य इदमित्युक्त्वा स्वधाकारमुदाहरे
देदिति उद्धृतमन्नं ब्राह्मणाय दद्यादित्युक्तं कूर्मपुराणे उद्धृत्य वा यथाशक्ति किं
चिदन्नं समाहितः वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेदिति तत एते देवयज्ञ
पितृयज्ञभूतयज्ञास्त्रयोऽपि वैश्वदेवशब्देनोच्यंते यत्र विश्वेदेवा इज्यंते तत्तद्वैदि
ककर्म देवयज्ञे च विश्वेभ्यो देवेभ्यः स्वाहेति पठितत्वात्तत्रैतन्नाममुख्यं येषां तु

रा॰म
१३१

प्राख्यायांभूतयज्ञेष्वयंमंत्रोस्तितेषांतन्मुख्यंपितृयज्ञेतुछत्रिन्यायेनतन्नामप्रवृत्तिः
वा अपिमूलवचनेवैश्वदेवंचेतिचकारेणपितृयज्ञादिकमनुक्तंसमुच्चीयतेयद्यपि
सायंप्रातःसिद्धस्यहविष्यस्यजुहुयादितिवचनेनवैश्वदेवस्यान्नसंस्कारताप्र
तीयतेतथापिपुरुषार्थत्वमेवाभ्युपेयंतानेतानहरहः कुर्वीतेतिवाक्यशेषेत
दवगमात्नचोभयार्थत्वंशंकनीयंपरस्परविरोधात् अन्नसंस्कारतेत्यन्नस्य
प्राधान्यंवैश्वदेवस्यगुणता — पुरुषार्थत्वेतुतद्विपर्ययः तथाचसतिएकस्यैव
युगपत् प्राधान्यंगुणत्वंविरुध्येयातांतत्रसकृदुभयसंस्कारतेवमाभूत्पुरुषार्थ
त्वमितिचेन्नमहायज्ञेष्वयज्ञेष्वन्नाहीयंक्रियतेतन्नुदितिमनुनापुरुषार्थ
त्वस्मरणात् यत्तुसिद्धस्यहविष्यस्यजुहुयादितिदोहनेनदध्यादावुपपन्नेतत्र
जुहुयादितिस्तुत्यान्निविधिःसिद्धस्यहविष्यस्येतिनविनियोगः तानेतानहरहः

कुर्वीतेत्यधिकारः किंचान्नसंस्कारपक्षेप्रतिपाकमावृत्तिः प्रसज्येतप्रतिप्रधा
नंगुणावृत्तिरितिन्यायात् तस्मात्सकृदावृत्तिमेवन्याय्या अतएवगृह्यपरिशिष्टे
ऽभिहितंप्रोक्षितोपात्तसंस्कारंकुर्याद्देवादिवाचयन्निति गोभिलोपिपद्येकस्मि
न्कालेव्रीहियवौपच्येयातांअन्यतरस्यकृत्वाकृतंमन्येतपद्येकस्मिन्क्रीतेपुनरन्यं त
पच्येतेसकृदेकंबलिंकुर्वीतपद्येकस्मिन्कालेबहुधान्नंपच्येतेगृहपतिमहा
नसादेवैकंबलिंकुर्वीतेति अयमर्थः नानाद्रव्यकान्नपाकेपिपुनःपुनः
पाकेपिबहूनामविभक्तानांभ्रात्रादीनांपृथक्पाकेपिएकस्माद्बहुमान्न
सकृदेवगृहपतिपाकाद्देवहोतव्यमिति इतिवैश्वदेवप्रकरणं अथाति
थ्यापरनामकोमनुष्ययज्ञोनिरूप्यते आतिथ्यस्यमनुष्ययज्ञत्वंकात्यायने राम
नोक्तं अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणं होमोदेवोबलिर्भौतोनृयज्ञो १३५

तिथिपूजनमिति ॥ श्रुतिरपि यद्ब्राह्मणेभ्यो ऽन्नं ददातीति मनुष्ययज्ञः संतिष्ठत इति ॥
बौधायनोपि ॥ अहरहर्ब्राह्मणेभ्यो ऽन्नं दद्यात् मूलफलशाकानि वा यद्येनं मनुष्ययज्ञं
समाप्नोतीति कार्ष्णाजिनिरपि भिक्षां वा पुष्कलां वापि हन्तकारमथापि वा ॥ असंभवेग्रं
वा दद्यादुदपात्रमथापि वेति कूर्मपुराणे पि हन्तकारमथाग्रं वा भिक्षां वा शक्तितो
द्विजः दद्यादिति पद्येनित्यं तु धान्यतपरमेष्ठ्यन्नमिति भिक्षादिलक्षणं मनुनाह ग्रास
मात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं अग्रं चतुर्गुणीकृत्य हन्तकारो विधीयत इति ॥ अ
तिथिनिरीक्षणाय गृहांगणे किंचित्कालं तिष्ठेदित्युक्तं मार्कण्डेयपुराणे आचम्य
च ततः कुर्यात्प्राज्ञो द्वारावलोकनं मुहूर्तस्याष्टमं भागमुदीक्षेतातिथिर्भवेदि
ति विष्णुपुराणेपि ततो गोदोहमात्रं वा कालं तिष्ठेद्गृहांगणे अतिथिग्रहणा
र्थाय तदूर्ध्वं वा यथेच्छयेति इति मनुष्ययज्ञः ॥ तदेवं संध्यास्नानमित्यस्मिन्मूल

वचनेस्मानादीन्यातिथ्यानि बहूनि कर्माणि निरूपितानि चात्र सप्तत्वप्रतिभानात् ब
हुत्वं विवक्षितमिति शंकनीयं संमार्गन्यायेनोद्देश्यगतायाः संख्याया अविवक्षितत्वात्
पोनिकर्माणि त्युद्देश्यतानि द्विमेद्विनेकर्तव्यानीति तेषां नित्यत्वविधानात् संमार्ग
न्यायस्तु तृतीयाध्याये प्रतिपादितः ज्योतिष्टोमे दशापवित्रेण ग्रहं संमार्ष्टीति श्रूयते
तत्र संशयः किमेकस्य संमार्गः किं वा सर्वेषामिति तदर्थं किमुद्देश्यगता संख्या विव
क्षितानेति यथा पशुनायजेतेत्यत्र एकवचनश्रुतिबलादुपादेयपशुगता संख्या विव
क्षिता तथैव ग्रहमित्येकवचनश्रुतिबलादुद्देश्यगतापि संख्या विवक्षिता भवितुमर्
हतीति तस्मादेकस्यैव ग्रहस्य संमार्गे प्राप्ते ब्रूमः पशावनेनैव वचनेन यागसंबंधा
वगमाग्रागं प्रतियशोगुणभूतत्वाच्चावस्तुरं प्रधानात्वस्य भावात्किं पतापशुने
त्यवच्छेद्याकांक्षायां तदवच्छेदकत्वेनैकत्वसंख्या सं[illegible]बध्यत इत्युपादेयगतायाः

संख्याया विवक्षितत्वं युक्तं ग्रहाणां तु वाक्यांतरेण यागसंबंधावगमात्संमार्गवा
क्ये क्षितीयाश्रुत्या संमार्गं प्रति ग्रहस्य प्राधान्यावगमात्प्रति प्रधानं गुणस्य संमा
र्गस्यावर्तनीयत्वात् कियंतो ग्रहाः संमार्जनीया इत्याकांक्षायामनुदयादुद्देश्या
ग्रहगता संख्या न विवक्षिता तस्मात्सर्वे ग्रहाः संमार्जनीयाः प्रकृते त्वुद्देश्यसंध
ध्यादिगता षड्संख्या न विवक्षिता अयोच्येत अस्यापवादः शास्त्रतो वाक्यांतरे
ण संध्यादीनां निरूपणाभावादनेनैव वाक्येन नित्यत्वं च विशिष्टानां तेषामनुत्पा
दनादुपादेयगतत्वेन पश्वैकत्ववद्विवक्षितत्वमेव संख्याया युक्तमिति एवं तर्हि
संध्यासहिते स्नानं संध्यास्नानमिति समासे सत्यं गेन स्नानेन सहिताया अंगि
भूतायाः संध्याया एकत्वेन पदिगरणा नान्यत्रैष संख्या विकल्प्यत इति गमयित
व्यं संध्यादीनां नित्यत्वं चाग्निहोत्रादिवद्यावज्जीवकर्तव्यतयावगम्यते जीवन

ई

124

पा.मा. वद्धिकायां चैव हि नेदिनद्दतिवीप्सयावगम्यते यथा वसंते वसंते ज्योतिषा यजेते

१२६ नेत्यत्र वीप्सयावगमस्तद्वदत्रापि छं वैश्वदेवं चेत्युक्ते तत्र कीदृशो तिथिरित्याकां

मूलं ५ क्षायामाह दृष्टो वा यदि वाऽदृष्टो मूर्खः पंडित एव वा संप्राप्तो वैश्वदेवांते सोऽतिथिः

टीका ५ स्वर्गसंक्रमः इति दृष्टः सर्वादिः तस्य च भोजनीयत्वं याज्ञवल्क्योपि। भोजयेदा

गतान्काले सखिसंबंधिबांधवानिति हि अस्य भोजनीयत्वं मनुनाभिहितं काम

मभ्यर्चयेत्मित्रं नाभिरूपमपि त्वरिं द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलं

मिति एवं सत्यरिमित्रविवेको यथा क्रियते न तथैवातिथावपि तन्मूसक्तोनन्निराक

करणाय दृष्टो वा यदि वाऽदृष्ट इत्युक्तं मूर्खस्य भोजनीयत्वस्य त्वत्र वेनिषिद्धं नष्ट

शौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतमिति रम

पंडितस्य भोजनीयत्वं मनुना प्रशंसितं श्रोत्रियायैव देयानि हव्यकव्यानि दा १२६

तृप्तिः अर्हजनमायविप्रायतस्मैदत्तंमहाफलमितिएवंचसतिअकृतदारविवैश्वदे
वांतिकेपिपंडितमूर्खविवेकप्रसक्तौनद्वावरणायोक्तं मूर्खः पंडितएवचेतिवै
श्वदेवांतप्राप्तेनदेवयज्ञभूतयज्ञपितृयज्ञानामुपदिघटिकापादपरिमितःका
लोविवक्षितः तथाचमार्कंडेयपुराणवचनमुदाहृतंमुहूर्तस्याष्टमंभागमिति
अतएवतस्मिन्कालेसमागमनमेवतिथिलक्षणंतेनातिथ्यादिसंक्रम्यतेनेनेति
संक्रमः स्वर्गसंक्रमः स्वर्गप्राप्तिहेतुरितियावत् तथाचाश्वमेधिके क्षुत्पिपासा
श्रमार्तायदेशकालगतायच सत्कृत्यान्नंप्रदातव्यंयज्ञस्यफलमिच्छतेतिइतिमे
वातिथिंविशिनष्टि दूराच्चोपगतंग्रामांतरादागतंश्रांतंक्षुधादिपरिपीडितं
अतएवचव्यासः अध्वनोदाश्रमश्रान्तः क्षुत्पिपासाश्रमकर्षितः यः पूज्यतेति
थिंसम्यग्पूर्वैः क्रतुदेवसहतिनातिथिः पूर्वमागत इतितस्मिन्नेवातिथिनेति
दूरादिति दूराच्चोपगतंश्रांतंवैश्वदेवउपस्थितम् अतिथिंतंविजानी
यान्नातिथिः पूर्वमागतः ४८

पा॰मा॰ देयुरतिथिरित्यर्थः तथाचमनुः एकरात्रंतुनिवसन्नतिथिर्व्राह्मणःस्मृत इतिवै
१३७ श्वदेवउपस्थित इतिदिवसाभिप्रायंसायंतुवैश्वदेवकालेकालांतरेवाप्राप्नोतिथिरे
वतथाचमनुः अप्रणोद्योतिथिःसायंसूर्योढोगृहमेधिना कालेप्राप्तस्त्वकालेवाना
स्यानश्नन्गृहेवसेदितिसूर्योढ इतिअस्तंगच्छतासूर्येणदेशांतरंगमनाशक्तिमुन्या
यगृहंप्रापितइत्यर्थः याज्ञवल्क्योपि अप्रणोद्योतिथिःसायमपिवाभूतृणोदकैः
रितिप्रचेताअपियः सायंवैश्वदेवांतेसायंवागृहमागतः देववत्पूजनीयोसौसू
र्योढःसोतिथिःस्मृतइति पराशरोपि नैकग्रामीणमतिथिंसंगृह्णीत
कदाचन अनित्यमागतोयस्मात्तस्मादतिथिरुच्यतइति नविद्यतेतिथिर्यस्यासाव
तिथिः तथाचयमः तिथिपर्वोत्सवाःसर्वेत्यक्तायेनमहात्मनासोतिथिः स
र्वभूतानांशेषानभ्यागतान्विदुरितिमन्वादियुगादिप्रभृतिषुतिथिविशेषे॥

नैकेतिम्
लं ×

राम
१३७

षड्द्रव्यलाभमुद्दिश्य येभ्यागच्छंति तेभ्यागताः तादृशां तिथिविशेषमनपेक्ष्य यदाक
दाचित् कृतश्चाद्दिवीत् यावा समागतोतिथि रेवं च सत्येकग्रामीणः प्रतिनियते
षु तिथिविशेषेषु समागच्छतीति नासवतिथिर्यस्तु ग्रामांतराद्दकस्माद्दाकेतितो
वुभुक्षुः समागच्छति सोतिथ्यमागतः तमेवातिथित्वेन संग्रहीतनेतरं तथाच॰
विप्रपुरुषो अस्तातकुलनामानमन्यतः समुपागतं पूजयेद्दतिथिं सम्यक् एकग्रा
मनिवासिने आकिंचनमस्तेवं धमन्यदेशादुपागतमिति मार्कंडेयोपि नमित्रमति
थिं कुर्यान्नैकग्रामनिवासिनं अस्तातकुलनामानं तत्काले समुपस्थितं वुभुक्षुमाग
तं श्रांतं याचमानमकिंचनं ब्राह्मणं प्राहुरतिथिं स पूज्यः प्राज्ञैर्नो वुधैरिति मनुर॰
पि नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा उपस्थितं गृहे विद्याद्भार्या यत्राग्नयो॰
पि वा । एकग्रामवासी अतिथिधर्मेणागतोपि अतिथिर्न भवति तथा सांगतिकः सं

या॰मा॰ गेनचरन् — — दृष्टपूर्व इतियावत् नापियत्रक्कचनदेशेतिथिधर्मेणागतोतिथिः

१३८ किंतुयस्मिन्स्वकीयेपरकीयेवादेशेभार्यागृहयोर्वाभवतितत्रैवोपास्थितोतिथिर्भ

वति अतिथेःस्वरूपंनिरूप्यतस्मिन्नागतेसतियत्कर्तव्यंतदाह अतिथिंतत्रसंप्रा॰

प्तंपूजयेत्स्वागतादिनातथासनप्रदानेनपादप्रक्षालनेनश्रद्धयाचान्नदाने॰ ४२

नप्रियप्रश्नोत्तरेणचगच्छतश्चानुयानेनप्रीतिमुत्पादयेत् गृहीतिनिगदव्याख्या

न नमेतत्श्लोकद्वयंतदेतद्ब्राह्मणविषयंयतद्ब्राह्मणोब्राह्मणेभ्योन्नंददातीति अहरहर्ब्रा॰

ह्मणेभ्योन्नंदद्यादितिस्मृति स्मृत्योकदाहृतत्वात्क्षत्रियादयस्तुनब्राह्मणगृहे

तिथिसत्कारमर्हंति किंतुभोजनमात्रं तथाचमनुः ब्राह्मणस्यत्वनतिथिर्गृहेराज

जन्यउच्यतेवैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवचयदितुतिथिधर्मेणक्षत्रियोगृ राम

हमाव्रजेत् भुक्तवत्सुचविप्रेषुकामंतमपिभोजयेत् वैश्यशूद्रावपिप्राप्तौकु १३८

ष्टं वेति तिथिधर्मिणो भोजयेत्सह भृत्यैस्तानानृशंस्यं प्रकल्पयेत् इतरानपि सख्या
दीन् संप्रीत्या गृहमागतान् प्रकृत्यान्नं यथाशक्ति भोजयेत्सह भार्ययेति आसना
दिदाने विशेषमाह स एव आसनावसथे शय्यामनुव्रज्यामुपासनं उत्तमेषूत्तमं
कुर्याद्धीने हीनं समे समं इति अतिथिसत्कारमाकरणे प्रत्यवायमाह अतिथिर्यस्य
भग्नाशो गृहात्प्रतिनिवर्त्तते पितरस्तस्य नाश्नंति दशवर्षाणि पंच च काष्ठभार
सहस्रेण घृतकुंभशतेन च अतिथिर्यस्य भग्नाशस्तस्य होमो निरर्थक इति अमु
मस्य गृहे भोज्य इत्याशया समागतो तिथिर्यदि भोजनमप्राप्य तस्माद्गृहान्निवर्त्तते
तदा गृहिणा क्रियमाणेनैतत्कर्म निष्फलं स्यात् तथा दैविकोपि होमो विहितद्रव्या
द्यंगसंपन्नोपि निष्फलो भवेत् तथा च मनुः शिलानप्युंछतो नित्यं पंचाग्नीनपि
जुह्वतः सर्वं सुकृतमादत्ते ब्राह्मणोनर्चितो वसन्निति आश्वमेधिकेपि संगो

अतिथि
दिति मूलं

पा.मा. पांगांस्तथा वेदान् पठतीह दिने दिने न चातिथिं पूजयति वृथा स पठति द्विजः पाक
२५९ यज्ञैर्महायज्ञैः सोमसंस्थाभिरेव च ये यजंति न चार्चंति गृहेष्वतिथिमागतं तेषां
यशोभिकामानां दत्तमिष्टं च यज्ञवेद वृथा भवति तत्सर्वमाशापाहतं हतमिति अत्र प्रा ४
सुकृतहान्यभिधानं दुष्कृतप्राप्तेरप्युपलक्षणं तथा च विष्णुः अतिथिर्यस्य भग्नाशो गृ
हस्य स्य तु गच्छति तस्मात्सुकृतमादाय दुष्कृतं तु प्रयच्छतीति आपस्तंबेपि केपि वेश्वदेवां
तवे प्राप्तमतिथिं यो न पूजयेत् स चांडालत्वमाप्नोति सद्य एव न संशयः निर्वासयति
यो विप्रं देशकाले तिथिं गृहात् पतितस्तत्क्षणादेव जायते नात्र संशय इति अतिथि
सुदैवं अइति सत्कारं प्रशंसति सुक्षेत्रे वापयेद्बीजं सुपात्रे निक्षिपेद्धनं सुक्षेत्रे च सुपात्रे च ह्युप्तं दत्तं न
मू.लं ४३ विनश्यतीति यथा सुक्षेत्रे उप्तं बीजं विनश्यति न किंतु महते फलाय कल्पते तथा सु राम
पात्रे तिथौ दत्तमन्नादिकं महाफलप्रदमित्यर्थः तदाह मनुः नैव स्वयं तदश्नीया २५९

इति थिंयन्नभोजयेत् धन्यंयशस्यमायुष्यंस्वर्ग्यंचातिथिपूजनमिति आश्वमेधिके
पिपादाभ्यंगान्नुपायैस्तु योतिथिंपूजयेन्नरः पूजितस्तेनराजेंद्र भवामीह नसंशय
इति शातातपोपिस्वाध्यायेनाग्निहोत्रेणयज्ञेनतपसातथा नावाप्नोति गृहीलोः
कान्यथाचातिथिपूजनादिति आतिथ्येकर्तुर्नियममाह नपृच्छेद्गोत्रचरणेनस्वाध्या
यंश्रुतंतथा हृदयेकल्पयेद्देवंसर्वदेवमयोहिसइति श्राद्धेत्वादावेवब्राह्मणःपरी
क्षणीयइति मनुनाहदर्शितं दूरादेवपरीक्षेतब्राह्मणंवेदपारगंतीर्थंतद्धव्यकव्यानां
प्रदानेसोतिथिःस्मृत इतियमेनापिपूर्वमेवपरीक्षेतब्राह्मणंनवेदपारगानश्रावी
रपुण्यवैदैवेपित्र्येविमृश्यांश्चादितवृत्तानिति अतःश्राद्धन्यायेनातिथ्येपिकर्मणिगो
त्रादिपरीक्षाप्राप्तानेतिनिवार्यते गोत्रंवंशप्रवर्तकमहर्षिसंबंधःचरणमाह
चारःशाखाविशेषाःस्वाध्यायःश्रुतंव्याकरणमीमांसादिहातेद्देशनामादीनामु

नपृछेदि
ति मनुः

लक्षणं अतएव यमः न पृच्छेद्गोत्रचरणौ देशं नाम कुलं श्रुतं अध्वनोऽभ्यागतं वि
प्रं भोजनार्थमुपस्थितमिति न केवलं गोत्रप्रश्नादिवर्जनं किं तर्हि देवताबुद्धिरपि क
र्तव्या तदुक्तं शातातपेन चित्ते विभावयेत्तस्मिन् व्यासः स्वयमुपागत इति विष्णुपुरा
णेपि स्वाध्यायगोत्रचरणमपृष्ट्वापि तथा कुलं हिरण्यगर्भबुद्ध्या तं मन्येताभ्याग
तं गृहीति देवताबुद्धिविषयत्वे हेतुः सर्वदेवमयत्वं तच्च पुराणसारे दर्शितं धा
ता प्रजापतिः शक्रो वह्निर्वसुगणोऽर्यमः प्रविश्यातिथिमेते वै भुंजतेऽन्नं द्विजोत्त
मेति गोत्रादिप्रश्ने दोषोऽप्यनेन दर्शितः देशं नाम कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छतीति यथातिथ्यकर्ता गोत्रादि न पृच्छेत् तथातिथि
रपि न ब्रूयात् तदाह मनुः न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् भोजनार्थं
हि ते शंसन् वान्ताशीत्युच्यते बुधैः इति अतिथिदृष्टान्तेन भिक्षुरपि यतिर्ब्रह्म

अपूर्वइति मूलं ५

चादिरोगैः पूज्यतामाह अपूर्वः सुव्रती विप्रो ह्यपूर्वश्चातिथिस्तथा वेदाभ्यास
रतो नित्यं त्रयोऽपूर्वो दिने दिने इति सुष्ठु व्रतं सुव्रतं मोक्षहेतुर्यतिधर्मः सोऽस्यास्तीति
सुव्रती यतिः वेदाभ्यासरतो ब्रह्मचारी तदर्थित्वात्तस्याश्रमस्य तावुभौ प्रतिदिनम
पूर्वौ अतिथिवत्पूज्यावित्यर्थः तथा च याज्ञवल्क्यः सत्कृत्य भिक्षवे भिक्षादा
तव्या सुव्रताय चेति नृसिंहपुराणे भिक्षां च भिक्षवे दद्यात् विधिवद्ब्रह्मचा
रिणे अकल्पितान्नादुद्धृत्य सर्वव्यंजनसंयुतमिति मनुरपि भिक्षां च भि
क्षवे दद्याद्विधिवद्ब्रह्मचारिणे यत्पुण्यं फलमाप्नोति गां दत्वा गुरवे यथाविधि त
त्पुण्यफलमाप्नोति भिक्षां दत्वा द्विजो गृहीति यमः सत्कृत्य भिक्षवे भि
क्षां यः प्रयच्छति मानवः गोप्रदानसमं पुण्यं तस्याह भगवान्यम इति ब्रह्म
चारिणः स्वस्ति वाचयित्वा तद्ब्रह्मजलं प्रदाय भिक्षादानं कार्यं तदाह गौतमः

पा.मा. १४१

स्विति वाच्य भिक्षादानमप्पूर्व्वमिति यति ब्रह्मचारिणौ यदि वैश्वदेवांते समागच्छ
तस्तदा तयोर्वैव यदा तु वैश्वदेवात्पूर्वं मागच्छतस्तदा कथमित्यत आह वैश्वदेवे तु सं
प्राप्ते भिक्षुके गृहमागते उद्धृत्य वैश्वदेवार्थं भिक्षां तु विसर्जयेदिति संप्राप्ते
संप्रसक्ते अननुष्ठिते सतीति यावत् तथा च नरसिंहपुराणे अकृते वैश्वदेवे तु
भिक्षुके गृहमागते उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेदिति यावद्वैश्व
देवाद्युपयुक्तमन्नं तावत्पृथक्कृत्वा वाशिष्टाद्दन्नात् भिक्षां दत्वा भिक्षुकं विसर्जे
येत् अकरणे प्रत्यवायमाह यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ त
योरन्नमदत्वा तु भुक्त्वा चान्द्रायणं चरेदिति चान्द्रायणस्य लक्षणं वक्ष्यामः ॥
प्रायश्चित्तविधानात् प्रत्यवायो प्युपगम्यते तयोः पक्वान्नस्वामित्वात् दत्ताद्दाने
प्रत्यवाय उपपन्नः अत एव पुराणे पि अकृत्वाग्निमसंतर्प्य तत्पश्चिन्नमुपास्थितं

५०

राम १४१

दद्यादिति मूलं

आशित्वा तु परे लोके स्वानि मांसानि खादतीति वक्ष्यति भिक्षुकेष्वागते गृहस्थेन किं कर्त

व्यमित्याशंक्याह दद्याच्च भिक्षां त्रितयं परिव्राड्ब्रह्मचारिणां इच्छया च ततो दद्याद्विभ

५१ वे सत्यवारितमिति निगदव्याख्यातमेतत् यथाविभवं भिक्षादानं कूर्मपुराणेऽह

भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो

लोभवर्जित इति यतिभिक्षाप्रदाने नियममाह यतिहस्ते जलं दद्याद्भैक्षं दद्या

५२ त्पुनर्जलं तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपममिति स्पष्टमेतत् तत्र भैक्ष्ये सति वि

भवे बहुलं दातव्यं तदुक्तं च ब्रह्मपुराणे यः पात्रपूरणीं भिक्षां यतिभ्यः संप्रयच्छ

ति विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयादिति यथा भिक्षुकस्य समागतस्याति

थ्यमवश्यं कर्तव्यं तद्वदेश्वर्यो येन स्यापि स्वगृहे समागतस्यातिथ्यमभ्युदयकामिना

कर्तव्यमित्याह यज्ञैश्वर्ये यथैवं कुंजरानोहमद्विमत् ऐंद्रस्थानमुपासीनं तस्मा

यतीनिम
त्तं ४

यस्येति मूलं

ईचनयो ५२ वृ २
५२४

136

पा.मा.
१४२

त्रं न विचारयेदिति यस्य त्वत्र ह्ययौ विनेनस्याति ष्ठं कुर्वन्नैवं पदमाप्नुयात् एतस्माद्
च नान्यद्वेतिनयो दातिष्ठ्याविषयत्वात्तन्त्रकं दर्शनः यातित्वेनास्मिंश्च चनेनुक्रमयाति
ष्ठ्यं कुर्वन्निति पदद्वयं संदंशन्यायेनात्र लभ्यते कुंजरस्याधो होयास्मिन्नैं द्वपदेन कुं
जरादोहमद्भिरमृतपानापत्र: सेवादिरस्मिन्नसीत्यद्भिमतश्छत्रादिमानद्धात्रि
यादिरतिष्ठि जीति कुला चारैर्यद्यपि हीनः तथापि तत्प्रजायाः स्वर्गप्राप्तिहेतुत्वा
त्तमतिष्ठिं हीनत्व वुध्या पज्योयं नवेतिन विचारयेन्न संदिह्यात् किं त्वोष्वव वुध्या
तं पूजयेत् यद्यपि मिक्त कवन्नापमास्मिन् जलानि तपस्वीन् तथाप्यतीते जन्मत्वे नन
तपोनुष्ठितं मन्यते दशस्येष्वर्यस्य प्राप्त्य संभवात् अतएव विश्रुतिमत ईश्वरांश
त्वं भगवता दर्शितं यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम ते
जोंऽश संभवमिति तस्मात्युक्तमे स्वर्यो येन स्याति पूज्यं यद्युक्तं वेस्व देवानस्वर्वं मपियति वृ

राम
१४२

स्नचावि[illegible]र्थ्यां भिक्षा दातव्येति न त्वोपपतिमाह वैश्वदेवकृतं पापं शक्तो भिक्षुर्व्यपो
हितुं न हि भिक्षुकृतान् दोषान्वैश्वदेवो व्यपोहतीति वैश्वदेवस्य पश्चात्करणेन प्रसक्तो
यो दोषः स भिक्षादानेन निवर्त्यते भिक्षाप्रदानादेरा तु यो दोषः नासौ पूर्वकृतेनापि
वैश्वदेवेन निवर्त्यते अत्र भिक्षुशब्दो विद्यार्थ्यादीनामुपलक्षकं तथा च तेषां भिक्ष
त्वं व्यासेनोक्तं पतिश्च व्रह्मचारी च विद्यार्थी गुरुपोषकः अध्वगः क्षीणवृत्तिश्च ष
डेते भिक्षुकाः स्मृता इति पुराणेपि व्याधितस्यार्थहीनस्य कुटुंवात्प्रच्युतस्य च
अध्वानं वा प्रपन्नस्य भिक्षाचर्या विधीयत इति वैश्वदेवकृतमित्युक्तावुद्धिस्यत्वाह
वैश्वदेवस्याकरणे प्रत्यवायमाह अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः सर्वे ते
निष्फला ज्ञेयाः पतंति नरकेऽशुचाविति निष्फलायथोक्तफलरहिताः न केवलमिष्ट
प्राप्त्यभावः किं तु निष्टप्राप्तिरपीति दर्शितं पतंतीति अशुचौ तीव्रदुःखे वैश्वदेवदृष्टां

पा.मा. १४३

तेनातिथ्याकरणेपि प्रत्यवायमाह ॥ वैश्वदेवविहीना ये आतिथ्येन बहिष्कृताः सर्वे
ते नरकं यांति काकयोनिं व्रजंति चेति नरकं रौरवादिः तमनुभूय पश्चात्काकयो॰
निं व्रजंति अतिथित्वेन स्ववन्नन्यानपि भोजनीयानाह ॥ पापो वा यदि चंडालो वि॰
प्रघ्नः पितृघातकः वैश्वदेवे तु संप्राप्तः सोतिथिः स्वर्गसंक्रम इति पापो गोवधाद्यु
पपातकी एतेषां तु भोजनीयत्वमेव न तु श्रेष्ठातिथ्यसत्कारः ॥ ईदृशं गतदेवापि प्रे
त्य स्वमेधिके वर्णितं चंडालो वा श्वपाको वा काले यः कश्चिदागतः अन्नेन पूजनी
यस्तु पवत्र हितमिच्छते ति विश्वधर्मोत्तरे चांडालो वा श्वपाको वा भ्रातुर्वा पितृघातकः
देशकालेभ्युपगतो भवत्यमीयो मतो ममेति उक्तानेवमहायज्ञान्प्रशंसति स्मार्तः
देवान् ऋषीन्पितॄंश्चैवमनुतानि वा स्तर्पणे स्नपातर्यो ये ह विधिना विप्रो ब्रह्मभूयाय कल्प्य॰
त इति पुराणेपि यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः सम्यक् पंचमहायज्ञैर्दे॰

पापइति मूलं

वा

राम १४३

विंदूस्तद्वाप्नुयादिति अकरणेप्रत्यवायमाह व्यासः पंचयज्ञांस्तु यो मोहान्न करोति
गृहाश्रमी तस्य नायं न च परो लोको भवति धर्मत इति भोजनविधिश्च मनुना दर्शितः ॥
भुक्तवत्सु तु विप्रेषु स्वेषु भृत्येषु चैव हि भुंजीयातां ततः पश्चादवशिष्टं तु दंपती इति वि
ष्णुपुराणे ततः स्ववासिनी दुःखि गर्भिणी वृद्ध वालकान् भोजयेत्संस्कृतान्नेन प्रथ॰
मं तु परं गृही अभुक्तवत्सु चैतेषु भुंजन् भुंक्ते स दुष्कृतं मृतश्च गत्वा नरकं श्लेष्म
भुग्जायते नर इति मार्कंडेयपुराणे पि पूजयित्वातिथीन् भिः स्वान् ज्ञातीन्वंधूंस्त॰
र्थार्थिनः विकलान् वालवृद्धांश्च भोजयेदातुरांस्ततः वांछेत्क्षुत्तत्परीतात्माय॰
च्चान्नं रससंयुतमिति भोजनेति कर्तव्यतामाह वौधायनः उपलिप्ते समे स्थाने शु
चौ श्लक्ष्णासनान्विते चतुरस्रं त्रिकोणं वा वर्तुलं चार्धचंद्रकं कर्तव्यमानुपूर्व्येण
ब्राह्मणादिषु मंडलमिति शंखोपि आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः मंड

लान्नुपजीवेति तस्मात्कुर्वीत मंडलमिति कूर्मपुराणेपि उपलिप्ते शुचौ देशे पादौ
प्रक्षाल्य वै करौ आचम्यार्द्राननो क्रोधः पंचार्द्रो भोजनं चरेदिति व्यासोपि पंचार्द्रो भो
जनं कुर्यात् प्राङ्मुखो मौनमास्थितः हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मतेति ॥
आश्वमेधिकेपि आर्द्रपादस्तु भुंजीयात्प्राङ्मुखश्चासने शुचौ पादाभ्यां धरणीं स्पृ
ष्ट्वा पादेनैकेन वा पुनरिति तत्र भोजनं शुद्धपात्रे कर्तव्यं तदुक्तं कूर्मपुराणे प्रशस्त
शुद्धपात्रेषु भुंजीताकुपितो द्विज इति प्रशस्तानि च पात्राणि पैठीनसिनादर्शितानि
सौवर्णराजतताम्रपद्मपत्रपलाशपत्राणि भाजने भोजने चैव त्रिरात्रफलमश्नु
ते एक एव तु यो भुंक्ते विमले कांस्यभाजने चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो ब
लमिति तत्र पद्मपत्रपलाशपत्रभोजनं गृहिव्यतिरिक्तविषये पलाशपद्मपत्रे
षु गृही भुंक्त्वैंदवं चरेत् ब्रह्मचारियतीनां च चांद्रायणफलं भवेदिति व्यासस्म

रणान् कांस्यपात्रं तु गृहस्थैकविषयं यत्यादीनां तु विधेः निषेधात् तदाह प्रचेताः
तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्
इति तस्य पात्रे भस्मीस्थापनीयं तदुक्तं कूर्मपुराणे पंचार्द्रो भोजनं कुर्यात् भस्मो
पात्रं निधाय तु उपवासेन तत्तुल्यं मनुराह प्रजापतिरिति तत्स्थापनं प्राणाहु
तिपर्यंतं यस्मात्तु यतिकामा दोषभोक्तव्यं तदाह व्यासः न्यस्तपात्रं तु भुंजीत पं
च ग्रासान् महामुने शेषमुद्धृत्य भोक्तव्यं स्थापनामत्रकारणं विप्रुषां दोषसंस्पर्शः
पादचैलरजस्तथा स्तुवे न भुंक्ते विप्रो हि पित्रर्थं तु न लुप्यते इति पेतं भोजने भस्मि
पात्रप्रतिष्ठापनं न लोपनीयमित्यर्थः उक्तपात्रनिहितमन्नं नमस्कुर्यात् तदुक्तं वृ
लपुराणे अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत्ततः अस्माकं नित्यमस्त्वेतदि
ति भक्त्या च वंदयेदिति वंदनानंतरं कृत्यमाह गोभिलः अथातः प्राणाहुति

पा॰मा॰
१४५

कल्यो व्याहृतिभिर्गायत्र्याभिमंत्र्य ऋतं त्वा सत्येन परिषिंचामीति सायं सत्यं त्वर्तेन
परिषिंचामीति प्रातः अंतश्चरसि भूतेषु गुहायां विश्वतोमुखः त्वं यज्ञस्त्वं विष्णु
स्त्वं वषट्कार आपो ज्योती रसोमृतं ब्रं प्रजापतिः ब्रह्म भूर्भुवः स्वरोम् अमृतोपस्तरण
मसीत्यपः पीत्वा दशहोतारं मनसानुद्रुत्य पंच ग्रासान्गृह्णीयात् प्राणा
य स्वाहेति गार्हपत्यमेवानेन जुहोति अपानाय स्वाहेत्याहार्यपचनमेवैते
न जुहोति व्यानाय स्वाहेत्याहवनीयमेवैतेन जुहोति उदानाय स्वाहेति सभ्यमे
वैतेन जुहोति समानाय स्वाहेत्यावसथ्यमेवैतेन जुहोति एते पंच मंत्राः प्रणा
वाद्याः कर्तव्याः तथा च शौनकः स्वाहांताः प्रणवाद्याश्च नाम्ना मंत्रास्तु वायवः
जिह्वयैव ग्रसेदन्नं दशनैर्न न संस्पृशेदिति जिह्वाग्रसने विशेष आश्वमेधि
के दर्शितः यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप तथा समाहितः कुर्या

राम
१४५

न्प्राणाहुतिमन्त्रैर्हुनेत् इति प्राणाहुतिष्वंगुलिनियममाह शौनकः तर्जनीमध्यमांगुष्ठा
लग्ना प्राणाहुतिर्भवेत् मध्यमानामिकांगुष्ठैरपाने जुहुयात्ततः कनिष्ठानामिकां
गुष्ठैर्व्याने न जुहुयात्ततः समानेत्वर्ध्वहस्तेन समुदायाहुतिर्भवेत् इति परिषेचना
नन्तरंभावी विशेषो भविष्यपुराणे दर्शितः भोजनात्किंचिदन्नाग्रं धर्मराजाय वै बलिं
दत्वा चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत् यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनां प्रे
तानां तृप्तयेऽक्षय्यमिदमस्तु यथासुखमिति कूर्मपुराणेऽपि महाव्याहृतिभिस्त्वन्नं
परिधायोदकेन तु अमृतोपस्तरणमसीत्यापोशानक्रियां चरेदिति बौधायनस्तु
सर्वमेतत्संगृह्याह सर्वविशपकावसानेषु प्रक्षालितपाणिपादो पआचम्य शुचौ सं
वृते देशे प्राङ्मुखमुपविश्य उद्धृतमाह्रियमाणं भूर्भुवः स्वरोमित्युपस्थाय वाचं यत्
छन्नं महाव्याहृतिभिः प्रदक्षिणमन्नमुदकं परिषिच्य सव्येन पाणिना विमुंचन्नं

पा॰ मा॰
१४६

मृतोपस्तरणमसीत्यपः पीत्वा पंचान्नेन प्राणाहुतिर्जुहोति प्राणे निविष्टोऽमृतं जुहो-
मि शिवो मा विश प्रदाहाय प्राणाय स्वाहा अपाने व्याने उदाने समाने निविष्ट इत्यादि-
नाय थालिंगमनुषंगः एवं पंचान्नेन तूष्णीं भूयो व्रतयेत् प्रजापतिं मनसा ध्यायेत् ॥
अथाप्युदाहरंति आसीनः प्राङ्मुखो श्नीयाद्वाग्यतोन्नमकुत्सयन् ॥ अस्कंदयंस्त-
न्मनास्त्वभुक्त्वाग्निं समुपस्पृशेत् सर्वभक्ष्यापूपकंदमूलफलमांसादीनि दंतैर्नावछे-
द्यान्नातिसुहितः अमृतापिधानमसीत्युपरिष्टादपः पीत्वा चांतो हृदयदेशमभि-
मृशति प्राणानां ग्रंथिरसि रुद्रो मा विशांतकस्तेनान्नेनाप्यायस्वेति पुनराचम्य दक्षि-
णपादांगुष्ठे पाणिं विस्रावयति अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः ईशः सर्व-
स्य जगतः प्रभुः प्रीणाति विश्वभुगिति हुतानुमंत्रणमूर्ध्वं समाचरेत् अग्नौ प्राणो नि-
विश्यामृतं हुतं शिवो मा विश प्राणास्तेनान्नेनाप्यायस्व श्रद्धामामयति श्रद्धयामुपादाने

हस्तः

पा॰ रम
१४६

ऋद्ध्यां समाने निविशेत्यादिर्यथालिंगमनुषंगः ब्रह्मणि म आत्मा अमृतत्वायेत्यत्र देशा
त्मानं योजयेत्सर्वक्रतुयाजिनामात्मयाजी विशिष्यत इति विष्णुपुराणे अश्नीयात्तन्मना भू
त्वा पूर्वं तु मधुरं रसं लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः प्राग्द्रवं पुरुषोश्नीयान्म
ध्ये च कठिनाशनः अंते पुनर्द्रवाशी तु बलारोग्ये न मुंचति भोजने कवलसंख्यामापस्तं
बः अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारि
अ णः इति ग्रासप्रमेधिकेपि वक्त्रप्रमाणपिंडांश्च ग्रसेदेकैकशः पुनः वक्त्राधिकं तु यः पिंडमा
श्नीयादुच्छिष्टं तदुच्यते पिंडावशिष्टमन्यच्च वक्त्रनिःसृतमेव च अभोज्यं तद्द्विजातीयां भुक्त्वा
चांद्रायणं चरेत् सदा चात्यशनं नोद्यान्नाति हीनं च कर्हिचित् यथान्नेन व्यथा न स्यात्तथा
भुंजीत नित्यश इति वृद्धमनुः पीत्वापोशानमश्नीयात्पात्रे दत्तमगर्हितं भार्यामृतेन कवा
सेन उच्छिष्टं शोषयेत्त्विति उच्छिष्टशोषणं तु घृतादिव्यतिरिक्तविषयं तदाह पुलस्त्यः

भोजनं तु न निःशेषं कुर्यात्प्रातः कथंचन । अन्यत्र दधिसक्तास्य पललद्रीद मध्वपइति एत
नु भोजनं सायं प्रातः कार्यं तद्गुक्तं मनुना सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितं नांतरा
भोजनं कुर्यादग्निहोत्रसमो विधिरिति गौतमः सायं प्रातस्त्वन्नमभिपूजितमनिंदन्भुं
जीतेति उदाहृतवचनसमूहेन प्रसिद्धं सांगं भोजनविधिं मूलवचनेयोभुंक्त इत्यनू
द्य वेष्टितशिरस्त्वादिकं प्रत्यवायाभिधानेन निषेधति एतच्च वर्ज्यान्तराणामप्युपल॥
क्षणं तानि च ब्रह्मपुराणे दर्शितानि यस्तु पाणितले भुंक्ते यस्तु तोयेन वलत्येत श्म
शानाभ्यंतरस्थो वा देवालयगतोथवा शयनस्थो न भुंजीत न पाणिस्थं न चासने॥
नार्द्रवासा नार्द्रशिरा न वापक्वान्नसंयुतं प्रसृतांगुलिभिर्यश्च तस्य गोमांसवच्चान्नं॥
न जीर्णे भोजनं कुर्यात्कुर्यान्नाति बुभुक्षितः हस्तस्थान्नपानोद्धृमास्थित यज्ञोपवी
तवान्न प्रसादितपादस्तु पादारोपितपाणिमान् नवाङ्गसर्विया स्थश्च नैपर्यंकमा

संx१

147

स्थितः नवेष्टितशिरा श्चापि नोत्संगकृतभोजनः नैकवस्त्रो दृष्टमध्यो नोपानत्कृतपादकः
नचर्मोपरि संस्थश्च चर्मवेष्टितपार्श्वभाक् ग्रासशेषं न चाश्नीयात् पीतशेषं पिबेन्न च
शाकमूलफलेक्षूणां दंतच्छेदैर्न भक्षयेत् बहूनां भुंजतां मध्ये नचाश्नीयात्त्वराश्रितः व
थानविकिरेदन्नं नोच्छिष्टः कुत्रचिद्व्रजेत् बृहस्पतिः नस्पृशेद्वामहस्तेन भुंजानोन्नं
कदाचन । नपादौ न शिरो वस्तिं नपदा भाजनं स्पृशेदिति उशनाः नोद्धृत्य मिष्टमश्नी
यात् बहूनां चैव पश्यतां नाश्नीयुर्वै स्वच्छं वत्तथा नैकस्य पश्यतः आदित्यपुराणे नोच्छि
ष्टो ग्राहयेद्दाज्यं जग्धशिष्टं न संत्यजेत् स्वयंभुक्तावशिष्टं तु नाद्यात्क्षुत्स्थितं त्वपीति
कूर्मपुराणेपि नार्द्धरात्रेन मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक् नभिन्नभाजने चैनम्भ व
स्थानं च पाणिषु नोच्छिष्टो घृतमादद्यान्न मूर्धानं स्पृशेदपि न ब्रह्म कीर्तयन्वापि नानिः
शेषं न भार्यया नागां देषु नवाकाशे नचदेवालयादिषु इति याज्ञवल्क्योपि नभार्यादृ

श्री

पा॰मा॰
१४८

र्शने स्त्रीयान्नेकवासानसंस्थित इतियत्तुब्राह्मणस्य योस्त्रीयादुच्छिष्टंवाकदाचन
नतस्यदोषमिच्छंतिनित्यमेवमनीषिणः उच्छिष्टमितरस्त्रीणांयोस्नीयाद्ब्राह्मणःक्व
चित् प्रायश्चित्तीसविज्ञेयःसंकीर्णोमूढचेतनइति नतत्सर्वथादोषाभाव
प्रतिपादनपरंकदाचनेतिवचनात् अतएवादित्यपुराणे ब्राह्मणस्यभार्ययाः
सार्द्धंकचिद्भुंजीत्याच्युति अधोवृक्षास्त्रियासार्द्धंभुक्त्वापततितत्क्षणात् वृद्ध
मनुरपिनपिबेन्नचभुंजीतद्विजःसव्येनपाणिनानैकहस्तेनचजलंशूद्रेणावर्जि
तंपिबेत् पिबतोयत्पतेत्तोयंभाजनेमुखनिःसृतं अभोज्यंतद्भवेदन्नंभोक्ताभुं
जीतकिल्बिषंपीतावशेषितंतोयंब्राह्मणेनपुनःपिबेत् पिबेच्चयदितन्मोहा
द्द्विजश्चान्द्रायणंचरेदिति अत्रिः तोयंपाणिनखाग्रेषुब्राह्मणोनापिबेत्क्वचित्
सुरापानेनतत्तुल्यमित्येवंमनुरब्रवीदिति शातातपः उद्धृत्यवामहस्तेनयः

राम
१४८

148

५५

न्तोयंपिबतिद्विजः सयापानेनतत्तुल्यंमनुराहप्रजापतिरिति आपस्तम्बेपिकेपानीया
निपिबेद्येनतत्पात्रंद्विजसत्तमः अनुच्छिष्टंभवेत्तावद्यावद्भूमौननिक्षिपेदिति शं
खः नानियुक्तोनासनस्थःप्रथमंमश्नीयान्नाधिकंदद्यान्नातिसंगृह्णीयादिति शाता
तपोपि अग्रासनोपविष्टस्तुयोभुंक्तेप्रथमंद्विजः बहूनांपश्यतांसोऽज्ञःपङ्क्त्याहरः ङ्क्त्या=
तिकिल्बिषमिति गोभिलः एकपंक्त्युपविष्टानांविप्राणांसहभोजने यद्येकोपि
त्यजेत्पात्रंनाश्नीयुरितरेप्यनुमोहात्तुभुंक्तेयस्तुततःसांतपनंचरेदितरे भुंजाने
षुतुविप्रेषुयस्तुपात्रंपरित्यजेत् भोजनेविघ्नकर्तासौब्रह्महापितथोच्यतइति
वाग्यमनंप्रक्रम्यपुराणे स्नास्यतेवरुणःशक्तिंजुहृतोग्निःश्रियंहरेत् भुंजतो
मृत्युरायुष्यंतस्मात्तन्नियतश्चरेदिति तदेतत्काष्टमौनाभिप्रायेण तत्रपंचग्रासा
द्वाग्विषयं तथाचवत्समनुः अनिंदन्भक्षयेन्नित्यंवाग्यतोन्नमकुत्सयन् पंचग्रा

पा.मा.
१४२

सान्महत्तामौनंप्राप्नात्स्वाध्यायनंमहद्दिति आश्वमेधिके मौनीवाप्यथवामौनीप्रहृष्टः
संयतेंद्रियःभुंजीतविधिवद्विप्रोनवोच्छिष्टानिचर्वयेद्दिति शातातपोपि हस्तदत्ताति
चान्नानिप्रत्यक्षलवणंतथामृत्तिकाभक्षणंचैव गोमांसाशनवत्स्मृतमिति पैठी
नसिःकपिलवर्णांव्यंजनंचैवघृतंतैलंतथैवच लेह्यंपेयंचविविधंहस्तदत्तंनभक्ष
येत्दर्व्यादेयंघृतान्नंतुसमस्तव्यंजनानिच उदकंपरिपक्वान्नंयोदर्व्यादातुमिच्छ
तिसभ्रूणहासुरापस्तुस्तेनोगुरुतल्पगइति आश्वमेधिके उदक्यामपिचंडा
लंश्वानंकुक्कुटमेवच भुंजानोयदिपश्येत्तुतदन्नंतुपरित्यजेत् केशकीटावपन्नं
चमुखमारुतवीजितं अन्नंतद्राक्षसंविद्यात्तस्मात्तत्परिवर्जयेद्दिति कात्या
यनः चंडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमः भुंजीतग्रासमात्रंतुदिनमेक
मभोजनमिति गौतमोपि कालश्चमराणांचचक्रस्योलूखलस्यवा एतेषांनिन

राम
१४२

दं यावन्नावत्कालमभोजनमिति बृहस्पतिरपि अप्येकपङ्क्त्यां नोऽश्नीयाद्ब्राह्मणैः
स्वजनैरपि को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् एकपङ्क्त्युपविष्टानां दुष्कृतं यद्दु
रात्मनां सर्वेषां तत्समं तावद्यावत्पङ्क्तिर्न भिन्नेति इति पङ्क्तिभेदप्रकारमपि स एवाह अ
ग्निना भस्मना चैव स्तम्भेन सलिलेन च द्वारेणैव च मार्गेण पंक्तिभेदो बुधैः स्मृतः यमो
पि उदकं वा तृणं भस्म द्वारं पंथास्तथैव च एभिरन्तरितं कृत्वा पंक्तिदोषो न विद्यत इति
तदेवं स्मृतिवचनोक्तवेष्टितशिरस्त्वादिविवर्जनोपलक्षिता नियमविशेषाः दर्शिताः त
था च स्मृतिवचनं यो वेष्टितशिरा भुंक्ते यो भुंक्ते दक्षिणामुखः वामपादकरो भुंक्ते तद्वै
 रक्षांसि भुंजते इति दक्षिणामुखत्वनिषेधो नित्यभोजनविषयः काम्ये तु तद्विधाना
त् तथा च मनुः आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुंक्ते
ऋतं भुंक्ते उदङ्मुख इति गोभिलोऽपि दक्षिणामुखत्वं प्रतिषेधति प्राङ्मुखो वाग्यतः

पा॰ मा॰
१५०

तो विप्रः प्रतीच्यां वा यथासुखं उत्तरे पितृकार्ये च दक्षिणां तु विवर्जयेदिति वामपादक
दः वामपादे कनो यस्यासौ वामपादकः यो वामपादक नो भुंक्ते पश्चाद्धास्थित्वा भुंक्ते ।
तैः सर्वैर्ब्रह्मघ्नेन द्दत्तां सि भुंजनेन स्वयं प्राणाग्नि होत्रादि फलं प्राप्नोतीत्यर्थः ।
मुक्तंगा दास गामित्वं कूर्मपुराणेपि दर्शितं यो भुंक्ते वेष्टितशिरा यश्च भुंक्ते वि
दिङ्मुखः सोपानत्कश्च यो भुंक्ते सर्वं विद्यात्तदासुरमिति अभिप्रेतस्य भोज
नविधे कर्त्तव्यांगानि कर्त्तव्यानि तत्र देवलः भुक्तेच्छिष्टं समादाय सर्वस्मात्किं
चिदाचमन् उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवीति तत्र मंत्रः रौरवे
पुण्यनिलये पद्मार्बुदनिवासिनां प्रार्थितानां सर्वभूतानाम क्षय्यमुपतिष्ठतामि
ति गर्गव्यासोपि ततस्त्वन्नः स्वन्मृतापिधानमसीत्यपः प्राश्य तस्मात् देशान्न

राम
१५०

नागपसृत्य विधिवद्दाचामेदिति स चाचमन प्रकारो देवलेन दर्शितः भुक्त्वा

म

152

चामेद्यथोक्तेनविधानेनसमाहितः शोधयेन्मुखहस्तौ चमृद्गुभिर्घर्षयेत् नपितच्चघर्षि
तंतर्जन्यानकर्त्तव्यं तदाहगौतमः गंडूषस्याथसमयेतर्जन्यावक्त्रचालनं कुर्वीतियदि
मूढात्मारोरवेनरकेपतेदिति व्यासः हस्तप्रक्षाल्यगंडूषंपःपिबेद्यदिचद्विजःसदै
वाशुपितंश्चैवस्वात्मानंचैवघातयेदिति तस्मिन्नाचमनंकुर्यात्पात्रभांडेषुभुक्त
वानपद्युतिष्ठत्यनाचांतोभुक्तवानासनात्ततः स्नानंसद्यःप्रकुर्वीतिसोन्यथा
प्रयतोभवेदिति कूर्मपुराणे अमृतापिधानमसीत्ययःपिबेत आचांतः
पुनराचामेदायंगौरितिमंत्रतः द्रुपदावात्रिरावृत्यसर्वपापप्रणाशनीं प्राणा
नांग्रंथिरसीत्यालभेतहृदंततः आचम्यांगुष्टमात्रीयपादांगुष्ठेतुदक्षिणे
निःस्रावयेद्धस्तजलमूर्द्ध्वहस्तःसमाहितः कृतानुमंत्रणंकुर्यात्श्रद्धायामिति
मंत्रतः अथाक्षरेणस्वात्मानंयोजयेद्ब्रह्मणेतिहि सर्वेषामेवयागानामात्म

यागः पदः स्मृतः योनेन विधिना कुर्यात्स याति ब्रह्मणः पदमिति अत्रिः आचां
तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं उद्धृतेऽप्यशुचिस्तावद्यावन्नोत्सृज्यते मही
भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान् आसनादुत्थितस्तस्माद्यावन्न
स्पृशते महीमिति शातातपोपि आचम्य पात्रमुत्सृज्य किंचिद्दक्षिणपाणि
ना मुखान्प्राणान् समालभ्य नाभिं पाणितलेन च भुक्त्वैव प्रतिष्ठेत न चा
प्यार्द्रेण पाणिना पाणिमग्निं समाधाय स्पृष्ट्वा चाग्निं समाहितः जातिश्रैष्ठ्यं
समाप्नोति प्रयोगकुशलो नर इति विष्णुपुराणेऽपि स्वस्थः प्रशान्तचित्तस्तु कृतासन
परिग्रहः अभीष्टदेवतानां तु कुर्वीत स्मरणं नरः अग्निराप्याययेद्धातुं पार्थिवं
पवनेरितः दत्तावकाशो नभसा जरयेदस्तु मे सुखं अन्नं बलाय मे भूमेरपामग्न्य
निलस्य च भवत्वेतत्परिणतं ममास्त्वव्याहतं सुखं प्राणापानसमानानामुदान

155

व्यानयोस्तथा अन्नं पुष्टिकरं चास्तु ममास्त्वव्याहतं सुखं अग्नाविव ग्निर्वै जुवान लक्ष
भुक्तं मयान्नं जरयत्व शेषं सुखं च मे न त्वदिरणामसंभवं यच्छत्वरोगं मम चास्तु देहे
विष्णुः समस्तेंद्रियदेहदेही प्रधानभूतो भगवानथैकः सत्येन तेनान्नमशेषमन्नं
आरोग्यदं मे परिणाममेतु विश्वस्य नातिथेवान्नपरिणामश्चैव तथा सत्येन ते
न वै भुक्तं जीर्यत्वन्नमिदं तथा इत्युच्चार्य स्वहस्तेन परिमृज्यात्तथोदरं अना
यासप्रदायी नि कुर्यात्कर्माण्यतंद्रित इति मार्कंडेयोपि भूयोप्याचम्यकर्तव्यं
ततस्ताम्बूलभक्षणमिति अत्रवसिष्ठः सपूगं च सुपत्रं चूर्णेन च समन्वितं अ व
दत्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद् बुधः एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवे
त् अति श्रेष्ठं त्रिपूगं च अधिकं चैव दुष्यति पर्णमूले भवेद्व्याधिः पर्णाग्रे
पापसंभवः चूर्णपर्णं हरेदायुः शिरा बुद्धि विनाशिनी तस्मादग्रं च मूलं च वाशि

पा॰मा॰
१५२

वोचेव विशेषतः चूर्णपर्णविजीर्यत्वानाम्बूलं खादयेद्बुध इति यदिदं भोजनं प्र
तिरूपितं तद्ग्रहणकाले प्रतिषिध्यते तदाह मनुः चंद्रसूर्यग्रहे नाद्यादद्यात्स्ना
त्वा विमुक्तयोः अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनीति ग्रहणकाले स्पर्शमार
भ्य मोक्षपर्यंतो ग्रहणकालः तस्मिन्काले न भुंजीत किंतु राहुणा चंद्रसूर्ययोः
मुक्तयोः सतोः पश्चात्स्नात्वा भुंजीत यदा तु ग्रस्तावेवास्तमयस्तदा परेद्युर्विमुक्तौ तौ दृ
ष्ट्वा भुंजीत न केवलं ग्रहणकाले भोजनाभावः किंतु ग्रहणात्प्रागपि तदाह
व्यासः नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात् ग्रहकाले च नाश्नीया
त्स्नात्वाश्नीयाच्च मुक्तयोः मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा अमुक्त
योरस्तगयोर्दृष्ट्वा परेऽहनीति एवं कालभोजननिषेधविशेषमाह वृद्धव
सिष्ठः ग्रहणं तु भवेदिंदोः प्रथमादधियामतः भुंजीतावर्तनात्पूर्वं प्रथमे प्रथ

उ

राम
१५२

माहधः रवेश्चावर्तनादूर्ध्वमर्वागेव निषीध्यतः चतुर्थे प्रहरे चेत्स्याच्चतुर्थप्रहरा
दध इति नात्रैप्रथमार्द्धमात्पूर्वं ग्रहणं चेदावर्तनात् मध्याह्नात्पूर्वं भु
जीत तु त्रिपश्चिमयामे चेद्रात्रिप्रथमयामादर्वाग्भुंजीत अत्र ह्यस्तचतुर्थप्रहरे चेद्
वि ग्रहश्चेद्रात्रेश्चतुर्थप्रहरादर्वाग्भुंजीतेत्यर्थः निशीथो मध्यरात्रिः शशिग्रहे
यामत्रयपरिव्यवधानमपेक्षितं सूर्यग्रहणे तु यामचतुष्टयेनेति तात्पर्यार्थः त
था च वृद्धगौतमः सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं चंद्रग्रहे तु यामांस्त्री
न्बालवृद्धातुरैर्विनेति बालवृद्धातुरविषये मत्स्यः अपराह्णे न मध्याह्ने मध्याह्ने
तु संगवे भुंजीत संगवे चेत्स्यान्न पूर्वं भुंजिमाचरेदिति समर्थस्य तु भोजने प्राय
श्चित्तमुक्तं कात्यायनेन चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति तस्मिन्नेव दि
ने भुक्त्वा त्रिरात्रेणैव शुध्यति शशिग्रहणे यामत्रयस्यापवादमाह वृद्धवसि
ष्ठः ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति ग्रस्तास्तमये विशेषमाह

पा॰ मा॰
१५३

मृत्युः अस्तावेवास्तमानं तु रवीन्दू ग्रस्तोपरि हितयोः पर्वेद्युःकदयेऽस्तात्प्राग्व्यव हरेन्न
र इति वृद्धगार्ग्योपि संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ तदहर्नैव भुंजी
त रात्रावपि कदाचनेति विष्णुधर्मोत्तरेऽपि अहोरात्रे न भोक्तव्यं चंद्रसूर्यग्रहे
यदा मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति नन्वस्तमयोत्तरकाले चाक्र
चंद्रदर्शनं न संभवतीति चेत् दर्शनमात्रेण शास्त्रविज्ञानस्य विवक्षितत्वात् त
दाह वृद्धगौतमः चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः याहो विमुक्तिं वि॰
ज्ञाय स्नात्वा कुर्वीत भोजनमिति एवं नाडी पर्वेद्युःकदयात्प्रागपि शास्त्रविज्ञान
संभवात्तदेवं भोजनं प्रत्यज्येतमेवं तयोः पर्वेद्युःकदये प्राग्व्यव हरेदहोरात्रे न भो
क्तव्यमिति वचनद्वयेन तत्प्रसक्तेः यत्तु स्कंदपुराणे यदा चेद्ग्रहस्नातनि॰
शीथात्परतो भवेत् भोक्तव्यं नात्र पूर्वाह्णे नापराह्णे कथंचन पूर्वं निशीथात्सं
लोयदा चेद्ग्रस्त एव भवेत् तदा दिवा न कर्तव्यं भोजनं शिखिवाहन इति तदिदं या

राम
१५३

मत्रयामि प्रायं चंद्रग्रहेतु यामां स्त्री निति विशेषस्य कृष्णगौतमे नाभिधानात् पाप
क्षयकामो ग्रहणादिनमुपवसेत् तदाह दक्षः अयने विषुवे चैव चंद्रसूर्यग्रहे
तथा अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यत इति पुत्रीतु नोपवसेत् तदाह ना
रदः संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवा
न् गृहीति ग्रस्तास्तमये तु पुत्रिणोप्युपवास एव अहोरात्रे न भोक्तव्यमिति भोजन
प्रतिषेधात् कश्चित्तु ग्रहणं विशेषस्नानादिकं न कर्तव्यं तदुक्तं षड्विंशन्मते सूर्य
ग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदि
ति एतच्च भागविशेषव्यवस्थितानां ग्रासमोक्षदर्शन योग्यत्वाभावे द्रष्ट
व्यं इति भोजनप्रकरणम् इत्थं निरूपिते न भोजनांते न कर्तव्यजातं दक्षे
णादर्शितं भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् इति हासपुराणानि

धर्म्मशास्त्राणिवाभ्यसेत् वृथाविवादवाक्यानिपरिवादांश्चवर्जयेदिति विष्णुपु
राणेपिअनायासप्रदायीनिकुर्यात्कर्माण्यतंद्रितः सच्छास्त्रादिविनोदेनसन्मा
र्गादविरोधिनादिनंनयेत्ततंसंध्यामुपतिष्ठेत्समाहित इतियाज्ञवल्क्योपि अहः
शेषंसमासीनःशिष्टैरिष्टैश्चबंधुभिः उपास्यपश्चिमांसंध्यांहुत्वाग्नींस्तानुप
यास्यवाभृत्यैःपरिवृतोभुक्त्वानातितृप्तोथसंविशेदिति उपास्यचेति चकाराद्सा
वैश्वदेवाह्निकंसमुच्चिनोतिसायंसंध्यात्तोमौनिरूपितोवैश्वदेवादोकश्चिद्विशे
षो विष्णुपुराणेदर्शितः पुनःपाकमुपादायसायमप्यवनीपते वैश्वदेवनि
मित्तंवैपत्न्यासार्द्धंबलिंहरेत् तत्रापिश्वपचादिभ्यस्तथैवान्नविसर्जनं अ
तिथिंचागतंतत्रस्वशक्त्यापूजयेद्बुधः दिवातिथौतुविमुखेगतेयत्पातकं
कैनृप तदेवाष्टगुणंपुंसांसूर्योढे विमुखेगतेतस्मात्स्वशक्त्याराजेन्द्र

161

स्त्रयेदिमतिथिं न वंः पूजयेत् पूजिते तस्मिन् पूजिताः सर्वदेवताः कजपादादि शौच
श्च भुक्त्वा सायंतनेन तोमहीं गच्छेत् श्रयामस्तुटितं न ततो दारुकमंचीनं पेति अहः शेषादि
कृत्यं शयनप्रकारमाह हारीतः सुप्रक्षालितचरणतलो मंचं कृत्वा उदकपूर्ण
घटादिमंगलोपेतः आत्माभिरुचितां मनुपहतां सुप्रमार्जितामिति पठेत् श
य्यामधिष्ठाय रात्रिसूक्तं जपित्वा विष्णुं नमस्कृत्य सर्पापसर्प भद्रं इति श्लोकं
जपित्वेष्टदेवतास्मरणं कृत्वा समाधिमास्थाय यात्यांश्चवे हिकाल्मे चान्सावि
त्रीं जपित्वा मोगल्यश्च तेशं खे चम्परावनं दक्षिणाशिरा स्वपेदिति दक्षिणा
शिरा इति प्रदर्शनार्थं तथा च विष्णुपुराणे प्राच्यां दिशि शिरः शस्तं या
म्यायामथवा नृप सदैव स्वपतः पुंसो विपरीतं तु रोगदमिति गार्ग्योपि
स्वगेहे प्राक्शिरा श्वशुरगेहे दक्षिणाशिराः प्रत्यक्शिराः प्रवासे तु

न

नकदाचिद्दुदकक्रीडाः पुनरोपि नात्रिसत्कंजपेत्स्नात्वा सर्वांप्सु सुखशायिनः
नमस्कृत्वाप्रयं पविष्टं समाधिस्थं स्वयेन्निशीति सुखशायिनो गोभिले न दर्शि
ताः अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः कपिलो मुनिरास्तीकः पंचैते
सुखशायिनः शयने वर्जनीयानाह मार्कंडेयः शून्यालये श्मशाने चैकवृ
क्षे चतुष्पथे महादेवगृहेवापि मातृवेश्मनि न स्वपेत न यक्षनागायतने स्कंद
स्यापि तथैव तथाकुलच्छायासु च तथा शर्करालोष्टपांसुषु न स्वपेज्जलेतथा गतेवि
नावीतां कथं चैव धान्यगोविप्रदेवानां गुरूणां च तथोपरि न चापि भग्नश
यने नाशुचो नाशुचिः स्वपेन्नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः नाकाशे
सर्वशून्ये च न च चैत्यद्रुमे तथा विष्णुरपि नार्द्रवासाः स्वपेन्न पलाशशयने न पं
चदारुकृते न च भग्नकृते न विद्युद्दग्धे नाग्निप्लुष्टे न वालमध्येन चाविम

ध्ये नद्यादिमध्ये नधान्येन गोगेहे न कुलाश्रमस्थदारस्म मुपवि नोच्छिष्टो न दिवेति ॥
विष्णुपुराणेऽपि नाविशालां नवैभग्नां नासमां मलिनां न च न चर्जंतुमयीं मधि शय्यां
तिष्ठेदनास्तृतां इति उशनानैलाभ्यक्तः शुचिः शारुखपेन्नाही दिवि नः कृष्णचर्मरणीतिव
न
ल: प्रदोषपश्चिमौ यामौ वेदाभ्यासरतो येन् यामद्वयं शयानस्तु ब्रह्मभूयाय क
ल्पत इति संध्यास्नानमित्यादयस्यो वेष्टितशिरा इत्यंतेन गंधसंदर्भेण स्कंदपु
लक्षणाभ्यामादिकं संहिताकृनिरूपितं एतस्य कन्याकेषु यः अकं रोगस्तु प्रत्यवायः
तदुक्तं कूर्मपुराणे इत्येतदाखिलं प्रोक्तम हन्यहनि वैमया ब्रह्मारणानां कृत्यजात
मपवर्गफलप्रदं नास्तिक्यादथवालस्याद्ब्रह्मारणो न करोति यः सयाति नरकान्
घोरान् काकयोनौ प्रजायते नान्यो विमुक्तये पंथा मुक्त्वाश्रमविधिं स्वकं तस्मात्क
र्माणि कुर्वीत तुष्टये परमेष्ठिन इति इत्यपरार्धो गोमित्र वंशजेन नवाराणस्या

पा॰मा॰ १५५

साधारणधर्मानतिक्रम्य तत्र साधयन्नाह । साधारणधर्मप्रसंगागतमाह्निकं प्रदिस
मापय्येदानीं प्रकृतानेव क्रमप्राप्तानभिषिक्तस्य क्षत्रियस्यासाधारणधर्मानाह ॥
अव्रता नधीयाना यत्र भैक्षचरा द्विजाः तं ग्रामं दंडयेद्राजा चौरभक्तप्रदो हि सः
क्षत्रियो हि प्रजा रक्षेच्छस्त्रपाणिः प्रदंडवान् निर्जित्य परसैन्यानि क्षितिं धर्मेण
पालयेत् ॥ पुष्पं पुष्पं विचिन्वीयान्मूलच्छेदं न कारयेत् मालाकार इवारामे न यथां
गारकारकः इति हि विधो हि राजधर्मः दुष्टशिक्षा शिष्टपरिपालनं च तत्राद्येन
श्लोकेन दुष्टशिक्षा प्रतिपाद्यते व्रतशब्देनात्र ब्रह्मचर्यादिकर्तव्यकर्माध्यादिवर्ज
नमभिप्रेतं तथा च याज्ञवल्क्यो व्रतमपीड्य त्वितु क्त्वा विवक्षितेन तद्व्रतं स्पष्टी
चकार मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं भास्करालोकनाश्लील
लपरिवादांश्च वर्जयेदिति यद्यपि स्वगृह्यप्रसिद्धानि प्राजापत्यादीनि चत्वारि

छ४ ५८ ५९

अव्रताद इति मनुः भा: ४

यx२

रम १५५

त्रवृत्तशाद्वाभिधियानितदुभयविधवृत्तरहिताः स्वाध्यायमप्यनधीयानावृत्तचा-
रित्रा यत्र ग्रामे भैक्ष्यमाचरंति तं ग्रामं दंडयेत् यतः स ग्रामश्चोरसदृशेभ्यः भक्तम-
न्नं प्रयच्छति अनेन वचनेन विहितमननुष्ठानां प्रतिषिद्धमनुतिष्ठतां च सर्वेषां दा-
ण्डादंडनीयत्वमुपलक्ष्यते अत एव नारदः योयो वर्णोऽपहीयेत यश्चोद्रेकमनुव्र-
जेत् तंतं दृष्ट्वा स्वतो मार्गात् प्रच्युतं स्थापयेत्पथि अशास्त्रोक्तेषु पापयुक्तेषु क-
र्मसु प्रसमीक्ष्यात्मनो राजा दंडं दंड्येषु पातयेदिति याज्ञवल्क्योपि कुलानि
जातीः श्रेणीश्च गणान् जानपदानपि स्वधर्माच्चलितान् राजा विनीय स्थापये-
त्पथीति मनुरपि नाचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः नादंड्यो नाम राज्ञो-
ऽस्ति यः स्वधर्मे न तिष्ठतीति याज्ञवल्क्योपि अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातु-
लोपि वा नादंड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकादिति दंडपदं दंडनं प्रसं

166

२

पा.मा.
१५७

शाति याज्ञवल्क्यः योदंड्यान् दंडयेद्राजा सम्यग्वध्यांश्च घातयेत् इष्टं स्यात् क्रतुभिस्ते
न समाप्तवरदक्षिणैरिति अदंड्यदंडनं निषेधति मनुः अदंड्यान् दंडयन्राजा दंड्यां
श्चैवाप्यदंडयन् अयशो महदाप्नोति नरकं चैव गच्छतीति दंडश्च द्विविधः शारीरो
र्थदंडश्चेति यथाह नारदः शारीरश्चार्थदंडश्च दंडस्तु द्विविधः स्मृतः शारीरस्ता
डनादिस्तु मरणांतः प्रकीर्तितः काकिण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैव चेति राज्ञो
दंडयितृत्वं महता प्रबंधेन संभावयति मनुः अराजके हि लोकेस्मिन्सर्वतो वि
द्रुते भयात् र क्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः इंद्रानिलयमार्काणामग्ने
श्च वरुणस्य च चंद्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः यस्मादेषां सुरेंद्राणां
मात्राभ्यो निर्मितो नृपः तस्मादभिभवत्येष सर्वभूतानि तेजसा तपत्यादित्यव
च्चैष चक्षूंषि च मनांसि च न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुं सोग्निर्भव

राम
१५७

पं

तिवायुश्च सोर्कः सोमः स धर्मराट स कुवेरः स वरुणः स महेंद्रः प्रभावतः बालोपि
नावमंतव्यो मनुष्य इति भूमिपः महती देवता ह्येषा नररूपेण तिष्टति एकमेव
दहत्यग्निर्नरं दुरुपसर्पिणं कुलं दहति राजाग्निः सपशुद्रव्यसंचयं कार्यं सोवे
क्ष्य शक्तिं च देशकालौ च तत्वतः कुरुते धर्मसिध्यर्थी विश्वरूपं पुनः पुनः तस्य
प्रसादे पद्मा श्री विजयश्च पराक्रमे मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि
सः यस्तु तं द्वेष्टि संमोहात्स विनश्यत्यसंशयं तस्य ह्याशु विनाशाय राजा प्रकु
रुते मनः तस्माद्धर्मं यमीष्टेषु स व्यवस्येन्नराधिपः अनिष्टं चाप्यनिष्टेषु तं धर्मं
न विचालयेत् तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजः ब्रह्मतेजोमयं दंड
मसृजत्पूर्वमीश्वरः तं राजा प्रणयन् दंडं त्रिवर्गेणाभिवर्धते इति मनुः प्र
भावतेपरा हीनादेवताः सर्वा राजा प्रत्यक्षदेवता प्रसादश्च प्रकोपश्च प्रत्यक्षौ यस्य

दो ८४

पा॰ मा॰
१५८

दृश्यते राजा माता पिता चैव राजा कुलवतां कुलं राजा सत्यं च धर्मश्च राजा हि तत्का
रो न रणां कालो वा कारणं राज्ञो राजा वा कालकारणं इति ते संशयो माभूद्राजा का
लस्य कारणं राजमूलो महाराज धर्मो लोकस्य लक्ष्यते प्रजा राजभयादेव न खा
दंति परस्परमिति ननु दंडयेत्प्रजा इति प्रजापालनस्यापि दंडापितत्वमुक्तं तत्कथं क्ष
त्रियस्यासाधारणो धर्मः मैवं राजशब्दस्य क्षत्रियविषयत्वेनावेष्ट्यधिकरणोक्ति
सिद्धत्वात् ननु जनरंजनाद्राजत्वं महाभारते सिद्धिरंजनात्खलु राजत्वं प्रजानां
पालनाद्पीति वार्हं संभवत्येव च क्षत्रियस्यापि रंजकत्वं विवक्षित्वा प्रथमं प्रजारक्षणा
मित्युक्तं अत एव याज्ञवल्क्यः प्रधानं क्षत्रिये कर्म प्रजानां परिपालनमिति मनुरपि
नदेवादौ प्रदर्शयति प्रजानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्ष
त्रियस्य समादिशेदिति शांतिपर्वण्यपि नृपाणां परमो धर्मः प्रजानामेव पालनं

राम
१५८

दृष्टफलभोक्ता हि राजा धर्मेण युज्यते वर्णानामाश्रमाणां च राजा भवति पालकः स्वे
स्वे धर्मे नियुंजानः प्रजाः स्वाः पालयेत्सदा पालनेनैव भूतानां कृतकृत्यो महीपतिः स
म्यक्पालयिता भागं धर्मस्याप्नोति पुष्कलं यजते यदधीते च यद्ददाति यदर्चति राजा
षड्भागभाक्तस्य प्रजा धर्मेण पालयन्निति सर्वश्चैव प्रजा नित्यं राजा धर्मेण पाल
येत् उत्थानेन प्रसादेन पूजयेच्चापि धार्मिकान् राज्ञा हि पूजितो धर्मस्ततः सर्व
त्र पूज्यते पद्मदा चरते राजा तत्प्रजानां स्मरो चेत मार्कण्डेयपुराणे वत्सनाम्ना लि
क्तेन प्रजारंजनमाहितः कर्तव्यमविरोधेन स्वधर्मस्य महीभृता पालनेनैव भू
तानां कृतकृत्यो महीपतिः सम्यक्पालयिता भागं धर्मस्याप्नोति पुष्कलमिति ॥
ब्रह्माण्डपुराणे यदन्नाकृते धर्मे प्रजा धर्मेण पालयन् दशवर्षसहस्राणि तस्
स्य भुंक्ते महत्फलं मन्वपि सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः अधर्मादपि

पा॰ मा॰
१५२

षड्भागो भवत्येव रक्षणात् । रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन् यजे
ते ऽहरहर्यज्ञैः सहस्रशतदक्षिणैः । योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः
प्रतिभोगं च दण्डं च स सद्यो नरकं व्रजेत् । रक्षणीयाश्च प्रजा भयमापन्नाः भयं च
तासां द्वेधा संपद्यते चोरव्याघ्रादिभ्यः परसैन्येभ्यो वा अत उभयनिवारणा
य प्रदण्ड उवानि तिपरसैन्यानि निर्जित्येति चोक्तं । एतच्च निवारणं क्षत्रियस्यैव
कुतो साधारणमित्याशंक्य तच्छेदनत्वेन शस्त्रपालित्वे वर्णितं तच्च क्षत्रियस्यै
व तथा च मनुः । शस्त्रास्त्रभृत्वं क्षत्रस्य वणिक्पशुकृषी विशः । आजीवना
र्थं धर्मस्तु दानमध्ययनं यजिरिति । आनुशासनिकेपि क्षत्रियं प्रकृत्य पठ्यते
उत्साहः शस्त्रजीवित्वं तस्य धर्मः सनातनः शस्त्रपालित्वेन च युद्धोपकरणा
नि सर्वाण्युपलक्ष्यते तानि च शान्तिपर्वणि दर्शितानि । षष्ट्यस्तोमराः खड्गानि

राम
१५९

शिताश्चापराधाः फलकात्यायन मालिपविकल्प्यान्यनेकशः प्रदंडवानित्य
नेन चोमादिशिलाविवर्दिता पद्मयावापदेवचनस्तोक्तातघापितत्रसाप्राधा
न्येन प्रतिपादिता अत एव प्रजानन्दिनासाधनत्वेनोतिनयोनकत्नादंडप्रकारमा
ह मनुः अनुबंधंपरिज्ञायदेशकालौ चतत्त्वतः साराऽपराधौ चालोच्य दंडं
दंड्येषु पातयेत् विष्णुः अपराधानुरूपं तद्धात्वेषु ज्ञात्वा जातिधनं च यः दंडं प्र
कल्पयेद्राजा सामंतव्रा त्वरोः स एवाग्धिगवधः स्वकं चैव चतुर्धा कल्पितो
दमः पुरुषो दोषविभवं ज्ञात्वा संपरिपालयेत् बृहस्पतिः तान्विप्रान्वाग्दं
डेनैव दंडयेत् विनाविनोननांश्चान्यान्दोषिरोषेण दंडयेत् महापराध
युक्तांश्च वधदंडेन दंडयेत् तथा च कात्यायनः मित्रादिषु प्रयुंजीत वाग्दंडं
धिक्तपस्विनां यथोक्तं तस्य तत्कुर्यं वन्मं साधकाल्पितं अधार्मिके त्रिभिर्न्या

172

पा॰ मा॰
१६०

येर्त्रिगर्ह्णीयात् प्रयत्नतः निरोधनेन बंधेन विविधेन वधेन च मनः दृष्टास्यातो
निर्दंडस्य मनुः स्वायंभुवोऽब्रवीत् त्रिषु वर्णेषु नानि स्युरक्षतो ब्राह्मणो व्रजेत् उपस्थ
मुदरं जिह्वा हस्तौ पादौ च पंचमं चक्षुर्नासे च कर्णौ धनं देहस्तथैव च मोडयप्र
र्णांनको दंडो ब्राह्मणस्य विधीयते पुरुषाणां कुलीनानां नारीणां विशेषतः बृ
हस्पतिः जगत्सर्वं निहन्यात् ब्राह्मणस्य न तत्समं तस्मात्तस्य वधं राजा मनसा
पि न चिंतयेत् अवध्यान् ब्राह्मणानाहुः सर्वपापेष्ववस्थितान् पद्यप्रि
षु कुशलं तत्र प्रजा समाचरेत् राष्ट्रादेनं बहिष्कुर्यात् समग्रधनमक्षतं एवं
धर्मप्रवृत्तस्य राज्ञो दंडधरस्य च पृष्ठोऽभिन्नृपयते लोके स्वर्गे वासस्तथाक्षय
इति पद्मसैन्यनिर्जयस्तु शांतिपर्वणि दर्शितः चैत्रे वा मार्गशीर्षे वा से
नायोगः प्रशस्यते पक्वसस्या हि पृथिवी भवत्यापोवती नदो नैवाति

च

सम
१६०

५६

शीतो नात्युष्णः कालो गच्छति भारत तस्मात्तदा योजयीत परेषां व्यसनेषु वा एते
हि योगाः सेनायाः प्रशस्ताः परवाधने जलवांस्तृणवान्मार्गः समो गम्यः प्रशस्यते
चारैः सुविहिताभ्यासः कुशलैर्वनगोचरैः सन्नद्धान्पृष्टतः कृत्वा युध्येपुरचला
इव यमो वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः अकर्दमामनुदकाममर्यादा
मलोष्टकां अश्वभूमिं प्रशंसन्ति ये युद्धकुशला जनाः समानिरुदकाकाशार
थभूमिः प्रशस्यते नीचद्रुमा महाकक्षा सोदका हस्तियोधिनां बहुदुर्गमहाक
क्षा वेणुवेत्रतिरस्कृता पदातीनां च भूमिः पर्वतोपवनानि च पदातिब
हुला सेना दृढा भवति भारत तथाश्व बहुला सेना सुदिनेषु प्रशस्यते पदातिना
गबहुला प्रावृट्काले प्रशस्यते गुणानेतान्प्रसंख्याय युक्तं देशं तु योजयेदिति
मनुरपि पदातेरुपानमानि प्रेदहिनाद्धप्रतिप्रभुः तदानेन विधानेनयाया

पा०मा०
१६८

हरिपुरं शनैः मार्गशीर्षे शुभे मासे यायाद्राजा महीपतिः फाल्गुनं वाथ चैत्रं वा मासौ
प्रतियथा बलं अन्येष्वपि च कालेषु यदा पश्येद्ध्रुवं जयं तदा यायाद्विगृह्यैव व्यसने
चोत्थिते रिपोः कृत्वा विधानं मूले तु यात्रिकं च यथाविधि उपगुल्मास्पदं चैव च
चारं सम्यग्विधाय वा संशोध्य त्रिविधं मार्गं षड्विधं च स्वकं बलं सांपरायिककल्पेन
ल्पेन यायाद्दरिपुरं शनैरिति बलस्य षड्विधत्वेन तत्प्रदर्शिता मूलं बलं श्रेणीबलं
मित्रबलं भृतकबलं शत्रुबलमाटविकबलं चेति पुरस्तात्पृष्ठे सैन्यसंनाहरचनामाह मनुः
दंडव्यूहेन तन्मार्गं यायात्तु शकटेन वा वराहमकराभ्यां वा सूच्या वा गरुडेन वा
यतश्च भयमाशंकेत्ततो विस्तारयेद्बलं पद्मेन चैव व्यूहेन निविशेत तदा स्वयं
सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत् यतश्च भयमाशंकेत्प्राचीं तां कल्पयेद्
द्दिशं गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समंततः स्थाने युद्धे च कुशलानभी

राम
१६८

174

40

175

ऋनविकादिरलः संहतान्योधयेदल्पान्कामंविस्तारयेद्बहून् सूच्यावज्रेणचैवैतान्
व्यूहेनव्यूह्ययोधयेत् युध्येनस्यंदनाश्वैःसमेनूपेवनौद्विपैः वृक्षगुल्माव
तेचापैरसिचर्मायुधैःस्थले कौरुक्षेत्रांश्चमात्स्यांश्चपांचालान्शूरसेनजान्दी
र्घाल्लघूंश्चैवनरानग्रानीकेषुयोजयेत् प्रहर्षयेद्बलंव्यूह्यतांश्चसम्यक्परीक्षये
त् उपरुध्यारिमासीतराष्ट्रंचास्योपपीडयेत् दूषयेच्चास्यसततंयवसान्नोदके
धनं युक्तेचदैवेयुध्येतजयप्रेप्सुरपेतभीः सामादानेनभेदेनसमस्तैरथवा
पृथक् विजेतुंप्रयतेतारीन्नयुध्येतकदाचन अनित्योविजयोयस्माद्दृश्यते
युध्यमानयोः पराजयश्चसंग्रामेतस्माद्युद्धंविवर्जयेत् त्रयाणामप्युपायानां
पूर्वोक्तानामसंभवेतथायुध्येतसंपन्नोविजयेतरिपून्यथा जित्वासंपूजये
द्देवान्ब्राह्मणांश्चैवधार्मिकान्प्रदद्यात्परिहारांश्चख्यापयेदभयानिचस

पा.मा.
१६२

वैषांतुविहितंतेषांसमासेनचिकीर्षितं स्थापयेत्ततःस्थानंकुर्याच्चसमयक्रियां॥
प्रमाणानिचकुर्वीततेषांधर्मान्यथोहितानिति उक्तप्रकारेणपरदेशस्थानिनिर्जित्य
जितान्मतान्पूर्वस्थापयित्वाभवराजाधर्मेणपालयेत् नदेवराजाधर्मेणपालनंपु
ण्यंपुण्यमितितृतीयश्लोकेनविशाखीक्रियतेयथामालाकारआरामेयद्वायद्वत्तनु
च्छंविकसतेतदातच्छिनोतिनतुपुष्पलताम्मूलयतितथाप्रजाभ्यःकरमाददा
नोराजायथोदयंषष्ठंभागंगृह्णीयात् अंगारकारवत्सन्मूलंस्पृशर्वात्मना
दहतिनतुतथाप्रजाःपीडयेत् एतत्सर्वशान्तिपर्वणिदर्शितं मधुदोहंदुहेद्राष्ट्रं
भ्रमरानूत्प्रवासयेत् नचेद्वत्सवत्पीडयेत स्तनांश्चनविकुट्टयेत् जलौकावत्पि
वेद्राष्ट्रंमृदुनेवनराधिपः व्याघ्रीवायहरेत्पुत्रंदशनैर्नचपीडयेत् यथावलेरवा
कःपरंमारवुःपादत्वचंयथाअतीतीक्ष्णेनाप्युपायेनशनैःसमानेसमापयेत्

राम
१६२

176

५८

ततो भूयस्ततो भूयः क्रमवृद्धिं समाचरेदिति मनुरपि क्रयविक्रयमध्वानं भक्तं च स
परिव्ययं योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् यथा फलेन युज्येत राजा कर्ता
च कर्मणां तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् यथाल्पाल्पमदंत्याद्यं वत्स
वार्योकवत्सषट्पदाः तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकं करः इति मार्कंडेयोपि
मासानष्टौ यथा सूर्यस्तोयं हरति रश्मिभिः सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादि
कं नृप इति एतच्च करादानं मालाकारदृष्टांतेन प्रतिपादितमिति तथापि स
र्वेषां राजधर्माणामुपलक्षणं ते च धर्मा याज्ञवल्क्येन दर्शिताः महोत्साहः स्थू
ललक्षः कृतज्ञो वृद्धसेवकः विनीतः सत्वसंपन्नः कुलीनः सत्यवाक् शुचिः अदी
र्घसूत्रः स्मृतिमानक्षुद्रोपरुषस्तथा धार्मिकोव्यसनश्चैव प्राज्ञः शूरो रहस्यवि
त् स्वरंध्रगोप्तान्वीक्षिक्यां दंडनीत्यां तथैव च विनीतस्त्वथ वार्तायां त्रय्यां चैव नरा

पा.मा.
१६३

178

धिप इति नरातैंलदंगा राजधर्माः एतच्च राजगुणा इत्यप्युच्यंते अतएव षट्त्रिंश
द्गुणोपेतो राजेत्यस्य सूत्रस्य व्याख्यानावसरे महोत्साहादय उक्ता न सापठिताः ब
हिरंगा अपि राजधर्मा याज्ञवल्क्येन दर्शिताः स मंत्रिणः प्रकुर्वीत प्राज्ञान्मौला
न्स्थिरानशुचीन् तैः सार्द्धं चिंतयेद्राज्यं विप्रेणाथततः स्वयमिति मनुरपि मौला
न्छास्त्रविदः शूरान्लब्धलक्षान्कुलोद्गतान् सचिवान्सप्तचाष्टौ वा प्रकुर्वीत परी
क्षितान् तैः सार्द्धं चिंतयेन्नित्यं सामान्यं संधिविग्रहं स्थानं समुदयं गुप्तिं लब्धप्रश
मनानि च तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक्पृथक् समस्तानां च कार्येषु विद
ध्याद्धितमात्मनः सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता मंत्रयेत्परमं मंत्रं रा
जा षाड्गुण्यसंयुतं नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् तेन सार्द्धं विनिश्चि
त्य ततः कर्म समारभेदिति आरंभणीयं च कर्म देशविशेष दुर्गसंपादनं तेन च या

राम
१६३

त्रवल्लभेनदर्शितं रम्यंप्रणतं स्वाजीव्यंजांगलंदेशमावसेत् तत्रदुर्गाणिकुर्वीतजनको
शात्मगुप्तयेइतिदुर्गभेदामनुनादर्शिताः धन्वदुर्गंमहीदुर्गमब्दुर्गंवार्क्षमेववानृदुर्गं
विदुर्गंचसमाश्रित्यवसेत्पुरं सर्वेणतुप्रयत्नेनगिरिदुर्गंसमाश्रयेदिति दुर्गसंविधा
नप्रकारः शांतिपर्वणिदर्शितः दृढप्राकारपरिखंहस्त्यश्वरथसंकुलं उर्जस्विनरनारी
गंचचत्वरापणशोभितं प्रसिद्धव्यवहारंचप्रशांतमकुतोभयं स्थानंप्रशस्तसंपूर्णं
तत्पुरंस्वयमाविशेदिति मनुरपि तत्स्यादायुधसंपन्नंधनधान्येनवाहनैः ब्राह्मणै
शिल्पिभिर्यंत्रैर्यवसेनोदकेनच तस्यमध्येतुपर्याप्तंकारयेद्गृहमात्मनः गुप्तं
सर्वर्तुकंशुभ्रंजलवृक्षसमन्वितमिति दुर्गसंविधानमुक्त्वायागादिधर्मानपिसं
वाहतदध्यास्योद्वहेद्भार्यांसवर्णांलक्षणान्वितांकुलेमहतिसंभूतांहृद्यांरूप
समन्वितांपुरोहितंचकुर्वीतवृणुयादेवचर्त्विजः तस्यगृह्याणिकर्माणिकु

युर्वैतानि कानि च यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः यज्ञार्थं चैव विप्रेभ्यो दद्या
द्भोगान् धनानि च स्याच्चाम्नायपरो लोके वर्त्तेत पितृवन्नृष्विति याज्ञवल्क्योपि पुरो
हितं च कुर्वीत दैवज्ञमुदितोदितं दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा श्रौतस्मा
र्त्तक्रियाहेतोर्वृणुयादेव चर्त्विजः यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् भो
गांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च सद्मानमानसत्कारैर्वासयेच्छ्रोत्रिया
न्सदेति मनुरपि म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करं न च क्षुधाऽस्य संसी
देच्छ्रोत्रियो विषये वसन् यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा तस्या
पि तत्क्षुधा राष्ट्रमचिरादेव सीदति श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्प
येत् संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसमिति आनुशासनिकेपि खातप्रपा
तडागानि देवतायतनानि च ब्राह्मणावसथांश्चैव कर्तव्यं नृपसत्तमैः ब्राह्म

घः

ण्यतावमंतव्या भस्मछन्ना इवाग्नयः कुलमुत्पादयेयुस्ते क्रोधाविष्टाद्धि जातयः दु
ष्टानां शासनं धर्मः शिष्टानां परिपालनं कर्तव्यं भूमिपालेन नित्यं कार्येषु चार्ज
वमिति शांतिपर्वण्यपि वालातुरेषु भूतेषु पतिव्राणां कुकृदृह्य ष्वानुरागतेषु
कारुण्यं कुर्यान्नृपः समाहितः भरणं सर्वभूतानां रक्षणं चापि सर्वशः यष्टव्यं
क्रतुभिर्नित्यं दातव्यं चाप्यपीडया प्रजानां रक्षणं कार्यं न कार्यं कर्म गर्हितं ॥
आश्रमेषु यथाकालं चैलभोजनभाजनं स्वयं तु पर्यवेक्षेत राजा सत्कृत्य विधिपूर्व
कं आत्मानं सर्वकार्याणि तापसे राज्यमेव च निवेदयेत्प्रयत्नेन तिष्ठेत्प्रह्वश्च नि
त्यशः विक्रमेण महीं लब्ध्वा प्रजा धर्मेण पालयन् आहवे निधनं कुर्याद्रा
जा धर्मपरायणः आहवे च महीं लब्ध्वा श्रोत्रियायोपपादयेदिति मनुः मो
हाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबां

धवः शरीरकर्षणात्प्राणाः क्षीयंते प्राणिनां यथा तथा राज्ञामपि प्राणाः क्षीयं
ते राष्ट्रकर्षणादिति हि नवमोध्यायः मनुना दर्शिता उत्थाय पश्चिमे यामे कृतशौ
चः समाहितः हुत्वाग्निं ब्राह्मणांश्चार्च्य प्रविशेत्तु सभां शुभामिति सप्तमे तेपि
प्रातः कात्यायनः पतिः कुर्यात् दंतस्य धावनं स्नानं शुक्लाल्पः समागत्य स्नात्वा पूजेन
वाग्निना अर्घ्यं दत्वा सदेवाय भास्कराय समाहितः ततोलंकृतगात्रः सन्नवकृ
मालोकमेत्रवत् घृतपात्रं तु विप्राय दद्यात्सकनकं नृप इति याज्ञवल्क्योपि अ
प्तिकुशोहिताचार्यैः राशीर्भिः समभिनंदितः दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गाः
कांचनं मंत्री नैवाधिकानि च तथा श्रोत्रियाणां गृहाणि वैति नैवेधिकानि
विवाहोपयोगीनि कन्यालंकारादीनि तदनंतरं कर्तव्यं मनुराह तत्रास्थितः प्र
जाः सर्वाः प्रतिमंघ विसर्जयेत् विसृज्य च प्रजाः सर्वा मंत्रयेत्सह मंत्रिभिः गिरि

पृष्ठंसमारुह्यप्रसादंवारहोगतः अरण्येनिःशलाकेवामंत्रयेताविभावितः मध्य
दिनेर्धरात्रेचविश्रांतोविगतक्लमः चिंतयेद्धर्मकामार्थान्सार्द्धंतैरेकएववा
गो कन्यासंप्रदानंचकुमाराणांचरक्षणं दूतसंप्रेषणंचैवकार्यशेषंतथैवच अंतःपु
रप्रचारंचप्रणिधीनांचचेष्टितं कृत्स्नंचाष्टविधंकर्मपंचवर्गंचतत्वतः अ
ल नुरागापरागौचप्रचारंमंडलस्यच उपेतान्सुपापंचसर्वौपापांश्चकृत्स्नशः
एतत्त्रयंसमाश्रित्यप्रयतेतात्मसिद्धये एवंसर्वमिदंराजासहसंमंत्र्यमंत्रि
भिः व्यायम्याप्लुत्यमध्याह्नेभोक्तुमंतःपुरंव्रजेत् तत्रात्मभूतैःकालज्ञैरहा
र्यैःपरिचारकैः सुपरीक्षितमन्नाद्यमद्यान्मंत्रैर्विषापहैः विषघ्नैरुदकैश्चा
स्यसर्वद्रव्याणियोजयेत् विषघ्नानिचरत्नानिनियतोधारयेत्सदा प
रीक्षितांस्त्रियश्चैनंव्यजनोदकधूपनैः वेषाभरणसंशुद्धाःस्पृशेयुः

184

पा॰मा॰ समाहिताः एवं प्रयत्नं कुर्वीत यानशय्यासनाशने स्नाने प्रसाधने चैव सर्वालंकार
१५५८ केषु च भुक्तवान्विहरेच्चैव स्त्रीभिरंतःपुरे सह विहृत्य च यथाकालं पुनः कार्या
णि चिंतयेत् अलंकृतस्य संपश्येदायुधीयं पुनर्जनान् वाहनानि च सर्वाणि
शस्त्राण्याभरणानि च संध्यां चोपास्य शृणुयादंतर्वेश्मनि शस्त्रभृत् रह
स्याख्यायिनां चैव प्रणिधीनां च चेष्टितं गत्वा कक्षांतरं त्वन्यत्समनुज्ञा
प्य तं जनं प्रविशेद्भोजनार्थं तु स्त्रीभिरंतःपुरं पुनः तत्र भुक्त्वा पुनः किंचि
धौ॰ त्तूर्यघोषैः प्रहर्षितः संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः एतद्वृतं
समातिष्ठेदरोगः पृथिवीपतिः अस्वस्थः सर्वमेवैतद्भृत्येषु विनिवेशयेदि
ति धर्मांतरारणाहमनुः संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनं शुश्रूषा
ब्राह्मणानां च

राम
१५६

णो विद्यात्कष्टमेतत्त्रिकं सदा व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते व्यसन्यधो
हि व्रजति स्वर्यात्यव्यसनी मृत इति मार्कण्डेयोपि व्यसनानि परित्यज्य सप्त मू
लहराणि च आत्मारिपुभ्यः संरक्षो बहिर्मित्राविनिर्गमात् स्थानवृद्धिक्षय
ज्ञानेषाड्गुण्यविदितात्मना भवितव्यं नरेंद्रेण न कामवशवर्तिना प्राक्चा
त्मा मंत्रिणश्चैव ततो भृत्या महीभृता ज्ञेयाश्चानंतरं पौरा विरुध्येत ततो
रिभिः यस्त्वेतानविनिर्जित्य वैरिणो विजिगीषते सोजितात्माजितामात्यः श
त्रुवर्गेण बाध्यत इति तदेवमुक्तधर्मकलापेन संयुक्तो राजा प्रजाः पालयेत् त
दुक्तं मनुना एवं सर्वं विधायेदमितिकर्त्तव्यमात्मनः युक्तश्चैवाप्रमत्तश्च परि
रक्षेदिमाः प्रजा इति प्रजारक्षणे राज्ञः श्रेयो विशेष ऐहिकआमुष्मिकश्च शां
तिपर्वणि दर्शितः स्त्रियश्चाप्यरक्षिता मार्गं सर्वालंकारभूषिताः निर्भयाः प्रतिप
द्यंते यदा रक्षति भूमिपः धर्ममेव प्रपद्यंते न हिंसंति परस्परम् अनुगृह्णंति वा

राज्ञः श्रेयस्करं परं अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः रक्षितं वर्द्धयेच्चैव वृद्धं पा
त्रेषु निक्षिपेत् अमाययैव वर्त्तेत न कथंचन मायया बुध्येतारिप्रयुक्तां तु मायां नि
त्यं सुसंवृतः इति शांतिपर्वणि व्यसनानि च सर्वाणि नृपतिः परिवर्जयेत् लोक
संग्रहणार्थाय कृतकव्यसनी भवेत् इति तानि व्यसनानि मनुनादर्शितानि द
श कामसमुत्थानि तथाष्टौ क्रोधजानि च मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो
मदः तौर्यत्रिकं वृथाट्या च कामजो दशको गणः पैशुन्यं साहसं द्रोह ईर्ष्या
सूयार्थदूषणं वाग्दंडनं च पारुष्यं क्रोधजोपि गणोष्टकः कामजेषु प्रसक्तो हि
व्यसनेषु महीपतिः वियुज्यतेर्थकामाभ्यां क्रोधजेष्वात्मनैव तु द्वयोरप्येत-
योर्मूलं यं सर्वे कवयो विदुः तं यत्नेन जयेल्लोभं तज्जावेतौ गणावुभौ पानम
क्षाः स्त्रियश्चैव मृगया च यथाक्रमं एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे
दंडस्य पातनं चैव [illegible] वाक्पारुष्यार्थदूषणे क्रोधजेपि ग-

न्योन्यं यदा रक्षति भूमिपः यजन्ते च महायज्ञैस्त्रयो वर्णाः पृथग्विधैः युक्तश्चाधीयते वेदा
न्यदा रक्षति भूमिपः यदा राजा युधं श्रेष्ठमादाय वहति प्रजाः महता बलयोगेन त
दा लोकान्समश्नुत इति रामायणेपि यः क्षत्रियः स्वधर्मेण पृथिवीमनुशा
स्ति वै स लोके लभते वीरयशः प्रेत्य चैव सद्गतिम् अपालने दोषः शान्तिपर्वणि
दर्शितः यानं वस्त्रमलंकारान् रत्नानि विविधानि च हरेयुः सहसा पापा य
दि राजा न पालयेत् एतद्बहुविधं शास्त्रं न कृषिर्न वणिक्पथः मज्जेद्धर्मस्त्रयी
तस्माद्यदि राजा न पालयेदिति इति राजधर्मप्रकरणम् क्रमप्राप्तान्वैश्यस्या

लाभकर्म तथा रत्नं गवां च परिपालनम् कृषिकर्म च
वाणिज्यं वैश्यवृत्तिरुदाहृता ६२ ॥

साधारणधर्मानाह लाभेति लाभार्थं कर्म लाभकर्म कुसीदं वृद्ध्युपजीवनमित्य
र्थः रत्नं मणिमुक्तादि तेन च तत्परीक्षणक्रियोपलक्ष्यते गवां पालनं तृणोदक
प्रदानबंधनमोचनदोहनादि कृषिकर्म भूमिकर्षणं बीजावापादि वाणिज्यं

क्रमुकधान्यादि क्रयविक्रयौ कुसीदादीनां वैश्यधर्मत्वमाह याज्ञवल्क्यः कुसीदकृ
षिवाणिज्यं पाशुपाल्यं विशः स्मृतमिति मनुरपि पशूनां रक्षणं दानमिज्याध्ययन
मेव च वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव चेति समादिशेदिति शेषः वाराहपु
राणेपि स्वाध्यायं यजनं दानं कुसीदं पशुपालनं गोरक्षां कृषिवाणिज्यं कुर्याद्वैश्यो
यथाविधीति पशुपालनं अजाश्वादिपालनं गोशब्दस्य पृथगुपात्तत्वात् आनु
शासनिके विक्रेयद्रव्याणि निर्दिष्टानि तिलचर्मरसाश्चैव विक्रेयाः पशुवाजिनः
वणिक्पथमुपासीनैर्वैश्यैर्वैश्यपथि स्थितैः शान्तिपर्वणि जाजल्युपाख्यानप्रसं
गेन वैश्यधर्मास्तुलाधारेणोदिताः यदृच्छाभिनलन्न्यूनं यदृच्छाभिनवाधिकम्
विक्रीणामि रसान्सर्वान्मद्यवर्ज्जममायया क्रीत्वा चैव यथा विक्रीणे परस्तात्तद्धनं वहूिति
पशुपालने विशेषमाहतुः शंखलिखितौ गावदत्तो नास्व पीतासु न पिवेन्नतिष्ठत्सूप
विशेन्न स्वयमुत्थापयेदन्यैर्नैराढ्यं शाखया सपलाशया पृष्ठतोभिहन्यात् तीर्थे
न विषमे वाल्पोदके वतारयेत् वालवृद्धरोगार्त्तानां शक्तितः प्रतीकारं कुर्यात्
अन्यथा विघ्नं वहति यानि लाभकर्माणि निवाणिज्यानानि सर्वाण्येव वैश्यवृत्तिः

189

वैश्यस्य जीवनहेतुर्धर्म इत्यर्थः तदुक्तं मार्कण्डेये दानमध्ययनं यज्ञो वैश्यस्यापि त्रि
धैव सः वाणिज्यं पाशुपाल्यं च कृषिश्चैवास्य जीविकेति अर्थविज्ञानादयोपि
वैश्यधर्मत्वेन द्रष्टव्याः अत एव मनुना वैश्यधर्मेषु पठिताः वैश्यस्तु कृतसंस्का
रः कृत्वा दारपरिग्रहं वार्त्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे प्रजापतिर्हि
वैश्याय सृष्ट्वा परिददे पशून् न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति वैश्ये चे
च्छति नान्येन रक्षितव्याः कथंचन मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च
गंधानां च रसानां च विद्यादर्घवलावलम् वीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुण
स्य च मानयोगं च जानीयात्तुलायोगांश्च सर्वशः सारासारं च भांडानां देशानां
च गुणागुणं लाभालाभं च पण्यानां पशूनां च विवर्द्धनम् भृत्यानां च भृतिं विद्या
द्भाषाश्च विविधा नृणां द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च धर्मेण च द्रव्य
वृद्धावातिष्ठेद्यत्नमुत्तमं दद्याच्च सर्वभूतानामन्नमेव प्रयत्नत इति कृषिवाणि
ज्ययोरन्तर्भावान्नीशब्देनोच्यन्ते मानयोगाश्चेति प्रस्थादिसाध्याः मूलवचने लाभ

पा॰मा॰ १६८

कर्मेत्यत्र लोहकर्मेति केचित्पठन्ति लोहस्य सुवर्णरजतादेरर्घपरिज्ञानात्क्रयादिकं त
त्कर्मेति व्याख्येयं लोहानां चेति मनुना पठितत्वात् यथोक्तधर्मानुष्ठाने फलं आ
श्वमेधिके वर्णितं वणिक्कर्मानुष्ठानेन देवब्राह्मणपूजकः स वणिक्स्वर्गमाप्नो
ति पूज्यमानो पुरोगणैरिति वैपरीत्ये दोषः शान्तिपर्वणि दर्शितः यः करोति जना
न्साधून्वणिक्कर्मणि वंचनं स याति नरकं घोरं धनं तस्यापि हीयते इति वैश्य
धर्मप्रकरणम् क्रमप्राप्तान्शूद्रस्यासाधारणधर्मानाह शूद्रस्येति अत्राहि

शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्यते अन्यथा कुरुते किंचित्तद्भवेत्तस्य
निष्फलम् ६२

द्विजशब्दो ब्राह्मणपरः तच्छुश्रूषायाः परमत्वं निःश्रेयसहेतुत्वात् तदाह मनुः
विप्राणां वेदविदुषां गृहस्थानां यशस्विनां शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः
परः शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां
जातिमश्नुत इति विज्ञानेश्वरोपि द्विजशुश्रूषयैव पाकयज्ञाधिकारवान्

नाम १६८

निजान्जयति वै लोकाञ्छूद्रो धन्यतरः स्मृत इति आनुशासनिकेऽपि रागो द्वेषश्च मोहश्च पारुष्यं च नृशंसता शाठ्यं च दीर्घवैरत्वमतिमानमनार्जवम् अनृतं चातिवादं च पैशुन्यमतिलोभता निकृतिश्चाप्यविज्ञानं जनने शूद्रमाविशत् दृष्ट्वा पितामहः शूद्रमभिभूतं तु तामसैः द्विजशुश्रूषणं धर्मं शूद्राणां तु प्रयुक्तवान् नश्यंति तामसा भावाः शूद्रस्य द्विजभक्तितः द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छतीति परम इति विशेषणादन्येऽपि केचन धर्माः सन्तीति गम्यते ते च देवलेन दर्शिताः शूद्रधर्मो द्विजवर्णशुश्रूषा कलत्रादिपोषणं कर्षणपशुपालभारोद्वहनपण्यव्यवहारचित्रकर्मनृत्तगीतवेणुवीणामुरजमृदंगवादनानीति विष्णुपुराणे दानं न दद्याच्छूद्रोऽपि पाकयज्ञैर्यजेत्त च पित्र्यादिकं चैव सर्वानेनेन वा इति याज्ञवल्क्योऽपि भार्यारतः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति शांतिपर्वण्यपि स्वाहाकारनमस्कारौ मंत्रः शूद्रे विधीयते ताभ्यां शूद्रः पाकयज्ञै

र्थिनेन वृत्तवान्सर्वं संचयांश्च न कुर्वीत जातु शूद्रः कथंचन पापीयान्हि धनंल
ब्ध्वा वशे कुर्याद्गरीयसः राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिक इति या
ज्ञवल्क्यापि के अहिंसकः शुभाचारो देववद्विजपूजकः शूद्रो धर्मफलैरिष्टै
:स्वधर्मेणैव युज्यत इति न केवलं विप्रशुश्रूषाभिः श्रेयसार्थी अपि तु वृत्त्यर्था
पि अत एव तस्य प्रकल्प्यमाना वृत्तिर्मनुना दर्शिता प्रकल्प्या तस्य तैर्वृत्तिः
स्वकुटुंबाद्यथार्हतः शक्तिं चावेक्ष्य भक्तिं च भृत्यानां च परिग्रहं उच्छिष्टम
न्नं दातव्यं जीर्णानि वसनानि च पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदा
इति शांतिपर्वण्यपि यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुरावजेत् कल्प्या
तस्य च तै राजन्वृत्तिं धर्मविदो जनाः छत्रं वेष्टितमौशीरमुपानद्व्यजनानि च
यातयामानि देयानि शूद्राय परिचारिणः इति अन्यथा द्विजशुश्रूषामंतरे
ण यदि किंचित्पाकयज्ञादिकं कुर्यात्तत्सर्वं निष्फलं भवेत् तदुक्तं मनुना
विप्रसेवैव शूद्रस्य विशिष्टं कर्म कथ्यते यदतोन्यद्धि कुरुते तद्भवेत्तस्य नि

फलमिति तस्माद्द्विजशुश्रूषैवतस्यपरमोधर्मः क्षत्रियवैश्यशुश्रूषातुकेवलंव
त्त्यर्थत्वादपरमोधर्मः अतएवमनुना विप्रशुश्रूषायाउभयार्थत्वमितरशुश्रू
षायांकेवलवृत्त्यर्थत्वंदर्शितं शूद्रस्तुवृत्तिमाकांक्षन्क्षत्रमाराधयेद्यदि धनि
नंवाप्युपाराध्यवैश्यंशूद्रोजिजीविषेत् स्वर्गार्थमुभयार्थंवाब्राह्मणानेवधारये
त् जातिब्राह्मणशब्दस्यसाह्यस्यकृतकृत्यता यदाद्विजशुश्रूषयाजीवितुंनश
क्नोतितदाकिंकुर्यादित्यतआह लवणमिति शुश्रूषयाजीवितुमशक्तोजी

लवणंमधुतैलंचदधितक्रंघृतंपयः नदुष्येच्छूद्रजातीनांकुर्यात्सर्वे
षुविक्रयम् ६४

वन्नायंलवणादिषुसर्वेषुविक्रयंकुर्यात् ननुलवणादीनिविक्रीयमाणानि
विक्रेतुर्दोषमावहन्ति तथाचयाज्ञवल्क्यः फलोपलक्षौमसोममनुष्यापूप
वीरुधः तिलौदनरसक्षारान्दधिक्षीरंघृतंजलं रसासवमधूच्छिष्टमधुलाक्षाः
सबर्हिषः मृच्चर्मपुष्पकुतपकेशतक्रविषक्षिती कौशेयनीलीलवणमांसैकश

194

पा॰मा॰
१७०

कसीसकान् शाकांश्चौषधीपिण्याकपत्रगंधांस्तथैव च वैश्यवृत्त्यापि जीवन्नो
विक्रीणीत कदाचन लाक्षालवणमांसानि पतनीयानि विक्रये इति मेवम् अस्य
ब्राह्मणविषयत्वात् अतएव मनुः सद्यः पतति मांसेन लाक्षया लवणेन च त्र्यहे
ण शूद्रो भवति ब्राह्मणः क्षीरविक्रयीति शूद्रस्तु लवणादीनि विक्रीणन्नपि न दु
ष्येत् विक्रीणन्निति पदं वक्ष्यमाणश्लोकादनुषज्य योजनीयम् याज्ञवल्क्योपि
शुश्रूषयाजीवितुमशक्नुवतः शूद्रस्य वाणिज्यादिकमाह शूद्रस्य द्विजशुश्रूषा तत
याजीवन् वणिग्भवेत् शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन्निति मनुरपि
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनां पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्म
भिः येः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः तानि कारुककर्माणि शिल्पा
नि विविधानि चेति शूद्रस्यापद्यपि वर्ज्यानाह विक्रीणन्निति मद्यं चेत्यर्धं

विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम् कुर्वन्नगम्यागमनं
शूद्रः पतति तत्क्षणात् कपिलाक्षीरपानस्य ब्राह्मणीगमनेन

राम
१७०

195

च वेदान्तरविचारेण शूद्रस्यागलितं व्रजेत् ९९

तालपानसंप्रदाय माधूक स्वार्जूराद्विकं अभक्ष्यं गोमांसादि अगम्याभगि
न्यादयः संपूर्णमभूत् इति शूद्रधर्मप्रकरणम् प्रख्यानादिपराशरस्मृति
रिह स्मृत्यागमख्यापनं धर्मो वर्णचतुष्टयी वक्रमनो साधारणान्याभिधो
आद्यस्याह्निकशिष्टनाम विहितः षट्कर्म पूर्वापरः द्वौ अध्यायान् निरूपितं त
दखिलं व्याख्यात् सुधीर्माधवः १ इति श्रीमहाराजाधिराजपरमेश्वरवै
दिकमार्गप्रवर्तक श्रीवीरबुक्कणमहीपाल साम्राज्यधुरंधरस्य माधवामा
त्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां प्रथमोध्यायः १ ॥

पा॰मा॰
१९१

वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे यंनत्वाकृतकृत्याःस्युस्तंनमामिग
जाननम् १ प्रथमेध्यायेप्यासेनपृष्टयोर्वर्णचतुष्टयसाधारणासाधारण
धर्मयोर्मध्येसाधारणधर्मसंक्षिप्यासाधारणधर्मःप्रपंचितः अथेदानींसं
क्षिप्तःसाधारणधर्मोद्वितीयेध्यायेप्रपंच्यते अथवापूर्वाध्यायस्यामुष्मि
कधर्मप्राधान्येनप्रवृत्तः अयंत्वैहिकजीवनहेतुधर्मप्राधान्येनप्रवर्त्तते
तत्राद्यावध्यायप्रतिपाद्यमर्थंप्रतिजानीते अतइति अतःपरंचातुर्वर्ण्य

अतःपरंगृहस्थस्यकर्माचारंकलौयुगे धर्मंसाधारणं
शक्त्याचातुर्वर्ण्याश्रमागतम् १ तत्प्रवक्ष्याम्यहंपू
र्वपराशरवचोयथा ॥

साधारणधर्मसंक्षेपकथनादूर्ध्वस्मिन्कालेसएवविस्तरकथनस्योचितो
वसरः बहुग्रंथपाठेशक्तिरहितानांमंदप्रज्ञानांप्रतिसंक्षेपेणाभिहितेसति
समर्थानामुत्तमप्रज्ञानांबुभुत्स्यत्वात्तान्प्रतिविस्तरेणकथयितुमुचित

राम
१९१

त्वात् अतएवाह पराशराचार्यः संक्षेपविस्तराभ्यां हि मंदोत्तमधियां नृणां वक्ष्यमाण
मेतत्पुनः करणेनेन वर्णितइति यद्वा अतः परं आमुष्मिकप्रधानकथनादनन्तरं
षट्कर्माभिरतः संध्यास्नानमित्यादिना आमुष्मिकफलेभिहिते सत्यैहिकफल
स्य कृष्यादिधर्मस्य वृत्तिरूपत्वात् तदभिधानस्य युक्तोवसरः वक्ष्यमाणस्य कृष्या
दिधर्मस्य कृत्स्नचारित्वं नस्यादिति संभवमभिप्रेत्य तद्योग्यमाश्रमिणं दर्शयति
गृहस्थस्यैवेति कृतत्रेताद्वापरेषु वैश्यस्यैव कृष्यादावधिकारोनन्तु गृहस्थमात्रस्य
विप्रादेरतो विशिनष्टि कलौयुगइति कर्मशब्दो लोके व्यापारमात्रे प्रयुज्यते आचा
रशब्दस्तु धर्मरूपे शास्त्रीयव्यापारे कृष्यादेर्युगांतरेषु कर्मत्वं कलावाचारत्वमि
त्युभयरूपत्वमस्ति तथैवाश्रमांतरेषु कर्मत्वं गार्हस्थ्यस्य चोक्ताचारत्वमित्युभय
रूपतां तद्विवक्षया कर्माचारमित्युक्तम् कलौ गृहस्थस्य याजनादेर्दुर्लभत्वात्
जीवनहेतुतया कृष्यादिविधानादाचारत्वमुपपन्नं कृष्यादेः साधारणधर्मत्वम्

प्रपादयति चातुर्वर्ण्याश्रमागतमिति चत्वारो वर्णा एव चातुर्वर्ण्यं तत्र सर्वत्रप्रसिद्धत्वाश्रमो
गार्हस्थ्यरूपः संतति हि शूद्रस्यापि विवाहः पंचमहायज्ञादयो गृहस्थधर्माः एतच्च सर्वम
स्माभिस्तत्तदाश्रमनिरूपणे विस्पष्टमभिधास्यते तस्मिन्नाश्रमविधानात् साधारणं
पराशरशास्त्रेनाज्ञातीतकल्पोत्पन्नो विवक्षितः एतदेवाभिव्यंजयितुं पूर्वमित्युक्तं पूर्व
कल्पसिद्धं पराशरवाक्यं कलिधर्मे कृष्यादौ यथावृत्तं तथैवाहं संप्रवक्ष्यामि अतः सं
प्रदायागतत्वात्कृष्यादेराचारतायां न विवादः कर्त्तव्य इत्याशयः गुरुविषये विनयः
कर्त्तव्य इति शिष्टाचारं शिक्षयितुं शक्त्या संप्रवक्ष्यामीत्युक्तं न तु कस्मिंश्चिद्धर्मे स्वस्या
शक्तिं द्योतयितुं कलिधर्मप्रवीणस्य पराशरस्य तत्राशक्त्यसंभवात् प्रतिज्ञातधर्मं दर्श

षट्कर्मसहितो विप्रः कृषिकर्म च कारयेत् २

यति षडिति षट्कर्माणि पूर्वोक्तानि यजनादीनि संध्यादीनि च तैः सहितो विप्रः शुश्रूष
कैः शूद्रैः कृषिं कारयेत् न च याजनादीनां जीवनहेतुत्वात् किमनया कृष्येति वाच्यं

कलौजीवनपर्याप्तत्तयायाजनादीनांदुर्लभत्वात् यत्तुमनुनोक्तं वैश्यवृत्त्यापिजी
वंस्तुब्राह्मणः क्षत्रियोपिवा हिंसाप्रायांपराधीनांकृषिंयत्नेनवर्जयेत् कृषिंसा
ध्वितिमन्यंतेसावृत्तिःसद्विगर्हिता भूमिंभूमिशयांश्चैवहंतिकाष्ठमयोमुखमिति
नत्वयंकृताभिप्रायं अन्यथामनोःस्वयंवचनविरोधात् स्वेनैवकृषिरभ्युपग
ता उभाभ्यामप्यजीवंस्तुकथंस्यादितिचेद्भवेत् कृषिगोरक्षमास्थायसजीवे
द्वैश्यजीविकामिति ननुकृषिर्भृगुणा स्वयंकृताकृषिरभ्युपगता स्वयंवाकर्ष
णंकुर्याद्वाणिज्यंवाकुसीदकं कष्टापापीयसीवृत्तिःकुसीदंतांविवर्जयेत् न
न अस्यवचनस्यकुसीदनिंदनपरत्वात् अतएवनारदः आपत्स्वपिचकष्टा
सुब्राह्मणस्यनवार्धुषमिति नतुबृहस्पतिः स्वयंकर्तृकांकृषिमंगीचकार कु
सीदंकृषिवाणिज्यंप्रकुर्वीतस्वयंकृतं आपत्कालेस्वयंकुर्यान्नैनसायुज्यतेद्वि
जइति बाढम् कारयितुमप्यशक्तस्यतत्कर्तृत्वमापत्कालइतिविशेषितत्वा

200

पा॰मा॰
१७३

त् ननु कारयितृत्वमप्यापद्विषयमेव कृषेर्वैश्यधर्मत्वात् विप्रस्य याजनादीनामेव जी-
वनहेतुत्वात् सत्यं तत्रापि तारतम्येन व्यवस्थास्तु अल्पापदि कारयितृत्वमत्य-
न्तापदि कर्तृत्वं अथवा युगभेदेन व्यवस्थाप्यतां युगान्तरेषु कारयितृत्वमापद्धर्मः क-
लौ तु स्वो धर्मः प्राधान्येनोपक्रम्य प्रतिपादनात् तत्र कृषौ हल×न×स्यैकस्य बली-
वर्दसंख्यानियममाह हारीतः अष्टगवं धर्म्यं हलं षड्गवं जीवितार्थिनाम् चतु-
र्गवं नृशंसानां द्विगवं ब्रह्मघातिनामिति तत्राद्यौ पक्षौ हेयौ इतरावपि क्रमेण मु-
ख्यानुकल्पौ द्रष्टव्यौ कृषौ वर्ज्यान्बलीवर्दानाह क्षुधितमिति क्षुधादयस्तत्तल्लिं-

क्षुधितं तृषितं श्रान्तं बलीवर्दं न योजयेत् हीनांगं व्याधितं क्लीबं वृषं विप्रो न

गैरवगंतव्याः हीनांगः पादविकलः क्लीबः पुंस्त्वरहितः कीदृश वाहयेत् ३
स्तर्हि बलीवर्दः कृषौ योज्य इत्यत आह स्थिरांगमिति स्थिरांगः पादादिवैकल्यर-

स्थिरांगं नीरुजं तृप्तं सुनर्दं षण्ढवर्जितम् वाहयेद्दिवसस्यार्द्धं पश्चात्स्नानं समा-
चरेत् ४

राम
१७३

हितः तत्र गुरुत्तसाभ्याम पीडितः सुनर्दो हि सको दम्नः अमरहित इति यावत् षंडे तिभाव
प्रधानो निर्देशः षंडत्ववर्जितः पुंस्त्वोपेतः शाक्त इति यावत् द्विवत्सराद्र्ध्यामवयं पश्चा
त्स्नानं समाचरेत् बलीवर्दान्स्नापयेदित्यर्थः तथा तावीतः स्नापयित्वानडुहोसंकु
त्पवाहलसा भोजयेदिति वाहने विशेष आश्वमेधिके दर्शितः वाहयेकं कृतेनै
वशारवयावासपचया नदंडेन नयस्थावान पाशेन चवापुनः नतुत्तसाश्रम
स्त्रां तयोजयेद्धिकलेंद्रियं सुतन्नेषु वभुंजीयात्पिबेत्पीते षुचोदकं अनडुः पर्वी
र्द्धयामं वाधुर्यानो वाहनं स्मृतं विश्राम्य तन्नध्यमेभागे भागे वातेयथासुखं य
त्रवात्वरथा कृत्समं प्राप्यो यत्र वाध्वनि वाहयेत्तत्र धुर्यांस्तु नपापेन लिप्यते अ
न्यथा वाहयेद्यज्जन्निरयं याति रौरवम् रुधिरं वाहयेत्ते (स) पायस्तुमो हान्न
राधमः मूलहत्या समं पापं तस्य स्यान्नाडुनंदनेति बलीवर्दस्नापनानंतरक
जयं देवार्चनं होमं स्वाध्यायं चैवमभ्यसेत् एकद्वित्रिवत्र विप्रान्भोजयेत्स्ना(ते)
तकान्द्विजः ४

तैव्यमाह जप्यमिति यथावल्लीवर्द्दश्रांतिकृत दोषापनयनाय स्नापनं एवं प्राणुपघा
त दोषापनयनाय यथाशक्ति जपादीनामन्यतमम नुतिष्ठेत् एवं श्रोत्रीश्रुतरोवा वि-
प्रान्स्नातकान्यथाशक्ति भोजयेत् स्नातकानव विध भिक्षुकाः तदाह मनुः सांता
निकं यक्ष्यमाणमध्वगं सार्ववेदसम् गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापि
नमिति सांतानिकः संतानाय विवाहोपयुक्तद्रव्यार्थी उपतापी रोगी स्वाध्या
यार्थि सहित उपतापी स्वाध्यायार्थ्युपतापीति मध्यमपदलोपी समासः कृषे
फलितस्य धान्यस्य विनियोगमाह स्वयमिति यानि स्वयं कृष्टे क्षेत्रे फलितानि

स्वयं कृष्टे तथा क्षेत्रे धान्यैश्च स्वयमार्जितैः नि
र्वपेत्स्वच यज्ञांश्च क्रतुदीक्षां च कारयेत् ६

नि धान्यानि यानि दासैः कर्षिक क्षेत्रे स्वयमार्जितानि धान्यानि तैः सर्वैः स्ना
नीयं च मखयज्ञान् श्रौतानग्निहोमादिक्रतुदीक्षां च कुर्यात्कारयेदिति

सार्थिको ऽपि च अथवा स्वयं पंचमहायज्ञान्कुर्वीत पक्वमोघान्नं हुत्वा कृत
दीक्षां च कारयेत् कूर्मपुराणे ऽप्येष विनियोगो दर्शितः तत्र लाभैः पितॄन्देवा
न्ब्राह्मणांश्चापि पूजयेत् ते तृप्तास्तस्य तद्दोषं शमयंति न संशय इति कृषी
वलस्य तैलादिधान्यसंपन्नस्य धनलोभेन प्रसक्तान्तिलादिविक्रयान्नि
वारयति तिला इति रसा दधिमधुघृतादयः यदि धान्यांतररहितस्य ति

तिला रसा न विक्रेया विक्रेया धान्यतत्समाः विप्रस्यैवंविधा
वृत्तिस्तृणकाष्ठादिविक्रये ॥

लविक्रयमंतरेण जीवनं वा धर्मो वा न सिध्येत् तदा तिला धान्यांतरैर्विनि
मातव्या इत्यभिप्रेत्य विक्रेया धान्यतत्समा इत्युक्तम् यावद्भिः प्रस्थैस्तिला
दत्तास्तावद्भिरेव धान्यांतरमादेयं नाधिकमित्यर्थः तदुक्तं नारदेन अश
क्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्

समा इति आपस्तंबोपि अन्नेन चान्नस्य मनुष्याणां च मनुष्यैः रसानां च रसैर्गंधा
नां च गंधैर्विद्यया च विद्यानामिति रसविनिमये विशेषमाह वशिष्ठः रसा रसैः
समतो हीनतो वा न मातव्या इति अन्नविनिमये विशेषमाह गौतमः समेनामेन
तु पक्वस्येति ननु तिलाविक्रयोभ्युपगतो मनुना काममुत्पाद्य कृष्यां तु स्वयमे
व कृषीवलः विक्रीणीत तिलाञ्छुद्धान्धर्मार्थमचिरस्थितान् अत्र केचिदाहुः
अभिप्राय तदेतद्विनिमयाभिमिति अपरे तु मन्यंते कृच्छ्रापत्कारणाद्यावश्यकधर्मार्थं ति
लविक्रयो न विरुद्धः अयमेव पक्षो युक्तो वशिष्ठवचनसंवादात् कामं वा स्वयं
कृष्योत्पाद्य तिलान्विक्रीणीरन्निति विनिमयाभिप्राये तु वचनांतरेण सह पौन
रुक्त्यं ×मपरिहार्यं स्याद्यतो मनुनैव वचनांतरेण तिलाधान्येन तत्समा इ
ति विनिमयो दर्शितः यत्त्वन्यस्मिन्वचने अर्थात्तिलविक्रयनिषेधः प्रतिभा
ति तथाहि मनुयमाभ्यामुपवर्णितं भोजनाभ्यंजनाद्दानाद्यदन्यत्कुरुतेति

205

लैः कृमिर्भूत्वा स्वविष्ठायां पितृभिः सह मज्जति दानाभ्यं जनभोगेभ्यो यदन्यत्कुरुतेति

लैः कृमिर्भवति विष्ठायां कर्मणानेन पापकृदिति नारदोक्तः आवश्यकधर्मव्य

तिरिक्तविषयत्वात् योयं तिलानां धान्यसमत्वेन विनिमयः यश्चतृणादि विक्र

यः सेयमेवं विधा विप्रस्य जीवनार्था वृत्तिः तथा च नारदः ब्राह्मणस्तु विक्रे

यं शुष्कदारुतृणानि चेति इदानीं कृषावानुषंगिकस्य पाप्मनः प्रतीकारं वक्तुं

प्रथमतस्तं पाप्मानं दर्शयति ब्राह्मणइति कृषौ हि सा या अवर्जनीयत्वात्

ब्राह्मणश्चेत्कृषिं कुर्यात्तन्महादोषमाप्नुयात्

सावधानस्यापि कृषीवलस्य दोषो नुषज्यत इति अत्र हिंसाज्ञाया मितिमनुवच

नेपूर्वमेवोदाहृतं उक्तस्य दोषस्य महत्त्वं विशदयति संवत्सरेणेति लोहमहि

संवत्सरेण यत्पापं मत्स्यघाती समाप्नुयात् अयोमु

खेन काष्ठेन तदेकाहेन लांगली ॥ ॥

तेन लांगलमुखेन प्राणिनां विचित्रवधो भवंतीत्यतो महान्वधात्पापाधिक्यमुक्तं उक्त
रीत्या कर्षकस्यात्र स्य पापप्रसक्तौ वाऽल्पत्वात्तं विशिनष्टि पाशक इति वाक्यंतांप्रसा

पाशको मत्स्यघाती च व्याधः शाकुनिकस्तथा अदाता कर्षकश्चैव सर्वे
ते समभागिनः

र्थ्यमृगादिग्राही पाशकः व्याधो मृगवधाजीवः शाकुनिकः पक्षिघाती अदाता ख
ले राशिस्य मूलमुपागतेभ्योऽप्रदाता तेषां सर्वेषां प्रत्यवायः समानः ततश्च दृष्टांत
त्वेन पाशकादय इह वर्ण्यंते यथा पाशकादीनां पापं महत् एवमदातुः कर्षक
स्येत्यर्थः यदर्थं कृषीवलस्य पापमादर्शितः तमिदानीं पापप्रतीकारमाह वृक्षामि

वृक्षांश्छित्वा महीं भित्वा हत्वा च कृमिकीटकान् कर्षकः खलयज्ञेन सर्व

ति छेदनभेदनहननैर्यावंति पापानि निष्पद्यंते पापैः प्रमुच्यते ॥ ॥
तेषां सर्वेषां खले धान्यदानं प्रतीकारः तथा च हारीतः भूमिं भित्वौषधीश्छि

राम
१७६

207

त्वा हत्वा कीटपिपीलिकाः घ्नंति खलयज्ञेन कर्षका नात्र संशयः एषोयं विहि
तो मध्ये दीनानां महि कर्षकैः तस्माद्दत्ते द्विजो दद्याद्दत्र धान्यार्घ्य दक्षिणा मिति
खलयज्ञाकरणे प्रत्यवायमाह योनेति कर्षकस्यायं खलयज्ञो नित्यकाम्य

योनदद्याद्द्विजातिभ्यो राशिमूलमुपागतः सघो

रः सच पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत्

इति वचनद्वय बलादवगम्यते अकरणे प्रत्यवायान्नित्यत्वं छेदनादिपापनिव
र्तकत्वात् काम्यं च खलयज्ञस्य नित्यत्वं पौष्कराणे दर्शितं अदत्वा कर्षको दे
विप्रेभ्यो धान्यं प्रवेशयेत् तस्य नश्यन्ति भूतानि तस्मै देवि मापंब्रवीम्यहम् दिव्यं वर्षस
हस्रं तु नरके सोभि कृषिकारकः मरुदेशो भवेद्वृक्षः सपुष्पः फलवर्जितः तस्मात्तेमा
नुषो भूत्वा कदाचित्कालपर्ययात् दरिद्रो व्याधितो मूर्खः कुलहीनश्च जायते
इति दातव्यस्य धान्यस्य परिमाणमाह राज्ञ इति षड्भागे एकोभागः षड्भागः
राज्ञे दत्वा तु षड्भागं देवानां चैकविंशकं विप्राणां त्रिंशकं भागं सर्वपापैः प्रमुच्यते

१२

एकविंशतिसंख्याकेषुभागेष्वन्त्यतमोभागएकविंशकः तदद्भिंशकोपि देववत्पितृ
भ्योपिदेयं तदेतत्कृष्यप्रकारो देवेभ्यश्चपितृभ्यश्चदद्याद्भागंतुविंशकं त्रिंशद्भा
गंब्राह्मणानांकृषिंकुर्वन्नदुष्यतीति बृहस्पतिरपि राज्ञेदत्वातुषड्भागंदेवानां
चैकविंशकं त्रिंशद्भागंतुविप्राणांकृषिंकुर्वन्नदोषभाक् इति विप्रस्येतिकर्त्तव्यां
कृषिमुक्त्वावर्णान्तराणामपितामाह क्षत्रियइति ४ गि ४ यद्यपिवैश्यस्यकृषिः

क्षत्रियोपिकृषिंकृत्वादेवान्विप्रांश्चपूजयेत् २३ वैश्यःशूद्र
स्तथाकुर्यात्कृषिवाणिज्यशिल्पकम् ॥

पूर्वाध्यायेविहितातथाप्यत्रेतिकर्त्तव्यताविधानेनायंपुनरुपन्यासः तथाकुर्या
दित्यादेशेनवाब्राह्मणकृष्योविहितेतिकर्त्तव्यतासर्वाप्यत्रविहिताभवति कृषि
वाणिज्यशिल्पयोरपि कलौवर्णचतुष्टयसाधारणधर्मत्वंदर्शयितुंवाणि
ज्यशिल्पकमित्युक्तं यद्यपिशूद्रस्यापिकृष्यादिकमभ्युपगम्येततर्हितेनैवजी
वनसिद्धेःकलौद्विजशुश्रूषापरित्याज्येत्याह किंकर्मेति लाभाधिकोनवि

शंकया ४

विकर्मकुर्वतंशूद्राद्द्विजशुश्रूषयोज्झिताः भवं
न्त्यल्पायुषस्तेवैनिरयंयांत्यसंशयम् ॥ ॥

शिष्टजीवनहेतुत्वात् कृष्यादिकंविकर्मेत्युच्यते द्विजशुश्रूषयानुजीर्णवस्त्रादिक
मेवलभतइतिनलाभाधिक्यं अतोधिकलिप्सयाकृष्यादिकमेवकुर्वंतोयदि
द्विजशुश्रूषांपरित्यजेयुस्तदातेषामैहिकमामुष्मिकंचहीयेत इत्थंवर्णचतुष्टय
साधारणंजीवनहेतुधर्मंप्रतिपाद्यनिगमयति चतुर्णामिति अतीतेष्वपिक

चतुर्णामपिवर्णानामेषधर्मः सनातनः २५ ॥

युगे ल्पेषुविप्रादीनांकृष्यादिकमस्तीतिसूचयितुंसनातनइत्युक्तं यद्यपिस्तत्पनरे
ष्विवात्रापिवर्णधर्मानंतरमाश्रमधर्मावक्तुमुचितास्तथापिव्यासेनादृष्टत्वाद
चार्येणोपेक्षिताः अस्माभिस्तुश्रोतृहितार्थायनेपिवर्ण्यंते नचपूर्वाध्यायएव
कुतोनवर्णिताइतिमंतव्यं तत्रप्रसंगाभावात् अत्रतुचोक्तवेर्णाश्रमागतमि
त्याश्रमशब्देनतेषांबुद्धिस्थत्वादस्तिप्रसंगः तेचाश्रमाश्चतुर्विधाः तदुक्तंस्कांदे

पा॰मा॰
१७८

210

ब्रह्मचारीगृहस्थश्चवानप्रस्थोथभिक्षुकः एतेक्रमेणविप्राणांचत्वारः पृथगाश्रमा
इति मनुरपि ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा एतेगृहस्थप्रभवाश्च-
त्वारः पृथगाश्रमाइति गृहस्थप्रभवा गृहस्थोपयोगिनइत्यर्थः उपनयनंचग
र्भाधानादिषुपठितत्वाद्ब्राह्मः संस्कारः तदानन्तरोक्तः द्विविधोहिसंस्कारोभवति
ब्राह्मोदैवश्च गर्भाधानादिः स्मार्त्तोब्राह्मः पाकयज्ञहविर्यज्ञाः सौम्याश्च दैवो
ब्राह्मेणसंस्कृतोदेवानांसमानतांसायुज्यंगच्छतीति गर्भाधानादयोगौतमे
नानुक्ताः गर्भाधानपुंसवनानवलोभनजातकर्मनामकर्मनिष्क्रमणान्न
प्राशनचौलोपनयनंचचत्वारिवेदव्रतानिस्नानसहचारिणीधर्मसंयोगः पं-
चानांयज्ञानामनुष्ठानं अष्टकापार्वणश्राद्धश्रावण्याग्रयणीचैत्र्याश्वयुजीचेति
सप्तपाकयज्ञसंस्थाः अग्न्याधेयमग्निहोत्रंदर्शपूर्णमासावाग्रयणंचातुर्मास्यानि
निरूढपशुबन्धसौत्रामणीतिसप्तहविर्यज्ञसंस्थाः अग्निष्टोमोत्यग्निष्टोमउ
क्थ्यःषोडशीवाजपेयोतिरात्रोप्तोर्यामइतिसप्तसोमसंस्थाइत्येते चत्वारिंश

ऋषीणां समानतां सायुज्यं च दैवेनोत्तरेण संस्कृतो×

धर्म×

नाम

संस्कारा इति तत्र गर्भाधानादयश्चूडांताः संस्कारा वीजगर्भजनितदोषनिवृत्त्यर्था
स्तत एव याज्ञवल्क्यश्चूडांतान्संस्कारान्निरूप्याह एवमेनः शमं याति वीजगर्भस
मुद्भवमिति अतो ब्रह्मचर्याश्रमात्प्राक्के वर्ण्यन्ते तत्र द्विजानां गर्भाधानादयः समं
त्रकाः कार्यास्तदाह याज्ञवल्क्यः ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः
निषेकादिश्मशानांतास्तेषां वै मंत्रतः क्रिया इति गर्भाधानादीनां कालविशेषमा
ह स एव गर्भाधानमृतौ पुंसः सवनं स्पंदनात्पुरा षष्ठेष्टमे वा सीमंतो मासे सूते जात
कर्म च अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः षष्ठेन्नप्राशनं मासि चूडाका
र्या यथाकुलमिति रजोदर्शनदिवसमारभ्य षोडश दिनान्यृतुः तदाह मनुः ऋ
तुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः चतुर्भिरितरैः सार्द्धमहोभिः सद्वि
गर्हितैः तासामाद्याश्चतस्रस्तु निंदितैकादशी च या त्रयोदशी च शेषास्तु प्रश
स्ता दश रात्रयः युग्मासु पुत्रा जायंते स्त्रियो युग्मासु रात्रिषु तस्माद्युग्मासु पुत्रा
र्थी संविशेदार्त्तवे स्त्रियमिति रजोदर्शनमारभ्य चत्वार्य्यहानि सद्विगर्हितानि

पारस्करोपि

पा.मा.
१७९

युग्मासु समासु संविशेदन्वेत् एवमृतौ गर्भाधानं कृत्वा गर्भचलनात् प्राक् पुंसवनं का
र्यं तच्च द्वितीये वा तृतीये वा मासि भवति तदाह बैजवापः मासि द्वितीये वा तृतीये वा
पुमांस्यव्यक्त इति मासि द्वितीये वा तृतीये वा यदहः पुंसा नक्षत्रेण चन्द्रमा युक्तः स्या
दिति पुंनक्षत्राणि च हस्तादीनि ज्योतिःशास्त्रप्रसिद्धानि अनवलोभनमाश्वला
यनगृह्यपरिशिष्टेऽवगंतव्यं सीमंतोन्नयनमस्य याज्ञवल्क्योक्तकालादन्येपि का
ला मुनिभिर्दर्शिताः तत्र लौगाक्षिः तृतीये गर्भमासे सीमंतोन्नयनं कार्यमिति आ
पस्तंबोपि प्रथमे गर्भे चतुर्थे मासीति बैजवापोपि अथ सीमंतोन्नयनं चतुर्थे पं
चमे षष्ठे वापीति सांख्यायनगृह्येपि सप्तमे मासि प्रथमे गर्भे सीमंतोन्नयनमि
ति पारस्करोपि गर्भस्पंदने सीमंतोन्नयनं यावद्वा न प्रसव इति विशेषाश्रवणात्
सर्वेप्येते विकल्प्यंते एतच्च सीमंतोन्नयनं क्षेत्रसंस्कारत्वात् सकृदेव कर्तव्यं
न प्रतिगर्भं तथा च हारीतः सकृत्संस्कृतसंस्काराः सीमंतेन द्विजस्त्रियः यं यं ग
र्भं प्रसूयंते स सर्वः संस्कृतो भवेदिति देवलोपि सकृच्च संस्कृता नारी सर्वगर्भेषु

राम

संस्कृतेति गर्भसंस्कारपक्षे तु प्रतिगर्भमावर्त्तनीयं तथा च विष्णुः सीमंतोन्नयनं क
र्म न स्त्रीसंस्कार इष्यते केचिद्गर्भस्य संस्कारात्गर्भगर्भं प्रयुंजत इति अनयोः पक्ष
योर्यथागृह्यं व्यवस्था अकृतसीमंतायाः प्रसवे सत्यव्रतस्त्वाह स्त्री यदाकृतसी
मंता प्रसूयेत कथंचन गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हतीति जातकर्मणः
कालो याज्ञवल्क्येन दर्शितः मास्येते जातकर्म चेति एते आगते जात इति याव
त् विष्णुरपि जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितमिति स्वगृह्य इति शेषः त
त्र स्नानं सचैलं कार्यं तथा च संवर्त्तः जाते पुत्रे पितुः स्नानं सचैलं तु विधीयत इ
ति जातकर्म च नाभिवर्द्धनात्प्रागेव कार्यं प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म वि
धीयते मंत्रवत्प्राशने चास्य हिरण्यमधुसर्पिषामिति वर्द्धनं छेदनं न चाशौ
चशंकया कर्मानधिकार इति वाच्यं नाभिछेदात्प्रागाशौचाभावात् तथाह
जैमिनिः यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं छिन्ने नाले ततः पश्चात्सू
तकं तु विधीयत इति विष्णुधर्मोत्तरे अछिन्ननाभ्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्म

पा॰ मा॰
१८०

नि आशौचोपरमे कार्यमथवानियतात्मभिरिति तत्रश्राद्धं हेमद्रव्येण कार्यं तथा च व्यासः
द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वलेति आ
दिपुराणे पक्वान्ननिषेधो दर्शितः जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि यस्मात्त्वां
द्भूयणात्तत्र तृप्तिस्तेषां भवति नान्यथेति तस्मिन्दिने यथाशक्तिदानं कर्त्तव्यं तदुक्तमादि
पुराणे देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां आयांति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा
तत्र दद्यात्सुवर्णं तु भूमिं गां तुरगं रथमिति शंखोपि सर्वेषामसकुल्यानां द्विपदं चतुष्प
दधान्यहिरण्यादि दद्यादिति एतच्चाशौचमध्येपि कार्यं आशौचे तु समुत्पन्ने पुत्रज
न्म यदा भवेत् कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यतीति नामकरणस्य याज्ञ
वल्क्योक्तकालादन्येपि कालामनुना दर्शिताः नामधेयं दशम्यां तु द्वादश्यां वास्य कार
येत् पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्वित इति कारयेदिति स्वार्थिको णिच् न त
तस्तु नाम कुर्वीत पितैव दशमेहनीति विष्णुपुराणवचनात् यदा पितुरभावे त्वयो
ग्यत्वे वान्येन कारयेत् तथा च शंखः कुलदेवतानक्षत्राभिसंबंधं पिता नाम कुर्या

राम
१८१

त अन्यो वा कुलवृद्ध इति भविष्यपुराणेपि नामधेयं दशम्यां च केचिदिच्छंति पार्थिव द्वादश्या
मथवा रात्रौ मासे पूर्णे तथापरे अष्टादशेहनि तथा वदन्त्यन्ये मनीषिणः इति गृह्यपरिशि
ष्टेपि जननाद्दशरात्रे वा व्युष्टे शतरात्रे संवत्सरे वा नामकरणमिति तत्र च गृह्यानुसारेण
व्यवस्था नामधेयस्वरूपं वर्णभेदेन दर्शयति मनुः मांगल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बला
न्वितं वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितं शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितं
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतं स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोरमं मंगल्यं
दीर्घवर्णांतमाशीर्वादाभिधानवदिति मंगल्यादीनि पूर्वपदानि शर्मादीन्युत्तरपदानि त
था च नामान्येवंविधानि संपद्यंते श्रीशर्मा विक्रमपालः माणिक्यश्रेष्ठी दीनदास इत्या
दि स्त्रीणां तु श्रीदासीत्यादि सुखोद्यं सुखेन वदितुं शक्यमित्यर्थः अत्र विशेषमाह वैज
वापः पिता नाम करोत्येकाक्षरं द्व्यक्षरं चतुरक्षरमपरिमितं वा घोषवदाद्यंतःस्थं दीर्घा
भिनिष्ठानांतमिति अननपिः घोषवन्ति यान्यत्र राश्यावर्गे तृतीयचतुर्थानि तान्यादौ का
र्याणि अन्तस्था यरलवा मध्ये कर्तव्याः अभिनिष्ठानो विसर्जनीयः तथा च भद्रया
नो जातवेदा इत्यादि नाम भवति यथोक्तनामकरणस्य फलमाहतुः शंखलिखितौ र

पा॰मा॰
१८२

वं कृतेनाग्निरुद्धवितत्कुलं भवतीति अथ निष्क्रमणं तत्र मनुः चतुर्थे मासि कर्त्तव्यं शिशो
र्निष्क्रमणं गृहात् इति तत्र कर्त्तव्यमाह यमः ततस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनम्
चतुर्थे मासि कर्त्तव्यं शिशोश्चन्द्रस्य दर्शनमिति लोगाक्षिरपि तृतीये मासे दर्शनमादि
त्यस्येति पुराणेपि द्वादशेह्नि राजेन्द्र शिशोर्निष्क्रमणं गृहात् चतुर्थे मासि कर्त्तव्यं तथा
न्येषां च संमतमिति अत्रापि यथाशाखं व्यवस्था अथान्नप्राशनं तत्र यमः ततोन्न
प्राशनं मासि षष्ठे काले यथाविधि अष्टमे वापि कर्त्तव्यं यद्वेष्टं मंगलं कुले इति शंखो
पि संवत्सरेन्नप्राशनमर्द्धसंवत्सरमित्येके लोगाक्षिः षष्ठे मासेन्नप्राशनं जातेषु दं
तेषु वेति तत्र विशेषमाह मार्कण्डेयः देवतापुरतस्तस्य धात्र्युत्संगगतस्य च अलंकृ
तस्य दातव्यमन्नं पात्रे च कांचने मध्वाज्यकनकोपेतं प्राशयेत्पायसं तु तं कृतप्राशम
थोत्संगात् बालं समुत्सृजेदिति अन्नप्राशनानन्तरं जीविकापरीक्षा मार्कण्डेयेन
दर्शिता अथ तोयप्रविन्यस्य शिल्पभाण्डानि सर्वशः शास्त्राणि चैव वस्त्राणि ततः पश्ये
त्तु लक्षणम् प्रथमं यत् स्पृशेद्बालः स्वतो भाण्डं स्वयं तदा जीविका तस्य वै तेन तेन भवे
भविष्यतीति अथ चूडाकरणं तत्र यमः ततः संवत्सरे पूर्णे चूडाकर्म विधीयते द्वितीये

राम
१८२

वा तृतीये वा कर्त्तव्यं श्रुतिदर्शनादिति बैजवापः त्रिवर्षे चूडाकरणमिति शंखोपि तृतीये व
र्षे चूडाकर्म पंचमे वेति लौगाक्षिरपि तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाकरणं शौन
कोपि तृतीये वर्षे चौलं यथाकुलधर्मं वेति नक्षत्रभेदेन चूडानियममाह लौगाक्षिः
दक्षिणतः कम्बुजा वशिष्ठानामुभयतोत्रिकश्यपानां मुंडा भृगवः पंचचूडा अंगिरसः मं
ग गलार्थं शिखिनोन्ये यथाकुलधर्मं वेति कम्बुजा केशपंक्तिः अत्र यथा स्वशाखव्यव
स्था अत्र यथोक्ताः कृताकृता अनुपनीतविषयाः अतः सत्सूत्रेगादन्येपि केचनानुपनी
तधर्माः कथ्यंते अत्र गौतमः प्रागुपनयनात्कामचारवादभक्षा इति कामचारः इच्छा
गतिः कामवादो श्लीलादिभाषणं कामभक्षः पर्युषितादिभक्षणं विष्णुपुराणेपि भक्षा
भक्ष्ये तथा पेयापेये वाच्यावाच्ये तथानृते अस्मिन्काले न दोषः स्यात्स यावन्नोपनीयत इ
ति एतच्चाभक्ष्यभक्षणं महापातकहेतुद्रव्यव्यतिरिक्तविषयं अत एव स्मृत्यंतरं स्यात्
कामचारभक्षोक्तिर्महतः पातकादृत इति यथा भक्ष्याभक्ष्यादिनियमो नास्ति एवमाच
मनादिकर्त्तव्यानंतरमपि नास्ति तदाह वशिष्ठः न ह्यस्य विद्यते कर्म किंचिदामौंजिबं
धनात् वृत्त्या शूद्रसमस्तावद्यावद्वेदे न जायत इति गौतमोपि यथोपपादितः मूत्र

पुरीषो भवति तस्माच्च मनकल्प्या विद्यते च ब्रह्माभिव्याहरेदन्यत्र स्वधानिनयनादिति अन
ध्यायास्तु कर्त्तव्याः तदाह मार्कंडेयः प्राप्ते तु पंचमे वर्षे अप्रसुप्ते जनार्द्दने षष्ठीं प्रतिपदं चैव
वर्ज्जयित्वा तथाष्टमीं रिक्तां पंचदशीं चैव सौरिभौमदिने तथा एवं सुनिश्चिते काले वि
द्यारंभं तु कारयेत् पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं स्वविद्यासूत्रकारांश्च स्वां
विद्यां च विशेषतः एतेषामेव देवानां नाम्ना तु जुहुयाद् घृतं दक्षिणाभिर्द्विजेंद्राणां क
र्त्तव्यं चात्र पूजनं प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुं अध्यापयेत्तु प्रथमं
द्विजातिभिः सुपूजितः ततः प्रभृत्यनध्यायान्वर्ज्जनीयान्विवर्ज्जयेत् अष्टमीं द्वितयं
चैव पक्षान्ते च दिनत्रयं इति गर्भाधानादिचौलान्तसंस्कारप्रकरणम् अथोपनयनं
तत्र मनुः गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं गर्भादेकादशे राज्ञो गर्भात्तु द्वाद
शे विशः ब्रह्मवर्च्चसकामस्य कार्यं विप्रस्य पंचमे राज्ञो बलार्थिनः षष्ठे वैश्यस्ये
हार्थिनोऽष्टमे आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते आद्वाविंशात्क्षत्रबंधो
राचतुर्विंशतेर्विशः अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः सावित्रीपतिता व्रा
त्या भवंत्यार्यविगर्हिताः नैतैरपूतैर्विधिवदापद्यपि कदाचन ब्राह्मान्यौनांश्च संब

धानाचरेद्ब्राह्मणः सहेति आपस्तंबोपि सप्तमे ब्रह्मवर्चसकामम् अष्टमे आयुष्कामं न
वमे तेजस्कामं दशमेऽन्नाद्यकामम् एकादशे इंद्रियकामं द्वादशे पशुकाममिति एतच्च
वर्णत्रयस्य साधारणं वर्णव्यवस्थया कालनियममाह स एव वसंते ब्राह्मणमुप
नयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति वर्णानुपूर्व्येणोपनयनस्येति कर्तव्यता-
माह मनुः कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः वसीरन्नानुपूर्व्येण शाण
क्षौमाविकानि चेति कार्ष्णादीनि चर्माण्युत्तरीयाणि तथा च शंखः कृष्णरुरु
वस्ताजिनान्युत्तरीयाणीति वासिष्ठोपि कृष्णाजिनमुत्तरीयं ब्राह्मणस्य रौरवं राज
न्यस्य गव्यं वस्ताजिनं वा वैश्यस्येति तथा पारस्करः ऐणेयमजिनमुत्तरीयं ब्राह्मण
स्य रौरवं राजन्यस्याजं गव्यं वा वैश्यस्य सर्वेषां वा गव्यमिति शाणादीन्युत्तरीयाणि
आपस्तंबः वासः शाणक्षौमाजिनानि काषायं चैके वस्त्रमुपदिशंति ब्राह्मण
स्य मांजिष्ठं राजन्यस्य हारिद्रं वैश्यस्येति वासिष्ठः शुक्लमहतं वासो ब्राह्मणस्य
कार्पासं मांजिष्ठं क्षौमं क्षत्रियस्य पीतं कौशेयं वैश्यस्येति मेखलामाह मनुः मौंजी

त्रिवृत्समाश्लक्ष्णा कार्या विप्रस्य मेखला क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवीति
त्रिवृत्त्रिगुणा यमोऽपि विप्रस्य मेखला मौञ्जी ज्या मौर्वी क्षत्रियस्य तु शणसूत्री तु वै
श्यस्य मेखला धर्मतः स्मृता एतासामप्यभावे तु कुशाश्मन्तकबल्वजैः मेखला त्रि
वृता कार्या ग्रंथिनैकेन वा त्रिवृदिति मनुरपि मुंजाभावे तु कर्त्तव्याः कुशाश्मन्त
कबल्वजैः त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव वेति दंडमाह मनुः ब्राह्मणो वै
ल्वपालाशौ क्षत्रियो वाटखादिरौ पिप्पलौदुंबरौ वैश्यो दंडानर्हन्ति धर्मत इति
अनुकल्पमाह यमः एतेषामप्यभावे तु सर्वेषां सर्वयज्ञियाः इति मनुर्दंडपरि
माणमाह केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः ललाटसंमितो राज्ञः
स्यात्तु नासांतिको विशः इति गौतमोऽपि मूर्द्धललाटनासाग्रप्रमाणा इति दंड
लक्षणमाह मनुः ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः अनुद्वेगकरा नॄ
णां सत्वचो नाग्निदूषिता इति गौतमोऽपि अपीडिता यूपवक्राः सवल्का इति
यज्ञोपवीतमाह मनुः कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत् शाणसूत्रम

ध्यराज्ञोवैश्यस्याविकसूत्रकमिति पैठीनसिरपि कार्पासमुपवीतंब्राह्मणस्यक्षौमंरा
जन्यस्याविकंवैश्यस्येति उक्तोपवीतालाभेयथासंभवंगोवालादिकंग्राह्यं तदा
हदेवलः कार्पासक्षौमगोवालशाणवल्कतृणादिकं सदासंभवतः कार्यमुपवीतं
द्विजातिभिरिति ऋष्यशृंगः अपिवाससीयज्ञोपवीतार्थेकुर्यात्तदभावेत्रिवृ
तासूत्रेण तच्चनवतंतुकंकार्यं तदाहदेवलः यज्ञोपवीतंकुर्वीतसूत्रेणनवतं
तुकमिति कात्यायनः त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रयमधोवृतमिति ऊर्ध्वस्थितेन
दक्षिणेनकरेणायद्वलितंतदूर्ध्ववृतमित्यर्थः यज्ञोपवीतप्रयोगमाहदेवलः
ग्रामान्निष्क्रम्यसंस्थायघरानवत्यंगुलीषुनतन् तावत्त्रिगुणितंसूत्रंप्रक्षाल्याब्लिं
गकैस्त्रिभिः देवागारेथवागोष्ठेनद्यांवान्यत्रवाशुचौ सावित्र्यात्रिविधंकुर्यात्त
वसूत्रंतेनतद्भवेत् बिल्वाश्वत्थादियज्ञीयवृक्षस्यान्यतमस्यतु बध्नीयात्तत्सजीवं
तुपितृभ्योनमइत्यथ आमंत्र्यावेदितंव्यस्यात्पितृणांतुतृप्तिदंहितत् त्रिस्ताडयेत्
करतलेदेवानांतृप्तिदंहितत् सव्येमृदंगृहीत्वाग्निंस्थापयेद्भूरितिभुवनं पत्रं

पा॰मा॰
१८४

पुष्पं फलं वापि व्याहृतीभिः प्रतिक्षिपेत् अभिमंत्र्याथ भूरग्निश्चेति त्वृचत्रयं त्रिभिः ह
विष्णुर्लिंगैस्त्र्यम्बकस्य मंत्रेणा वा बध्नीयादिति अथ धारणमंत्रः यज्ञोपवीतमित्यादि ग्रं
थिनियममाह कात्यायनः त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यत इति यज्ञो
पवीतपरिमाणमाह मनुः पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं तद्धार्यमुपवी
तं स्यान्नातिलंबं न चोच्छ्रितमिति देवलोपि स्तनादूर्ध्वमधो नाभेर्न कर्तव्यं कथं
चनेति उपवीतसंख्यामाह भृगुः उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते एकमेव
यतीनां स्यादिति शास्त्रस्य निश्चय इति एतच्च नित्याभिप्रायं बहुत्वकामस्य वा
तु तथाह देवलः बहूनि वायुष्कामस्येति एतच्चोपवीतं सदा धार्यं तथाह भृगुः
सदोपवीतिना भाव्यं सदा बद्धशिखेन च विशिखो व्युपवीतश्च यत्करोति न तत्कृ
तं मंत्रहस्तस्थितं कार्ये यस्य यज्ञोपवीतकं नोद्धरेच्च ततः प्राज्ञो यद्दृष्टं यथा
त्मनः सकृच्चो धारणात्तस्य प्रायश्चित्ती भवेद्द्विज इति उपवीते विशेषमाह देव
लः स्कंधे सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् सावित्र्या दशकृत्वोद्भिर्मंत्रि

राम
१८४

222

नाभिसल्लुठयेत् विधिवत्तं वाप्यधीयानं तमुक्तानि जिनमुत्सृजेत् यज्ञोपवीतादीनांचो
टनादेः प्रतिपत्तिमाह मनुः मेखलामजिनं दंडमुपवीतं कमंडलुं अप्सु प्रास्य विन
ष्टानि गृह्णीतान्यानि मंत्रवत् इति अथ दंडग्रहणादिधारणानंतरमादित्योपस्थानं का
र्यं तदाह मनुः प्रतिगृह्येप्सितं दंडमुपस्थाय च भास्करं प्रदक्षिणं परीत्याग्निं चरे
द्भैक्षं यथाविधीति दंडप्रतिग्रहणानंतरेतिकर्त्तव्यतामुक्त्वा उपनयनं प्राप्य गायत्रीम्
हत्वा कार्यमतं भास्करमुपस्थाय सोहमित्येवं ज्ञात्वाग्निं परिचर्य्यमेतं चेदित्यर्थः
अग्निपरिचर्यामनुनादर्शितो दूरादाहृत्य समिधः संनिदध्याद्विहायसि सायंप्रा
तश्च जुहुयात्ताभिरग्निमतंद्रित इति अंतरिक्षे स्थापयेदित्यत्र भूमावित्यर्थः समिदा
हरणे विशेषमाह वैजवापः प्रातःसमयादुदीचीं दिशं गत्वा अहिंसन्नरण्या
त्समिध आहरेत् शुष्कां ब्रह्मवर्चसकामः आर्द्रास्त्वन्नाद्यकाम इति समिल्लक्षण
माह कात्यायनः नांगुष्ठादधिका कार्या समित्स्थूलतया क्वचित् न वियुक्ता
त्वचा चैव न सकीटा न पाटिता प्रादेशान्नाधिका न्यूना न तथा न स्याद्विशाखिका

224

पा॰मा॰
२८५

नासपर्वीनानियामाहोमेषुतु विज्ञाननानिविशीर्णानि विमलाहृत्वा वक्ष्यमाणविधिना कुर्यात् इ
ध्मस्यलाभेतु सोऽदृष्टकर्मसिद्धिविनाशिकेति समिन्नियमः उक्तो वा ... पालाशः
समिधः कार्याः खादिर्यस्तदलाभतः शमीरोहितकाश्वत्थास्तदभावेऽर्कवेतसाविति
अग्निकार्याकरणे प्रत्यवायमाह हारीतः अग्निजग्नाहवैमृत्युर्हिंसयन्नृत्वचारिणं अ
ग्निस्तं मोचयामास तस्मात्परिचरेत्तमिति भिक्षाचर्याप्रकारमाह याज्ञवल्क्यः ब्रा
ह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तये आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ब्रा
ह्मणक्षत्रियविशां भैक्षचर्या यथाक्रममिति ब्राह्मणेष्विति स्वस्वजातीयोपलक्षणं
अत एव व्यासः ब्राह्मणक्षत्रियविशां श्रेयो भैक्षमन्वहं सजातीयगृहेष्वेव सार्वव
र्णिकमेवे वा इति सार्ववर्णिकत्वमापद्विषयं अत एव मनुविष्णुहारीतदर्शितं चातुर्व
र्ण्ये चरेद्भैक्षमलाभे कुलमन्वेदनेति आपद्यपि नस्यन्नादर्यं गृह्णीयात् तदाहाङ्गिराः
आममेवाददीतास्मादवृत्तावेकरात्रिकं आमं प्रयतिसंसारे धर्मज्ञेभ्यः प्रतीच्छितं
तस्मादाममगृहीतंक्षमन्नादंयंगिरोऽब्रवीदिति अनापदि स्वजातीयेष्वपि ब्राह्मणे

राम
२८५

क्षैव भैक्ष्यमाहरेत् तथा च मनुः वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ब्रह्मचार्याहरेद्भैक्ष्यं गृहेभ्यः
प्रयतोऽन्वहमिति आदिमध्यावसानेष्विति आपस्तम्बः भिक्षाप्रवर्त्तनवाक्ये वर्णक्रमेणादिम
ध्यावसानेषु भवच्छब्दः प्रयोज्यः तथा च मनुः भवत्पूर्वं चरेद्भैक्ष्यमुपनीतो द्विजोत्तमः भवन्म
ध्यं तु राजन्यो वैश्यस्तु भवदुत्तरमिति उक्तेषु केषु चिदप्यलाभे माह मनुः गुरोः कुले न भि
क्षेत न ज्ञातिकुलबन्धुषु अलाभे त्वन्यगेहानां पूर्वं पूर्वं परित्यजेत् सर्वं वापि चरेद्ग्रामं पू
र्वोक्तानामसंभवे नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेदिति यत्तु मातरं वा स्वसारं
वा मातुर्वा भगिनीं निजां भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेदिति तदुपनयनाङ्ग
भिक्षाविषयं तच्च भैक्ष्यं भोजनपर्याप्तमाहर्तव्यं अन्यथा दोषश्रवणात् तदाह यमः ग्रा
सार्थमात्रादधिकं न कश्चिद्भैक्ष्यमाहरेत् युज्यते स्तेयदोषेण कामतोऽधिकमाहरन्निति
तच्च भैक्ष्यं गुरवे निवेद्य तदनुज्ञया भोक्तव्यं तदाह मनुः समाहृत्य तु तद्भैक्ष्यं यावदर्थम
मायया निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिरिति गुर्वसन्निधौ तद्भार्यादिभ्यो
निवेदयेत् तदाह गौतमः निवेद्य गुरवेऽनुज्ञातो भुञ्जीतासंनिधौ तद्भार्यापुत्रसब्र
ह्मचारिभ्य इति गुर्वनुज्ञया तु भैक्ष्यं सत्कृत्य भुञ्जीत तदाह याज्ञवल्क्यः कृताग्निकार्यो

भुंजीत वाग्यतो गुर्वनुज्ञया आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् सत्कारश्च
हारीतेन दर्शितः भैक्षमवेक्षितं पर्य्यग्निकृतमादित्यदर्शितं गुरवे निवेदितमनु
ज्ञातममृतसंमितं प्राहुः यदश्नाति ब्रह्मचारी ब्राह्मसिद्धिमवाप्नोति गौतमोपि
सायंप्रातरन्नमभिपूजितमनिन्दन् भुंजीतेति एकान्ननिषेधमाह मनुः भैक्षे
णवर्त्तयन्नित्यं नैकान्नाशी भवेद्व्रती भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता
व्रतेवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् काममभ्यर्थितोश्नीयाद्व्रतमस्य न लु
प्यत इति अकरणे प्रत्यवायमाह अकृत्वा भैक्षचरणमसमिध्य च पावकम्
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेदिति उपनीतस्य नियममाह यमः दं
डं कमंडलुं वेदं मौंजीं रशनां तथा धारयेद्ब्रह्मचर्यं च भिक्षान्नाशी गुरोर्वस
न् वेदोदर्भमुष्टिः गुरोर्गृहस्थः इत्यर्थः यमः मेखलामजिनं दंडमुपवीतं च
नित्यशः कौपीनं कटिसूत्रं च ब्रह्मचारी च धारयेत् मनुः अग्नीन्धनं ब्रह्मचर्य्या
मधःशय्यां गुरोर्हितं आसमावर्त्तनात्कुर्यात्कृतोपनयनो द्विज इति सु

मनुरपि ब्रह्मचर्यं तपो भैक्ष्यं संध्ययोरग्निकर्म च स्वाध्यायं गुरुवृत्तिश्च चर्येयं ब्रह्म
चारिण इति गुरुवृत्तिप्रकारमाह व्यासः जघन्यशायी पूर्वं स्यादुत्थायी गुरु
वेश्मनि यच्च शिष्येण कर्त्तव्यं यच्च दानेन वा पुनः कृतमित्येव तत्सर्वं कृत्वा ति
ष्ठेत्तु पार्श्वतः किंकरः सर्वकारी च सर्वकर्मसु कोविदः अभुक्तवति नाश्नीयाद
पीतवति नो पिबेत् नातिष्ठति नयासीत नासुप्ते प्रस्वपेत्तथेति विश्वामित्रः त
द्भार्यापुत्रयोश्चैव वृद्धानां धर्मशीलिनां शुश्रूषा सर्वदा कार्या प्रणामादिभिरे
व चेति वर्ज्यानाह याज्ञवल्क्यः मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं
भास्करालोकनाश्लीलपरिवादादि वर्जयेदिति मनुरपि वर्जयेन्मधुमां
सं च गंधमाल्यरसान् स्त्रियः शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनं अभ्यंग
मञ्जनं चाक्ष्णोरुपानच्छत्रधारणं कामं क्रोधं च लोभं च नर्त्तनं गीतवादनं द्यू
तं च जनवादं च परिवादं तथानृतं स्त्रीणां च प्रेक्षणालंभमुपघातं परस्य च
एकः शयीत सर्वत्र न रेतः स्कंदयेत्क्वचिदिति स्वनदर्शितं चत्वारश्चाश्रमाः

पा॰मा॰
१८७

ब्रह्मचारी गृहस्थश्च वानप्रस्थः परिव्राजकः तेषां वेदमधीत्य वेदौ वेदान्वापि वीर्ल्ला
ब्रह्मचर्यो गृहमिच्छेत्समावर्तेयादिति भविष्यत्पुराणेऽपि गार्हस्थ्यमिच्छन्भूपालकु
र्याद्दारपरिग्रहं ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकं वैखानसो वापि भवे
त्परिव्राडथवेच्छयेति तस्मादत्यागिविषयत्वेनैव गार्हस्थ्यं व्यवस्थापनीयमि
ति इति ब्रह्मचारिप्रकरणम् अथ गृहस्थाश्रमं निरूपयितुं तदधिकारहेतु
स्नानमादौ निरूप्यते तत्र याज्ञवल्क्यः गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया वे त
दं व्रतानि वा पारं नीत्वा ह्युभयमेव वेति तत्र दत्तवरो वरो मनुना दर्शितः न पूर्वं
गुरवे किंचिदुपकुर्वीत धर्मवित् स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् क्षे
त्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः धान्यवासांसि शाकं वा गुरवे प्रीतिमावहे
त् इति अर्थं च वरो गुरुप्रीत्यर्थो न तु विद्यानिष्क्रयार्थः वेदविद्याहस्यमूल्य
स्यासंभवात् तथा च छन्दोगश्रुतिः यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां
दद्यादेतदेव ततो भूय इति तापनीयश्रुतिरपि सप्तद्वीपवतीं भूमिं दक्षिणार्थं न क

राम
१८७

राधा॥

त्प्यम इति हारीतस्मृतिः एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् पृथिव्यां नास्ति तद्द्
व्यं यद्दत्वा चानृणी भवेदिति वेदव्रतानि वेत्यनेन स्नातकत्रैविध्यं दर्शितं तत्रैवेदमात्र
परिसमापक एकः व्रतमात्रपरिसमापको द्वितीयः उभयपरिसमापकस्तृतीयः व्र
तशब्देनात्र गृह्यप्रसिद्ध उपनयनव्रतसावित्रीव्रतवेदव्रतारण्यकव्रतानि वि
वक्षितानि स्नातकत्रैविध्यं हारीतेनोक्तं त्रयः स्नातका भवंति विद्यास्नातको व्रत
स्नातको विद्याव्रतस्नातक इति वेदं पारं नीत्वेत्यत्रापि वाग्रतिरपि विवक्षिता अत एव
कूर्मपुराणे वेदं वेदौ तथा वेदान्वेदान्वा चतुरो द्विजः अधीत्य चाधिगम्यार्थं ततः स्नायाद्द्वि
जोत्तम इति स्नातकप्रकारश्च गृह्ये प्रसिद्धः स्नातकधर्माः कूर्मपुराणे दर्शिताः यज्ञो
पवीतद्वितयं सोदकं च कमंडलुं छत्रं चोष्णीषममलं पादुके चाप्युपानहौ रौक्मे च
कुंडले वेदं कृत्तकेशनखः शुचिः स्वाध्याये नित्ययुक्तः स्याद्बहिर्माल्यं च धारयेत् शु
क्लांबरधरो नित्यं सुगंधः प्रियदर्शनः न जीर्णमलवद्वासो भवेच्च विभवे सति न र
क्तमुल्बणं चान्यधृतं वासो न कुंडिकामिति इति स्नातकप्रकरणम् अथ विवा
हः तत्र मनुः गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि उद्वहेत द्विजो भार्यां सवर्णां

पा.मा.
१८८

लक्षणान्वितां॥ याज्ञवल्क्योपि अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कांतामसपिंडां यवीयसीं अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् इति लक्षण्यां वा बाह्याभ्यंतरलक्षणयुक्तां वा बाह्यानि लक्षणानि मनुना दर्शितानि अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियम् वर्ज्यान्याह स एव नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं नालोमिकां नातिलोमां न वाचालां न पिंगलां नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकां न पक्ष्यहिप्रेष्यनाम्नीं न विभीषणनामिकामिति कपिला रक्ततंडुलकवर्णा पिंगला अग्निवर्णा अंत्येति म्लेच्छनाम्नी विष्णुपुराणेपि न श्मश्रुव्यंजनवतीं न चैव पुरुषाकृतिं न घर्घरस्वरां क्षामां तथा काकस्वरां न च नानिबद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः यस्याश्च रोमशे जंघे गुल्फौ यस्यास्तथोन्नतौ गंडयोः कूपकौ यस्या हसंत्यास्तां च नोद्वहेत् नातिरूक्षच्छविं पांडुकरजामरुणेक्षणां आपीनहस्तपादां च न कन्यामुद्वहेद्बुधः न वामनां नातिदीर्घां नोद्वहेत्संगतभ्रुवं न चातिछिद्रदशनां न करालमुखीं नर इति आभ्यंतराणि लक्षणान्याश्वलायनगृह्येभिहितानि दुर्विज्ञेयानि लक्षणानीत्यष्टौ पिंडान्कृत्वा ऋतमग्रे प्रथ

राम
१८८

मंयन्नमते सत्यं प्रतितिष्ठितं यदियं कुमार्यभिन्ना तानदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति
पिंडानभिमंत्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति क्षेत्राच्चेदुभयतः सस्याद्गृह्णीयादन्नवत्यस्याः
स्याः प्रजा भविष्यतीति विद्याद्गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो हृदा
त्सर्वसम्पन्ना देवनात्कितवी चतुष्पथाद्द्विप्रव्राजिनी इरिणादधन्या श्मशानात्पतिघ्नी
ति विप्रव्राजिनी विविधं प्रकर्षेण व्रजतीति विप्रव्राजिनी स्वैरिणीत्यर्थः अनन्यपूर्वि
कामिति दानेनोपभोगेन वा पुरुषान्तरापरिगृहीतां स हि पुनर्भूत्वेनोच्यते अत एव का
श्यपः सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः वाचा दत्ता मनोदत्ता कृतकौतुकमं
गला उदकस्पर्शिता या च या च पाणिगृहीतिका अग्निं परिगता या च पुनर्भूप्रसवा च
या इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवदिति बौधायनः वाग्दत्ता मनोदत्ताग्निप
रिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्त विधः पुनर्भूस्तां गृहीत्वा न प्र
जां धर्मं विन्देदिति नारदोपि कन्यैवाक्षतयोनिर्या पाणिग्रहणपूर्विका पुनर्भूः प्रथमा प्रोक्ते
या पुनः संस्कारकर्मणेति याज्ञवल्क्योपि अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनरि
ति कान्तां कमनीयां मनोनयनानन्दकारिणीं अत एवापस्तम्बः यस्यां मनश्चक्षुषो
र्निबंधस्तस्यामृद्धिरिति सपिंडामिति समान एकः पिंडो यस्याः सा सपिंडा न सपिंडा असा

न्न

दूषिता २

पा॰मा॰
१९९

पिंडाः सपिंडता च सप्तमपुरुषपर्यवसायिनी तत्रैकः पिंडदाता त्रयः पिंडभाजः पितृपितामहप्र
पितामहाः त्रयो लेपभाजो वृद्धप्रपितामहादयः तथा च मत्स्यपुराणं लेपभाजश्चतुर्थाद्याः
पित्राद्याः पिंडभागिनः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति मार्कंडेयोपि पि
तापितामहश्चैव तथैव प्रपितामहः पिंडसंबंधिनो ह्येते विज्ञेयाः पुरुषास्त्रयः लेपसं
बंधिनश्चान्ये पितामहपितामहात् प्रभृत्युक्तास्त्रयस्तेषां यजमानस्तु सप्तमः इत्येवमु
निभिः प्रोक्तः संबंधः साप्तपौरुष इति राजतद्भक्तं भवति समानोपुरुषाणामेकैकक्रियानु
प्रवेशः सापिंड्यहेतुः तथा देवदत्तस्यैकस्य स्वकीयैः पित्रादिभिः षड्भिः सहसा॥ पिंड॥ पिंड्यं
तथा पुत्रादिभिः षड्भिः सहसापिंड्यमिति नन्वेवं सति भ्रातृपितृव्यादिभिः सहसापिंड्यं
नस्यात् परिगणितेष्वनंतर्भावात् मैवम् उद्देश्यदेवतैकेन क्रियैकास्यात्र विवक्षित
त्वात् देवदत्तकर्तृकक्रियायां ये देवतात्वेनानुप्रविशंति तेषां मध्ये यः कोपि भ्रातृपि
तृव्यकर्तृक्रियायामप्यनुप्रविशती त्यस्ति तैः सहसापिंड्यं एवं च भार्याणामपि भर्तृ
कर्तृकपिंडदानक्रियायां सहकर्तृकत्वात् सापिंड्यमिति तदिदं निर्वाच्य सापिंड्य
ग्रंथे पुनरन्यथा सापिंड्यमाहुः तथाहि समानएकः पिंडो देहावयवो येषां ते सपिंडाः
तत्र पुत्रस्य साक्षात्पितृदेहावयवान्वयेन पित्रा सहसापिंड्यं तथा पितामहादिभिरपि पितृ

राम
९८

232

द्वारेण तच्छरीरावयवान्वयात् साक्षान्मातृशरीरावयवान्वयेन मात्रा मातामहादिभिरपि मातृद्वारेण तच्छरीरावयवान्वयात् तथा मातृष्वसृमातुलादिभिरपि मातामहदेहावयवान्वयात् तथा पितृव्यपितृष्वस्रादिभिरपि पितामहदेहावयवान्वयात् तथा पत्न्या सह पत्युरेकशरीरारंभकतया एवं भ्रातृभार्याणामप्येकशरीरारब्धैः स्वस्वपतिभिः सहैकशरीरारंभकत्वेन एवं तत्र तत्र साक्षात्परंपरया वा एकशरीरावयवान्वयेन सापिंड्यं योजनीयं उक्तं द्विविधं सापिंड्यं यस्यां नास्ति सेयमसपिंडा तामुद्वहेत् नन्वेवं सति न कापि विवाहः संभवेत् सर्वत्र सापिंड्यस्य कथंचिद्योजयितुं शक्यत्वात् विधातृशरीरान्तरेत्तद्द्वारेण स्थितत्वात् बहु स्यां प्रजायेयेति श्रुतेः नैष दोषः अविशेषेणाखण्डस्य सापिंड्यस्य सप्तमे पंचमे च पुरुषे पर्यवसितत्वेन ततः ऊर्ध्वं सापिंड्यनिवृत्तेः तथा च गौतमः पिंडनिवृत्तिः सप्तमे पंचमे वेति याज्ञवल्क्योपि पंचमात्सप्तमात्पंचमे सप्तमे च पुरुषे पर्यवसितत्वेन तदूर्ध्वं सापिंड्यनिवृत्तेः तथा च गौतमः पिंडनिवृत्तिः सप्तमे पंचमे चेति याज्ञवल्क्योपि पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति मातृपक्षे पंचमात्पितृपक्षे सप्तमादूर्ध्वं सापिंड्यं निवर्तत इत्यध्याहारः योजनीयं सपिंडता तु पुरुषे सप्तमे विनिवर्तत इति मनुस्मरणात् तदुक्तं भवति पितृपक्षे कूटस्थमारभ्य तत्पुत्रादिगणनायां सप्तमादूर्ध्वं वरवध्वोर्विवाहो न दुष्यति मातृपक्षे च कूटस्थमार

अथ तत्पुत्रादिपरिगणनायां वरवध्वोर्माता चेत् पंचमी भवति तदा तयोः सापिंड्यनिवृत्तेर्विवा
हे न दोषायेति यत्तु विष्णुपुराणवचनं पंचमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीं गृहस्थ उ
द्वहेत् कन्यां न्यायेन विधिना नृपेति तत्र सप्तमीं पंचमीमतीत्येत्यध्याहार्यम् अन्य
था पंचमात्सप्तमादूर्ध्वमिति वचनविरोधात् पंचमे सप्तमे चैव येषां वैवाहिकी क्रिया
क्रियापरा अपि हि ते सर्वे पतिताः शूद्रतां गता इति मरीचिवचनविरोधाच्च यदपि पैठीनसिना
कल्पत्रयमुक्तं पंचमीं मातृतः परिहरेत् सप्तमीं पितृतस्त्रीन्मातृतः पंच पितृतो वेति तत्र द्वि
तीयः कल्पोऽसमानजातीयविषयः यतः शंखः प्राह यद्येकजाता बहवः पृथक्क्षेत्राः पृथ
ग्जनाः एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिष्विति अयमर्थः येषामेकः पिता मा
तरो भिन्नजातीयास्ते मातृभेदसमानजातीयाः तथापि पित्रैक्यादस्ति सापिंड्यं तत्र
त्रिषु पुरुषेष्वतीतेषु निवर्तत इति नन्वेवं सति पितृपक्षेऽपि त्रिभिः पुरुषैः सापिंड्य
निवृत्तेः पंच पितृतो वेति वचनं विरुध्येत एवं तर्हि त्रीन्मातृतः पंच पितृतो वेति पै
ठीनसिवचनं सजातीयेष्वेवाबीजिविषयपरम् अनुकल्पो वास्तु मातृतः पितृशब्देन
बीजी पितृमातृबन्धवः स्मृत्यन्तरे दर्शिताः पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सु
ताः पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः

सुताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवा इति ननु असपिंडामिति न वक्तव्यं वक्ष्यमाणे
नासमानार्षगोत्रजामित्यनेनैव सपिंडाया विवाहनिषेधसिद्धेः सत्यं तथापि या मातुर
सपिंडा भवति सैवोद्वाहकर्मणि प्रशस्तेति वक्तुं तथा च मनुः असपिंडा च या मातुरस
गोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुन इति या मातुरसपिंडा
असगोत्रा च या पितुरसगोत्रा चकारात् सपिंडा सा मिथुनसाध्ये दारकर्मणि द्वि
जातीनां प्रशस्ता परिणेयेत्यर्थः ननु च मातृग्रहणमनर्थकं पितृगोत्रसापिंड्य
निषेधेनैव मातृगोत्रसापिंड्यनिषेधसिद्धेः पृथक्गोत्रपिण्डयोरभावात् एक
त्वं सा गता मंत्रैः पिंडे गोत्रे च सूतके स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे अतो
गांधर्वादिविवाहेषु कन्याप्रदानाभावेन पितृगोत्रसापिंड्ययोरनिवृत्तेः तथा च
मार्कंडेयपुराणे ब्राह्मादिषु विवाहेषु या तूढा कन्यका भवेत् भर्तृगोत्रेण क
र्तव्या तस्याः पिंडोदकक्रिया गांधर्वादिविवाहेषु पितृगोत्रेण धर्मविदिति एतेन
मातुलसुताविवाहविषये विवादोपि परास्तः तथाहि तन्निषेधवचनानि गां
धर्वादिविवाहोढाविषयाणि तत्र सापिंड्यानिवृत्तेरभावात् तदुक्तं ग्राहकस्मृति

इति चेन्न ब्रा
ह्मादिविवाहो
ढाया निवृत्ता
वपि गांधर्वादि
विवाहोढायाः
सापिंड्यानिवृ
त्तेस×सा×
त्सत्वान्तवचन
स× ६

पा॰मा॰ २९१

सदाचारत्वात् ब्राह्मादिविवाहोढाविषया तत्र सापिण्ड्यनिवृत्तेः तानि च निषेधवचनानि
तत्र शातातपः मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च समानप्रवरां चैव द्विजश्चा-
न्द्रायणं चरेत् पैठीनसिरपि पितृमातृस्वसृदुहितरो मातुलसुता धर्मतः स्ता भगिन्य-
स्ता वर्जयेदिति विज्ञायते सुमन्तुरपि पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्त-
दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरकारिणः इति व्यासः
मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिरिति ननु विशेषेण प्रवृत्तानामेषां व-
चनानां कथं विशेषविषयता विशेषवचनबलादिति ब्रूमः तथा च मनुः पैतृष्व-
सेयीं भगिनीं स्वस्रीयां मातुरेव च मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेदिति ए-
तास्तिस्रस्तु भार्यार्थे नोपगच्छेत्तु बुद्धिमानिति भगिनीपदं पैतृष्वस्रेयादौ विशेष-
णं आप्तस्येति मातृभ्रातृविशेषणं तत्र सुतामित्यध्याहारः आप्तस्य सन्निकृष्ट-
स्य सपिण्डस्य गान्धर्वादिनोढायां मातुर्भ्रातुरित्यर्थः पैतृष्वस्रेयीमित्यत्राप्यनिवृ-
त्तसापिण्ड्यां गान्धर्वादिनोढापितृष्वसा विवक्षिता तस्याः सति तद्दुहितुर्भगिनी-
ति विशेषणं सार्थकं ब्राह्मादिविवाहेषु सापिण्ड्यनिवृत्ते भगिनीपदं नान्वियात्

वृ॰म॰×

राम २९१

अयमेव न्यायो मातृष्वस्रीयायामपि योजनीयः तस्माद्भगिन्यापत्यदोषेत मनुवचनं न व
लादविशेषनिषेधो विशेषविषयतयोपसंह्रियते न च ब्राह्मणादिविषये मातुलसु
तायाश्च मातृष्वसुः सुताया अपि विवाहः प्राप्नुयात् तन्न शिष्टगर्हितत्वेन तत्र
निषेधस्मृतिकल्पनात् शिष्टगर्हितस्यानुपादेयत्वं च याज्ञवल्क्य आह अस्वर्ग्यं लो
कविद्विष्टं धर्ममप्याचरेन्न त्विति यद्यपि मातुलसुतापरिणयनं क्वचिच्छिष्टग
र्हितं तथापि दाक्षिणात्यशिष्टैरादृतत्वेन नाविगीतो नायं मदीयानामाचारः न च
दाक्षिणात्यानां रागमूलत्वं शंकनीयं विधिनिषेधपरीक्षकैरेव तद्विवाहकर
णात् मातृष्वसुः सुताविवाहस्त्वविगीतेन शिष्टाचारेण गर्हितः मातुलसुतावि
वाहस्यानुग्राहकमन्त्रादयः तत्र मन्त्रवर्णः आयाहीन्द्र पथिभिरीलितेभिर्यज्ञमि
मं नो भागधेयं जुषस्व तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वस्रेयी वपामि
वेति अयमर्थः हे इन्द्र पथिभिरीलितेभिः स्तुतैर्नोऽस्माकमिमं यज्ञमायाहि आ
गत्य च अस्माभिर्दीयमानं भागधेयं जुषस्व तृप्तामाज्यादिना संस्कृतां वपां त्वामुद्दि

इष्टगुरुस्यपक्कवंतः तत्रदृष्टांतद्वयं यथामङ्गलस्य योषाद्दुहिता दौहित्रस्य भागः परि
णीया परिणेतुं योग्या यथा च पैतृष्वस्रेयी पौत्रस्य भागः तथा यं तेन वभागो वा पा
स्य इति वा तत्समनेयकेपि तस्मादुसमानादेव पुरुषाद्दत्ता वाग्घस्त्र जायते उत
तृतीये संगधात्वहे चतुर्थे संगधात्वकाइति समानादेकस्मात्पुरुषाद्दत्ता भोक्ता
ग्रहाः संभोग्यः श्रावृत्य हो तेनौ च मिथः संकल्पयतः कूटस्थमारभ्य तृतीये च
तुर्थे वा संगधात्वहे विव त्वावकाइत्यर्थः यद्यप्ययमर्थवादः तथापि मानांतर
विरोधाभावात्तस्यार्थे प्रमाणं विरोधिवचनानां मातृसपिंडविषयत्वस्य वर्णी
तत्वात्तस्मादविरुद्धार्थवादेनानुदितत्वादुपरणव विधिः कल्पयितुं शक्यः
तथाहि प्रेताग्निहोत्रे श्रूयते अधस्तात्समिधं धारयन्ननुद्रवेदुपरिहि देवेभ्यो
यज्ञं धारयंतीति तत्र पैतृकस्य हविषो ध्यानात् समस्त्रकस्य मिश्रारणं विधाय
तद्वाक्यशेषेस्य समिधोत्पविरुद्धपरिधारणं देवेकर्मणीयच्छ्रुतं तत्किमर्थवादः उ
तविधायक इति संशयः तत्राद्यो धारणविधिस्तावकत्वेनतदेकवाक्यता लाभा

विधा×

दर्थवादइतिपूर्वपक्षः प्रसिद्धंस्वर्थमनूद्यतेनस्तुतिर्भवेत् उपरिधारणंतुनक्वापिप्रसिद्धं अप्र
तत्वावकत्वायोगाद्वाक्यभेदमभ्युपगम्याप्यपूर्वार्थत्वाद्विधिःकल्पितः एवंतृतीयेपुरु
षेसंगच्छावहाइत्यादावपिअपूर्वार्थत्वे विधिःकल्प्य नमातुलसुतांविवहेदितिविधिः
कल्प्यते तस्माच्छ्रुतावनुगृहीतोयं विवाहस्मृतयस्तुव्रात्यादिसुतासपिंडनिराकरणेन
मातुलसुताविवाहोधर्म्यइतिमन्यंते उदाहरंतिचवचनानि तत्रबौधायनः पंचधावि
प्रतिपत्तिर्दक्षिणतः अनुपनीतेनसहभार्ययासहभक्ष्यभोजनं मातुलदुहितृपितृष्व
सृदुहितृपरिणयनमिति तथोत्तरतः ऊर्णाविक्रयः सीधुपानमुभयतोदद्भिर्व्यव
हारःआयुधीयकंसमुद्रयानमिति इतरइतरस्मिन्कुर्वन्दुष्यति इतरस्मिन्देशप्रा
माण्यादिति इतरोदाक्षिणात्यइतरस्मिन्नुत्तरदेशेमातुलसंबंधंकुर्वन्नदुष्यतिनः
स्वदेशे तथेतरउदीच्यःइतरस्मिन्दक्षिणदेशेशीधुपानादिकंकुर्वन्नदुष्यतिनस्व
देशे कुतोदेशप्रामाण्यात् देशनिबंधनत्वादाचारप्रामाण्यस्येत्यर्थः तथाहदेवलः
यस्मिन्देशेयआचारोन्यायदृष्टःसुकल्पितः सतस्मिन्नेवकर्तव्योदेशाचारःस्मृतो

पा०मा०
१९३

भृगोः यस्मिन्देशेपुरेग्रामे त्रैविद्येनगरेपिवा योयत्रविहितोधर्मस्तंधर्मंनविचालयेदि
ति ननुशिष्टाचारप्रामाण्येसति दुहितृविवाहोपिप्रसज्येत प्रजापतिनातथाचरणा
त् तथाचश्रुतिः प्रजापतिर्वैस्वांदुहितरमभ्यध्यायदिति मैवं नदेवचरितंचरेदिति
न्यायात् अतएवबौधायनः अनुष्ठितंतुयद्देवैर्मुनिभिर्यदनुष्ठितं नानुष्ठेयंमनु
ष्यैस्तदुक्तंकर्मसमाचरेदिति तदेवंपूर्वोक्तब्राह्मादिविवाहव्यवस्थयादेशभेदविष
यव्यवस्थयामातुलसुताविवाहोसपिंडामित्यादिशास्त्रादेवसिद्धः यवीयसीचवय
साकायपरिमाणेनच न्यूननरावयोन्यूनतायाइयत्तामाह मनुः त्रिंशद्वर्षोवहेत्क
न्यांहृद्यांद्वादशवार्षिकीं त्र्यष्टवर्षोष्टवर्षांवाधर्मेसीदतिसत्वरइति बृहस्पतिरपि
त्रिंशद्वर्षोदशाब्दांतुभार्यांविंदेतनग्निकां एकविंशतिवर्षोवासप्तवर्षामवाप्नुया
दिति विष्णुपुराणेपि वर्षैरेकगुणांभार्यामुद्वहेत्त्रिगुणःस्वयमिति अरोगिणीमवि
किन्नराजयक्ष्मादिरोगरहितां भ्रातृमतीं ज्येष्ठःकनिष्ठोवाभ्रातायस्याःसाभ्रातृम
ती अनेनपुत्रिकाशंकाव्युदस्यते अतएवमनुः यस्यास्तुनभवेद्भ्रातानविज्ञायेतवा

राम
१९३

240

पिता नोपयच्छेत तां भ्रातृः पुत्रिकाधर्मशंकया यस्याः पिता पुत्रिकाकरणाभिप्रायवान्वा न
वेत्ति न ज्ञायेत नोपयच्छेत यत्र तु नैषा शंका तामभ्रातृकामप्युपयच्छेत् तस्याभिप्रायः वि
ज्ञायेत वा पितृमुक्तेः वरेण सह संप्रतिपत्तिं विना पितुः संकल्पमात्रात्कन्या पुत्रिका भ
वतीति द्रष्टव्यं तथा च गौतमः अभिसंधिमात्रात्पुत्रिकेत्येकेषां तत्संशयान्नोपयच्छेद
भ्रातृकामिति मनुरपि अपुत्रोनेन विधिना सुतां कुर्वीत पुत्रिकां यदपत्यं भवेदस्यां त
न्मम स्यात्स्वधाकरमिति वरेण सह संप्रतिपत्तौ तु पुत्रिकाकरणं स्पष्टमेव विज्ञायते
सा च संप्रतिपत्तिर्वसिष्ठेन दर्शिता अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां अ
स्यां यो जायते पुत्रः स मे पुत्रो भवेदिति अस्याश्च पुत्रिकाया गांधर्वादिविवस्वपित्रादि
भिः सह सापिंड्यसगोत्रत्वानिवृत्तिः अत एव लौगाक्षिः मातामहस्य गोत्रेण मातुः
पिंडोदकक्रियां कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिरिति तदेवमभिहितं पुत्रि
कांशंकमानः पुत्रार्थी भ्रातृमतीमेवोद्वहेत् असमानार्षगोत्रजामिति ऋषेरिद
मार्षं प्रवरः गोत्रप्रवर्तकस्य मुनेर्व्यावर्तकमुनिगण इत्यर्थः तद्यथा गोत्रप्रवर्तकस्य

पा.मा.
१२४

2242

भरद्वाजस्य व्यावर्त्तकावंगिरोवृहस्पती अतएवांगिरसवार्हस्पत्यभारद्वाजगोत्रोहमि
तिप्रयुंजते एवमन्यदप्युदाहार्य्यं गोत्रंतु वंशपरंपराप्रसिद्धं यस्याश्चवरेणसहप्र
वरैक्यं गोत्रैक्यं वा नास्ति सा वधूर्विवाहमर्हति क्वचिद्गोत्रभेदेपि प्रवरैक्यमस्ति त
द्यथा याज्ञवल्क्यः वाधूलमौकोनांभिन्नगोत्राणां भार्गववीतहव्यसावेतसेति प्र
वरस्यैक्यात् अतस्तत्र विवाहप्रसक्तौ नभवद्छेदायासमानार्षेत्युक्तं क्वचित्प्र
वरभेदेपि गोत्रैक्यं तद्यथा अंगिरसांबरीषयौवनाश्वानां मांधात्रंबरीषयौवना
श्वेत्यत्रांगिरसमांधातृप्रवरभेदेपि यौवनाश्वगोत्रमेकं अतस्तत्र विवाहो माभू
दिति असमानगोत्रग्रहणं गोत्रप्रवर्त्तकाश्च प्राधान्येनाष्टौ मुनयः तेचागस्त्याष्ट
माः सप्तर्षयः तथाच वौधायनः विश्वामित्रो जमदग्निर्भरद्वाजोथ गोतमः अत्रि
र्वसिष्ठः कश्यप इत्येते सप्तर्षयः सप्तर्षीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमि
त्याचक्षत इति स्मृत्यंतरेपि जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमाः वसिष्ठ
कश्यपागस्त्या मुनयो गोत्रकारिणः एतेषां यान्यपत्यानि तानि गोत्राणि मन्वत

राम
१२४

243

इति एतेषां च गोत्राणामवांतरभेदाः सहस्रसंख्याकास्तेषां गणास्त्वेकोनपंचाशत् तथा
च बौधायनः गोत्राणां च सहस्राणि प्रयुतान्यर्बुदानि च ऊनपंचाशदेतेषां प्रवरा
ऋषिदर्शनादिति प्रवरगोत्रयोः समानत्वासमानत्वे बौधायनकात्यायनविश्वा
मित्रगर्गादिप्रणीतेषु प्रवरग्रंथेषु प्रसिद्धे न चात्र गोत्रप्रवरयोः पर्युदासनिमि
त्तत्वमिति शंकनीयं प्रत्येकं दोषाभिधानात् तदाह बौधायनः सगोत्रां चेदमत्यो
पयच्छेत मातृवदेनां बिभृयात् शातातपोपि परिणीय सगोत्रां तु समानप्रवरां
तथा कृत्वा तस्याः समुत्सर्गं मतिकृच्छ्रं विशोधनमिति आपस्तंबः समानगोत्रप्र
वरां कन्यामूढ्वोपगम्य च तस्यामुत्पाद्य चांडालं ब्राह्मण्यादेव हीयत इति इत्थंक
न्यालक्षणं परीक्ष्य कुलमपि परीक्षणीयं अत एव मनुः महान्त्यपि समृद्धानि गो
जाविधनधान्यतः स्त्रीसंबंधे दशैमानि कुलानि परिवर्जयेत् हीनक्रियं निष्पु
म्र रुषं निश्छंदो रोमशार्शसं क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि चेति हीन
क्रियं यागादिक्रियारहितं निष्पुरुषं स्त्रीमात्रशेषं निश्छंदो ध्ययनवर्जितं य

मिलितयो

पा.भा.
१२५

सोपि चतुर्दशकुलानीमान्यविवाह्यानि निर्दिशेत् अनार्षेयं व्रात्यलक्षणानामन्वितं
चैव वर्जयेत् अत्यन्तमतिह्रस्वं च अतिवर्णं च वर्जयेत् हीनांगमतिरिक्तांगमामया
विकुलानि च श्वित्रिकुष्ठिकुलादीनां कुर्यात्परिवर्जनम् सदा कामकुलं वर्ज्यं
रोमशानां च यत्कुलं अपस्मारिकुलं यच्च यच्च पाण्डुकुलं भवेदिति अनार्षेयम
विज्ञातप्रवरं एतच्च हीनक्रियादिवर्जनं तथाविधापत्यपरिहारार्थं कुलानुरू
पाः प्रजा भवंतीति हारीतवचनात् पराशरोपि मातुलान्भजते पुत्रः कन्यका भजते
पितॄन् यथाशीला भवेन्माता तथाशीलो भवेत्सुतेति मनुरपि पितुर्वा भजते शीलं
मातुर्वोभयमेव वा न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छतीति हेयकुलमुक्तं उ
पादेयं तु याज्ञवल्क्य आह दशपुरुषविख्याताच्छ्रोत्रियाणां महाकुलादिति
मातृतः पितृतः पंच पंच विख्याता यस्मिन्कुले तत् दशपुरुषविख्यातं तस्मान्म
हाकुलात् श्रुतरूपाद्यादिसमन्वितकन्यामुद्वहेदित्यर्थः मनुरपि उत्तमैरुत्तमैर्नि
त्यं संबंधानाचरेत्सदा निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेदिति तत्रोत्तमास्

राम
१२५

245

एवाह विशुद्धाः कर्मभिश्चैव श्रुतिस्मृतिनिदर्शितैः अविच्छिन्नवृत्तचर्या महाकुलसम
न्विताः महाकुलेश्च संबद्धा महत्त्वेच व्यवस्थिताः संतुष्टाः सज्जनहिताः साधवः समद
र्शिनः लोभरागद्वेषामर्षमानमोहादिवर्जिताः अक्रोधनाः सुप्रसादाः कार्याः संबं
धिनः सदा अधमानाह येस्तेनाः पिशुनाः क्लीबा येच नास्तिकवृत्तयः विकर्मणाच
जीवंतो विकृताकृतयस्तथा प्रवृद्धवैराः क्रूरैर्ये राजकिल्विषिणस्तथा ब्रह्मस्वादननि
न्ताश्च कदर्याश्च विगर्हिताः अप्रजायेषु वंशेषु स्त्रीप्रजाप्रसवस्तथा पतिघ्न्यश्च सुवा
सिन्धुस्ताश्च यत्नेन वर्जयेदिति कन्यादाने वरनियमो गौतमेन दर्शितः विद्याचार
वंधुलनद्वाराशीलसंपन्नाय दद्यादिति यमोपि कुलंच शीलंच वपुर्वयश्च विद्याचवि
त्तंच समानतांच एतान्गुणान्सप्तपरीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयमिति या
ज्ञवल्क्यः एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्
जनप्रिय इति कन्यकायामुक्तदोषैर्मुक्तः पुंस्त्वपरीक्षोपायस्तु नारदेन दर्शितः यस्या
प्सु प्लवते बीजं ह्रादि मूत्रंच फेनिलं पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षंडकः चतुर्दश

।धा·मा·
१९६

विधः शास्त्रैः षंडो दृष्टो मनीषिभिः चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् नि
सर्गषंडो वध्रश्च पक्षषंडस्तथैव च अभिशापाद्गुरो रोगाद्देवक्रोधात्तथैव च ईर्ष्याषंडश्च
सेव्यश्च वातरेता मुखेभगः आक्षिप्तो मोघबीजश्च शालीनोन्यापतिस्तथेति निसर्ग
षंडः स्वभावतो लिंगवृषणहीनः वध्रः छिन्नमुष्कः पंचदशादिनानि स्त्रियमासेवमानस
कृङ्गेगह्नमः पक्षषंडः गुरुशापषंडादयस्त्रयः स्पष्टाः ईर्ष्यया पुंस्त्वमुत्पाद्यते यस्ये
र्ष्याषंडः सुपचारविशेषेण पुंस्त्वशक्तिर्यस्य स सेव्यषंडः वातापहृतरेतस्को वातरेताः
यस्य मुखे भगवत्पुंस्त्वशक्तिर्न योनौ स मुखेभगः रेतो निषेधात्षंडीपुरुषभावस्सोन्या
पत्तिरिति एतच्चापरीक्ष्य हेयं अत्र कारणमाह स एव अपत्यार्थं स्त्रियः सृष्टाः स्त्री
क्षेत्रं बीजिनो नराः क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हतीति षंडवदन्यानपि वर्ज्या
नाह कात्यायनः दूरस्थानामविद्यानां मोक्षमार्गानुसारिणां शूराणां निर्धना
नां च न देया कन्यका बुधैरिति कीदृशाय तर्हि देयेत्यत आह मनुः उत्कृष्टायाभि
रूपाय वराय सदृशाय च अप्राप्तामपि तानस्मै कन्यां दद्याद्विचक्षणः इति अत्रा

246

राम
१९६

ग्नामपि अप्राप्तविवाहसमयां बालिकामपीत्यर्थः बौधायनोपि दद्याद्गुणवते कन्यां
नग्निकां ब्रह्मचारिणे अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलामिति यत्तु यमेनो
क्तं काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि न त्वेवैनां प्रयच्छेत्तु गुणहीनाय कर्हि
चिदिति तद्गुणवति संभवति गुणहीनाय न दद्यादित्येवंपरं न तु सर्वथा गुणहीन
निषेधपरं नो चेदपि वा गुणहीनायेति बौधायनोक्तोनुकल्पो निर्विषयः स्यात् ऋ
तुमत्यपि तिष्ठेदिति वचनं तूक्तरीत्यान स्वार्थेनाप्यवन्तु हि तिष्ठन्त्यां दोषः पितरमृ
च्छतीति संवर्तोपि रोमकाले तु संप्राप्ते सोमो भुंक्तेथ कन्यकां रजःकाले तु गंधर्वो व
ह्निस्तु कुचदर्शने तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेदिति कन्याशब्देन ल
ज्जादिभिज्ञानरहितवयोयुक्ता विवक्षिता तथा च पुराणं यावन्न लज्जतेङ्गानि
कन्या पुरुषसन्निधौ योन्यादीन्युपगूहेत तावद्भवति कन्यका संग्रहकारोपि
यावच्चेलं न गृह्णाति यावत्क्रीडति पांसुभिः यावद्दोषं न जानाति तावद्भवति कन्यके
ति वयोविशेषे दानतः फलविशेषमाह मरीचिः गौरीं ददन्नाकपृष्ठं वैकुंठं रो

हिणीं दद्यात् कन्यां दद्यत्कुलं लोकं गौरवं तमजस्वलामिति गौर्यादिशब्दार्थोयमे
न दर्शितः अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी दशवर्षा भवेत्कन्या अत ऊ
र्ध्वं रजस्वलेति संवर्तोपि अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत् दशमे कन्यका
प्रोक्ता द्वादशे वृषली स्मृतेति अस्यां तु कल्पभेदेन दातृविशेषमाह नारदः पि
ता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः मातामहो मातुलश्च सकुल्यो बांधव
स्तथा माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते तस्यामप्रकृतिस्थायां कन्यां दद्युः
स्वजातयः यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेदिति याज्ञवल्क्योपि पि
ता पितामहो भ्राता सकुल्यो जननी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः प
रः अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ गम्यं त्वभावे दातॄणां कन्या कुर्या
त्स्वयंवरमिति गम्यं गमनार्हं सावर्ण्यादि गुणयुक्तमित्यर्थः तथा च नारदः
सवर्णमनुरूपं च कुलशीलबलश्रुतैः सहधर्मं चरेत्तेन पुत्रांश्चोत्पादयेत्तत इति
सवर्णं वरं प्राप्येत्यध्याहृत्य योजनीयं रातस्वासतिरजोदर्शने दृष्टे तु रजसि पित्रा

दिष्वसत्स्वपि कंचित्कालं पितृशासनं प्रतीक्ष्य तदुपेक्षणे स्वयमेव वरं वरयेत् तदाह बोधाय
नः त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनं ततश्चतुर्थे वर्षे विंदेत सदृशं पतिं अ
विद्यमाने सदृशे गुणहीनमपि श्रयेत् मनुरपि त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती
सती ऊर्ध्वं तु कालादेतस्माद्विंदेत सदृशं पतिं अदीयमाना भर्तारमधिगच्छेद्यदि
स्वयं नैनः किंचिदवाप्नोति न च यं साधिगच्छति सा यं भर्तारमधिगच्छति सोपि नैनो
धिगच्छतीत्यर्थः यत्तु विष्णुनोक्तं ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरमिति त
द्गुणवद्वरलाभे सति द्रष्टव्यम् ननु ऋतुत्रयपर्यवस्थां कन्याशब्दः कन्याशब्दः कथं प्रयु
क्तः यतोयमेव दशवर्षा भवेत्कन्येत्युक्तं न च दशमे वर्षे ऋतुः संभवति नायं दोषः गौर्या
दिशब्दवत्कन्याशब्दस्यापि यमेन परिभाषितत्वात् सा च परिभाषा फलकथनाद
वुपयुक्ता तच्च पूर्वमेवोदाहृतं कन्यां दद्ब्रह्मलोकमिति लोकप्रसिद्ध्या तु कन्याशब्दो
विवाहरहितस्त्रीमात्रमाचष्टे एवं च सति शास्त्रेषु बहवः कन्याशब्दा ऋतुगृहीताभवं
ति तथा चानुशासनिकेऽप्यावर्जकोपाख्याने वृद्धस्त्रियाः प्रयुक्तः कौमारं ब्रह्मचर्यमेक

स्यैवास्मिन्न संशय इति शाल्यपर्वण्यपि वृद्धस्त्रियं नारदेन प्रोक्तः असंस्कृतायाः कन्यायाः
कुतो लोकास्तवानघ इति उमामहेश्वरसंवादेऽपि ऋतुस्नाता तु या शुद्धा सा कन्येत्यभि
धीयत इति ननु संस्कृताया इति वचने विवाहरहिताया उत्तमलोकाभाव उक्तः सोऽनु
पपन्नः विवाहरहितानामपि ब्रह्मवादिनीनामुपनयनाध्ययनादिभिरुत्तमलोक
संभवात् अत एव हारीतेनोक्तं द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च तत्र ब्र
ह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भिक्षाचर्येति सद्योवधूनां
तूपस्थिते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्य इति मैवं तस्य कल्पान्तर
विषयत्वात् तथा च यमः पुराकल्पे कुमारीणां मौञ्जीबंधनमिष्यते अध्यापनं च
वेदानां सावित्रीवचनं तथा पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः स्वगृहे
चैव कन्याया भैक्षचर्या विधीयते वर्जयेदजिनं चीरं जटाधारणमेव चेति अष्टव
र्षा भवेद्गौरीत्यादिना विवाहान्निबोधत ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासु
रः गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधम इति तेषां क्रमेण लक्षणमाह स एव

आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयं आहूय दानं कन्याया ब्राह्मो धर्म्मः प्रकीर्त्तितः १
यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते अलंकृत्य सुतादानं दैवं धर्म्मं प्रचक्षते २ एकं गो-
मिथुनं द्वे वा वरादादाय धर्मतः कन्याप्रदानं विधिवदार्षो धर्म्मः प्रचक्षते ३ सहोभौ चर-
तां धर्ममिति वाचानुभाष्य तु कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ४ ज्ञातिभ्यो
द्रविणं दत्वा कन्यायाश्च स्वशक्तितः कन्याप्रदानं स्वाच्छंद्यादासुरो धर्म उच्यते ५ इच्छ-
यान्योन्यसंयोगः कन्यायाश्च वरस्य च गांधर्वः स इति ज्ञेयो मैथुन्यः कामसंभवः ६ ह-
त्वा छित्वा च भित्वा च क्रोशंतीं रुदतीं गृहात् प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते
७ सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति स पापिष्ठो विवाहानां पैशाचः कथितोष्टम इ-
ति ८ नारदोपि ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्ततः परः आर्षश्चैवाथ दैवश्च गांध-
र्वश्चासुरस्तथा राक्षसोनंतरस्तस्मात्पैशाचश्चाष्टमो धम इति वर्णानुपूर्व्येण विवाह-
नियममाह मनुः षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो वरान् विट्शूद्रयोस्तु तानेव वि-
द्याद्धर्म्यान्न राक्षसानिति आदितः षड्विवाहा विप्रस्य धर्म्या आसुरादयश्चत्वारः पा

श्चान्याः क्षत्रियाणां धर्म्याः राक्षसवर्ज्जितरा व वैश्यशूद्रयोः एतेषां ब्राह्मादीनां मध्ये प्रशस्ता
नाह स एव चतुरो ब्राह्मणस्याद्यान् प्रशस्तान्कवयो विदुः राक्षसं क्षत्रियस्यैकमासुरं वैश्य
शूद्रयोरिति स्मृत्यंतरेपि चत्वारो ब्राह्मणस्याद्याः प्रशस्ता गांधर्वराक्षसौ राजन्यस्यासुरो वै
श्यशूद्रयोस्त्वन्ये गर्हिता इति गर्हितो न कस्यापि प्रशस्त इत्यर्थः अन्यविवाहालाभे ब्राह्म॰

णादीनां पैशाचमप्यनुजानाति वत्सः सर्वोपायैरसाध्या स्यात्कन्या पुरुषस्य या चौर्ये
णापि विवाहेन सा विवाह्या रहःस्थितेति ब्राह्मादीनां फलमाह मनुः दश पूर्वान्परान्वं
श्यान्नात्मानं चैकविंशकं ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् दैवोढायाः सु
तश्चैव सप्त सप्त परावरान् आर्षोढायाः सुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः ब्राह्मादि
षु विवाहेषु चतुर्ष्वेवानुपूर्वशः ब्रह्मवर्चस्विनः पुत्रा जायंते शिष्टसंमताः रूपसत्त्वगुणो
पेता धनवंतो यशस्विनः पर्याप्तभोगा धर्मिष्ठा जीवंति च शतं समाः इतरेषु त्वशिष्टेषु
नृशंसानृतवादिनः जायंतेऽविवाहेषु ब्रह्मधर्मद्विषः सुताः प्रशस्तेष्वपि चतुर्षु विवा
हेषु पूर्वः पूर्वः प्रशस्ततरः तत्र बौधायनः तेषां चत्वारः पूर्वे ब्राह्मणस्य तेष्वपि पूर्वः पूर्वः श्रेया

नइतरेषामुत्तरोत्तरः पापीयानिति नन्वासुरवदार्षेपि पापीयान् क्रयप्राप्तत्वाविशेषात्
अतएव काश्यपः क्रयक्रीतातुयानारी नसापत्न्यभिधीयते नसादेवेनसापित्र्ये दासीं
तां काश्यपोब्रवीदिति मनुरप्यार्षेप्याक्रयक्रीतत्वादधर्मत्वमभिप्रेत्याह पंचानांतु
त्रयोधर्म्या द्वावधर्म्यौ स्मृताविह पैशाचश्चासुरश्चैव नकर्त्तव्यौ कथंचनेति ब्राह्मादी-
नामासुरांतानां मध्ये ब्राह्मदैवप्राजापत्याख्यास्त्रयो धर्म्याः क्रयाभावात् आर्षासुरौ द्वाव
धर्म्यौ क्रयक्रीतत्वात् तयोरप्यासुरः पैशाचवदापद्यपि नकर्त्तव्यः तेन पंचानामिति व
चनस्य मतांतरोपन्यासपरत्वात् कुत एतत् यतः स्वयमेवोत्तरत्र गोमिथुनस्य शुल्क
त्वमतांतरत्वेनानूद्य निषेधति आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् अ
ल्पो वापि महान्वापि विक्रयस्तावदेव सइति गोमिथुनं शुल्कमिति यत्केचिदाहु
स्तन्मृषैव नहि तस्य शुल्कत्वं संभवति तल्लक्षणाभावात् अनियतपरिमाणत्वं
हि शुल्कलक्षणं क्रयेन तद्दर्शनात् क्रये साधनं हि मूल्यं देशकालाद्यपेक्षयाल्पं वा म
हद्वा भवति प्रकृते तु परिमाणं नियतं यतः सत्यार्षस्तावतैव गोमिथुनेनैव संप
द्यते नत्वन्यथा अतः क्रयक्रीतत्वाभावात् धर्म्य एवार्षः अतएव देवलः पूर्वं विवाहत्र

पा.मा.
२००

त्वारो धर्म्या स्तोयश्च दानजाः अञ्जल्को ब्राह्मणो हिस्ननार्यंति वयोः कुलमिति न च गांध
र्वादिविवाहेषु सप्तपदाभिक्रमणाद्यभावात् पतित्वभार्यात्वाभाव इति शंकनीयं स्वीका
रानुरागभावेपि पश्चात्तत्सद्भावात् तदाह देवलः गांधर्वादिविवाहेषु पुनर्वैवाहिको
विधिः कर्त्तव्यश्च त्रिभिर्वर्णैः समर्च्येनाग्निसाक्षिकमिति गृह्यपरिशिष्टेपि गांधर्वासु
रपैशाचविवाहाहरागसक्षयः सर्वं परिग्रहस्तेषां पश्चाद्धोमो विधीयते होमाकरोत्तु
न भार्यात्वं अतएव वसिष्ठबोधायनौ बलादपहृता कन्या मंत्रैर्यदि न संस्कृता
अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति तस्माद्गांधर्वादिष्वपि सप्तपदाभि
क्रमणसंभवादस्ति भार्यात्वं ब्राह्मादिषु विवाहेषु यद्दानमुक्तं तत्सकृदेव तथा च या
ज्ञवल्क्यः सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभागिति सकृदंशो निपतति सकृ
त्कन्या प्रदीयते सकृदाह ददानीति त्रीण्येतानि सकृत्सकृदिति एतच्चादुष्टवरा
भिप्रायं यदाह नारदः दत्वा कां नायययः कं नं पूर्ववराय न ददाति तां अदुष्टश्चेद्वरो
राजा स दंड्यस्तत्र चोरवदिति किमर्थं अपवादः नेत्याह याज्ञवल्क्यः दत्तामपि ह
रेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेदिति एतद्वाग्दानाभिप्रायं यस्मै वाचा दत्ता न तेनोन्य

राम
२००

254

दोषमनभिधाय प्रयच्छति स राज्ञा दंड्य इत्याह नारदः यस्तु दोषवतीं कन्यामनाख्याय
प्रयच्छति तस्य कुर्यान्नृपो दंडं पूर्वसाहसचोदितं याज्ञवल्क्योपि अनाख्याय द
दद्दोषं दंड्य उत्तमसाहसमिति कन्यादोषास्तु नारदेन दर्शिताः दीर्घकुत्सितरोगा
र्ताव्यंगा संसृष्टमैथुना धृष्टान्यगतभावा च कन्यादोषाः प्रकीर्तिताः न केवलं
दोषमनभिधाय ददतो दंडः अपि तु सापरित्याज्येत्याह मनुः विधिवत्प्रतिगृह्या
पि त्यजेत्कन्यां विगर्हितां व्याधितां विप्रदुष्टां वा छद्मना चोपपादितामिति नारदो
पि नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरं दोषे सति न दोषः स्यादन्योन्यं त्यजतो
र्द्वयोरिति एतत्सप्तमपदाभिक्रमणात्पूर्वं वेदितव्यं तत्रैव भार्यात्वस्योपपत्तेः अ
त एव मनुः पाणिग्रहणमंत्रास्तु नियतं दारलक्षणं तेषां निष्ठा तु विज्ञेया विद्वद्भिः
सप्तमे पदे यमोपि नोदकेन न वा वाचा कन्यायाः पतिरिष्यते पाणिग्रहणसंस्का
रात्पतित्वं सप्तमे पद इति पाणिग्रहणसंस्कारात्पूर्वं परिणेतुर्मरणेन कन्यात्वं
हीयते तथा च वसिष्ठः अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि न च मंत्रोपनी

256

श्रेष्ठाय शास्त्रतो लभ्येत न तस्मै देया नापि दुष्टाय पूर्वं तस्मै तथा च गौतमः प्रतिश्रुत्याप्यध
र्मसंयुक्ताय न दद्यादिति वरदोषास्तु कात्यायनेनोक्ताः उन्मत्तः पतितः कुष्ठी तथा षंडः
स्वगोत्रजः चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः वरदोषास्तथैवैते कन्यादोषाः
प्रकीर्तिता इति यत्तु ऊढायाः पुनरुद्वाहो यमस्तानान् तथाप्यादर्शितः वरश्चेत्कुलशी
लाभ्यां न युज्येत कथंचन न मंत्राः कारणं तत्र न च कन्यानृतं भवे [illegible] त समाधियु
तां कन्यां बलादहृतयोनिजां पुनर्गुणवते दद्यादिति शातातपेनाभिहितं इति हीनस्य
कुलशीलाभ्यां हरन्कन्यां न दोषभाक् न मंत्राः कारणं तत्र न च कन्यानृतं भवेदिति
कात्यायनोपि सनयद्यन्यजातीयः पतितः क्लीव एव वा विकर्मस्थः सगोत्रो वा
दासो दीर्घामयोपि वा ऊढापि देया चान्यस्मै सर्वाभरणभूषिता मनुरपि नष्टे
मृते प्रव्रजिते क्लीवे च पतिते तथा पंचस्वापत्सु नारीणां पतिरन्यो विधीयत इ
ति सोयं पुनरुद्वाहो युगांतरविषयः तथा चादिपुराणं ऊढायाः पुनरुद्वाहं
ज्येष्ठांशं गोवधं तथा कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुमिति यत्तु कन्या

द्यः=

तावत्तु कुमारी पितुरेव सेति वरणानन्तरं देशान्तरगमने विशेषमाह कात्यायनः वरयित्वा
तु यः कश्चित्प्रणश्येत्पुरुषो यदा ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेद्वरमिति नारदोपि
प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरमिति शु
ल्कं दत्वा यदि वरो म्रियते तदा किं कर्तव्यमित्यत आह मनुः कन्यायां दत्तशुल्कायां म्रि
येत यदि शुल्कदः देवराय प्रदातव्या यदि कन्यानुमन्यते देशान्तरगमने तु विशेषः का
त्यायनेनोक्तः प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा धार्या सा वर्षमेकं तु देयान्य
स्मै विधानतः एवं च वाग्दानादारभ्य सप्तमपदाभिक्रमणात्प्राग्दोषदर्शने मरणादौ वा क
न्यामन्यस्मै दद्यादित्युक्तं भवति अत एव कात्यायनः अनेकेभ्यो हि दत्तायामनूढायां
तु नत्र वै परागतश्च सर्वेषां लभते तदिमां श्रुतां अथागच्छेत वोढायां दत्तां पूर्ववरो हरे
दिति अनूढायां यस्मै पूर्वं प्रतिश्रुता स एव कन्यां लभते अन्येनोढायां तु स्वदत्तशुल्क
मात्रं हरेत् तेन कन्याभिमर्षः लेतल्याभ्यिमत्त्वहादिति यदुक्तं तत्रोद्वहनीया क
न्या द्विविधा सवर्णा चासवर्णा च तयोराद्या प्रशस्तेत्याह मनुः सवर्णाग्रे द्विजातीनां प्र

258

पा॰मा॰
२०२

शस्त्रादारकर्मणि कामतस्तु प्रवृत्तानामिमे स्युः क्रमशो वरा इति अग्रे स्नातकस्य ब्रह्मचर्यमविवा
हे दारकर्मण्यग्निहोत्रादौ धर्मे सवर्णा वरेण समानो वर्णो ब्राह्मणादिर्येषां ताः सा यथा ब्राह्म
णस्य ब्राह्मणी क्षत्रियस्य क्षत्रिया वैश्यस्य वैश्या अशक्तो धर्मार्थमादौ सवर्णामुद्वाह्य पश्चा
दितरं सर्वर्त्तदतेषामवरा हीनवर्णा इमाः क्षत्रियाद्याः क्रमेण भार्याः स्युः तथा च याज्ञ
वल्क्यः तिस्रो वर्णानुपूर्व्येण द्वे तथैकां यथाक्रमं ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्र
जन्मन इति मनुरपि शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ते च स्वा चैव राज्ञः स्यु
स्ताश्च स्वा चाग्रजन्मन इति नारदोपि ब्राह्मणस्यानुलोम्येन स्त्रियोन्यास्तिस्र एव तु शू
द्रायाः प्रातिलोम्येन तथान्ये पतयस्त्रयः द्वे भार्ये क्षत्रियस्यान्ये वैश्यस्यैका प्रकीर्तिता
वैश्याया द्वौ पती ज्ञेया वैकोन्यः क्षत्रियापतिरिति वसिष्ठपारस्करावपि तिस्रो ब्राह्मण
स्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य सर्वेषां शूद्रामेके मंत्रवर्जमिति पैठीन
सिः अलाभे कन्यायाः स्नातकव्रतं चरेत् अपि वा क्षत्रियायां पुत्रमुत्पादयीत शूद्रायां वे
त्येक इति विष्णुरपि द्विजस्य भार्या शूद्रा तु धर्मार्थं न भवेत्क्वचित् रत्यर्थमेव सा तस्य

राम
२०२

णां धर्म्मप्रकीर्त्तितेति एवं तावदेषां मतेन द्विजातीनामापदि शूद्रासंग्रहणांशतिमात्रफल
मपि देषमाषाद्यनुज्ञात मपि इदानीमपरेषां मतेन ब्राह्मणक्षत्रिययोस्साव शूद्राव
र्ज्जमेव प्रक्रं नत्रेनाह ह इत्युच्यते तत्र मनुः न ब्राह्मणक्षत्रिययोरापद्यपितिष्ठतोः कस्मि
श्चिदपि वृत्तांते शूद्राभार्योपदिश्यते हीनजातिस्त्रियं मोहादुद्वहंतो द्विजातयः कुलान्ये
व नयंत्याशु ससंतानानि शूद्रतां शूद्रावेदीपतत्यत्रेरुतनयस्य च शौनकस्य
सुतोत्पत्त्या —— तदपत्यतया भृगोः शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं ज
नयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते दैवं तातातिथ्यं द्विजन्मनः कृत्वा पुरीषगर्त्ते
पुपतितोस्मीति दुःखितः मामधः पातयेदेष पापात्मा काममोहितः अधोगतिं व्र
जत्विति प्रमितिश शूद्रापत्नेतनम् नतु ताभ्यस्वा वायं जन्मन इति मनुनाशूद्राविवा
हो द्विजस्याप्यनुज्ञातः पुनश्च तेनैव ब्राह्मणक्षत्रिययोरिति सन्निषिद्धः अतो व्याह
तिरिति चेन्नैवम् मतभेदेन वाव्यवस्थोपपत्तेः अत एव याज्ञवल्क्येन मतभेदः स्प
ष्टीकृतः यदुच्यते द्विजातीनां शूद्रा दारोपसंग्रहः न तन्मम मतं यस्मात्तत्रायं जायते।

हि

पा॰मा॰
१०३

स्वयमिति आनुशासनिकेपि अपत्यजन्म शूद्रायां न प्रशंसंति साधवः रत्यर्थमपि शूद्रा
स्यान्नेत्याहुरपरे जना इति युगभेदेन व्यवस्था वस्त्वंतरे स्पष्टीकृता सवर्णासु क
न्यासु विवाहश्चाद्विजातिष्वित्यादिना तु क्रमस्य कलौयुगे त्विमान्धर्मान्वर्ज्यानाहुर्म
नीषिण इत्युपसंहारात् विवाहविधिस्तु मनुनाभिहितः पाणिग्रहणसंस्कारः स
वर्णास्वुपदिश्यते असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि शरः क्षत्रियया ग्रा
ह्यः प्रतोदो वैश्यकन्यया वासोदशा शूद्रयानुवर्णोत्कृष्टस्य वेदने शंखलिखि
तावपि इषुं गृह्णाति राजन्या प्रतोदं वैश्या प्रशांत शूद्रा ब्राह्मणस्य सवर्णायाः पाणिं गृ॰ स
ह्णीयात् पैठीनसिः सांगुष्ठं ब्राह्मण्याः पाणिं गृह्णीयात् क्षत्रियाशरं वैश्यायाः प्रतोदं
शूद्रा वस्त्रदशामिति परिक्रमो ब्राह्मणस्योक्तो राजन्यवैश्ययोर्नावार्यपरिक्रमइति
कृतोद्वाहस्योपगमनियममाह मनुः ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा प
र्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया इति रजोदर्शनप्रभृति षोडशाहोरात्रात्मकः कालो
गर्भग्रहणसमर्थो ऋतुः तस्मिन्नृतावपत्यार्थं सदा स्त्रियमुपगच्छेत् न चाभिगमने

राम
२०३